BIBLIOTHECA INDICA;

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED UNDER THE PATRONAGE OF THE

Hon. Court of Directors of the East India Company,

AND THE SUPERINTENDENCE OF THE

ASIATIC SOCIETY OF BENGAL.

EDITED BY DR. E. ROER.



सानन्दगिरिकृतटीक शाङ्करभाष्यसमुलित बृहदारण्यकोपनिषत् ।

THE BRIHAD ARANYAKA UPANISHAD,

WITH THE

COMMENTARY OF SANKARA ACHARYA, THE GLOSS OF ANANDA GIRI, AND AN ENGLISH TRANSLATION OF THE TEXT AND COMMENTARY.

BY DR. E. RÖER.

FASCICULUS XII.

CALCUTTA:

PRINTED BY J. THOMAS, AT THE BAPTIST MISSION PRESS, CIRCULAR ROAD.

1848.

ORIENTAL SECTION—ASIATIC SOCIETY.

1848.

WELBY JACKSON, Esq.
BABU DEBENDRANA'THA THA'KURA.
H. M. ELLIOT, Esq.
W. SETON KARR, Esq.
BABU HARI'MOHANA SENA.
BABU RA'JENDRALA'L MITTRA.
Dr. E. ROER, Secretary, Oriental Department.

Honorary (non-resident) Members.

B. H. HODGSON, Esq., *Darjiling*.
WALTER ELLIOTT, Esq., *Madras*.
Dr. A. SPRENGER, *Lucknow*.
H. H. WILSON, Esq. Boden Professor of Sanscrit, *Oxford*.

उ॰ कस्मिन्नु वाक् प्रतिष्ठितेति हृदय इति कस्मिन्नु हृदयं प्रतिष्ठितमिति ॥ २४ ॥ अहल्लिकेति

भा॰ कस्मिन्प्रतिष्ठित इति वाचीति। कस्मिन्नु वाक् प्रतिष्ठितेति हृदय इति। तत्र याज्ञवल्क्यः सर्व्वासु दिक्षु विसृतेन हृदयेन सर्व्वा दिश आत्मत्वेनाभिसम्पन्नः सदेवाः सप्रतिष्ठा दिशश्चात्मभूतास्तस्य नामरूपकर्म्मात्मभूतस्य याज्ञवल्क्यस्य। यद्रूपं तत्प्राच्या दिशा सह हृदयभूतं याज्ञवल्क्यस्य। यत्केवलं कर्म्म पुत्रोत्पादनलक्षणञ्च ज्ञानसहितं च सहफलेनाधिष्ठात्रीभिश्च देवताभिर्दक्षिणा प्रतीच्युदीच्यः कर्म्मफलात्मिका हृदयमेवापन्नास्तस्य। ध्रुवया दिशा सह नाम सर्व्वं वाग्द्वारेण हृदयमेवापन्नं। एतावद्धीदं सर्व्वं यद्रूपं वा कर्म्म वा नाम वेति सर्व्वं हृदयमेत-

---

आ॰ भागमाह। यद्रूपमिति। आद्ये पर्य्याये हृदये रूपप्रपञ्चोपसंहारो दर्शितो हृदये ह्येव रूपाणीति श्रुतेरित्यर्थः॥ दक्षिणायामित्यादिपर्य्यायत्रयेण तत्रैव कर्म्मोपसंहार उक्त इत्याह। यत्केवलमिति। यद्धि केवलं कर्म्म तत्फलादिभिः सह दक्षिणादिगात्मकं हृद्युपसंक्रियते। यज्ञदक्षिणादिद्वारा हृदये प्रतिष्ठितत्वोक्तेर्दक्षिणस्या दिशस्तत्फलत्वात्पुत्रजन्माख्यं च कर्म्म प्रतीच्यात्मकं तत्रैवोपसंहृतं हृदये ह्येव रेतः प्रतिष्ठितमिति श्रुतेः। पुत्रजन्मनश्च तत्कार्य्यत्वाज्ज्ञानसहितमपि कर्म्मफलप्रतिष्ठा देवताभिस्सहोदीच्यात्मकं। तत्रैवोपसंहृतं सोमदेवताया दीक्षादिद्वारा तत्प्रतिष्ठत्वश्रुतेरेवं दिक्त्रये सर्व्वं कर्म्म हृदि संहृतमित्यर्थः॥ पञ्चमपर्य्यायस्य तात्पर्य्यमाह। ध्रुवयेति॥ नामरूपकर्म्मस्वूपसंहृतेष्वपि किञ्चिदुपसंहर्त्तव्यान्तरमवशिष्टमस्तीत्याशङ्क्य निराकरोति।

उ॰ होवाच याज्ञवल्क्यो यत्रैतदन्यत्रास्मन्मन्यासै यद्ध्येतदन्यत्रास्मत्स्याच्छ्वानो वैनद्द्युर्वयाꣳसि वैनद्विमथ्नीरन्निति ॥ २५ ॥

भा॰ सर्वात्मकं हृदयं पृच्छ्यते कस्मिन्नु हृदयं प्रतिष्ठितमिति ॥ २४ ॥ अहल्लिकेति होवाच याज्ञवल्क्यो नामान्तरेण सम्बोधनं कृतवान्। यत्र यस्मिन्काले एतद्धृदयमात्मास्य शरीरस्यान्यत्र क्वचिद्देशान्तरेऽस्मत्तो वर्त्तत इति मन्यासै मन्यसे। यद्धि यदि ह्येतद्धृदयमन्यत्रास्मत्स्याद्भवेच्छ्वानो वा एनच्छरीरं तदाद्युर्वयांसि वा पक्षिणो वा एनद्धि मथ्नीरन्विलोडयेयुर्विकर्षेरन्निति। तस्मान्मयि शरीरे हृदयं प्रतिष्ठितमित्यर्थः। शरीरस्यापि नामरूपकर्मात्मकत्वाद्धृदये प्रतिष्ठितत्वं ॥ २५ ॥

आ॰ एतावद्धीति ॥ प्रश्नान्तरमुत्थापयति। तत्सर्वात्मकमिति ॥ २४ ॥ हृदयपदेन नामाद्याधारवदहल्लिकशब्देनापि हृदयाधिकरणं विवक्ष्यते वाक्यच्छायासाम्यादित्याशङ्क्याह। नामान्तरेणेति। अहनि लीयत इति विगृह्य प्रेतवाचिनेति शेषः ॥ देहे हृदयं प्रतिष्ठितमिति व्युत्पादयति। यत्रेत्यादिना। तस्मिन्काले शरीरं मृतं स्यादिति शेषः ॥ शरीरस्य हृदयाश्रयत्वं विशदयति। यद्धीत्यादिना॥ देहादन्यत्र हृदयस्यावस्थाने यथोक्तदोषमिति शब्देन परामृश्य फलितमाह। इतीत्यादिना ॥ देहस्तर्हि कुत्र प्रतिष्ठित इत्यत आह। शरीरस्येति ॥ वृत्तमनूद्य प्रश्नान्तरमुपादत्ते। हृदयेति ॥ २५ ॥

उ॰ कस्मिन्नु त्वञ्चात्मा च प्रतिष्ठितौ स्थ इति प्राण इति कस्मिन्नु प्राणः प्रतिष्ठित इत्यपान इति कस्मिन्न्वपानः प्रतिष्ठित इति व्यान इति कस्मिन्नु

भा॰ हृदयशरीरयोरेवमन्योऽन्यप्रतिष्ठयोः कार्य्यकरणयोरतस्त्वां पृच्छामि। कस्मिन्नु त्वं च शरीरमात्मा च तव हृदयं प्रतिष्ठितौ स्थ इति। प्राण इति। देहात्मानौ प्राणे प्रतिष्ठितौ स्यातां प्राणवृत्तौ। कस्मिन्नु प्राणः प्रतिष्ठित इत्यपान इति। सापि प्राणवृत्तिः प्राङेव प्रेयादपानवृत्त्या चेन्न निगृह्यते। कस्मिन् न्वपानः प्रतिष्ठित इति। व्यान इति। साप्यपानवृत्तिरध एव यायात्। प्राणवृत्तिश्च प्राङेव मध्यस्थया चेद्व्यानवृत्त्या न निगृह्यते। कस्मिन्व्यानः प्रतिष्ठित इति। उदान इति। सर्व्वास्तिस्रोऽपि वृत्तय उदाने कीलस्थानीये चेन्न निबद्धा विष्वग्भवेयुः। कस्मिन्नुदानः प्रतिष्ठित इति समान इति। समानप्रतिष्ठा ह्येताः सर्व्वा वृत्तयः। एतदुक्तं भवति शरीरहृदयवायवोऽन्योन्यप्र-

---

आ॰ प्राणशब्दस्य सूत्रविषयत्वं व्यवच्छेत्तुं वृत्तिविशेषणं प्राणस्यापाने प्रतिष्ठितत्वं व्यतिरेकद्वारा स्फोरयति। सापीति॥ प्राणापानयोरुभयोरपि व्यानाधीनत्वं साधयति। साप्यपानेति॥ तिसृणां वृत्तीनामुक्तानामुदाने निबद्धत्वं दर्शयति। सर्व्वा इति। विष्वङ्ङिति नानागतित्वोक्तिः॥ कस्मिन्हृदयमित्यादेः समानान्तस्य तात्पर्य्यमाह। एतदिति॥ तेषां प्रवर्त्तकं दर्शयति। विज्ञानमयेति॥ स एष इत्यादेस्तात्पर्य्यमाह। सर्व्वमिति॥ यस्य कूटस्थदृष्टिमात्रस्यान्तर्यामित्वकल्पनाधिष्ठानस्याज्ञानवशात्स्वशासने

उ० व्यानः प्रतिष्ठित इत्युदान इति कस्मिन्नुदानः प्रतिष्ठित इति समान इति स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्य्यतेऽसङ्गो न हि सज्यतेऽसितो न व्यथते न रिष्यति ।

भा० तिष्ठाः सङ्घातेन नियता वर्त्तन्ते विज्ञानमयार्थप्रयुक्ता इति । सर्व्वमेतद्येन नियतं यस्मिन्प्रतिष्ठितमाकाशान्तमोतञ्च प्रोतञ्च तस्य निरुपाधिकस्य साक्षादपरोक्षाद्ब्रह्मणो निर्द्देशः कर्त्तव्य इत्ययमारम्भः । स एष । स यो नेति नेतीति निर्द्दिष्टो मधुकाण्ड एष सः । सोऽयमात्माऽगृह्यो न गृह्यः । कथं । यस्मात् सर्व्वकार्य्यधर्म्मातीतस्तस्मादगृह्यः । कुतो यस्मान्न हि गृह्यते । यद्धि करणगोचरं व्याकृतं वस्तु तद्ग्रहणगोचरमिदन्तु तद्विपरीतमात्मतत्त्वं । तथाऽशीर्य्यो यद्धि मूर्त्तं संहतं शरीरादि तच्छीर्य्यतेऽयन्तु तद्विपरीतोऽतो न हि शीर्य्यते । असङ्गोऽमूर्त्तो मूर्त्तान्तरेण यः सम्बध्यमानः सज्यतेऽयञ्च तद्विपरीतोऽतो न हि सज्यते । तथाऽसितः अबद्धो यद्धि मूर्त्तं तद्बध्यते । इदन्तु तद्वि-

---

आ० द्यावापृथिव्यादि स्थितं स परमात्मैव प्रत्यगात्मैवेतिपदयोरर्थं विवक्षित्वाह । स एष इति ॥ निषेधद्वयं मूर्त्तामूर्त्तब्राह्मणे व्याख्यातमित्याह । स यो नेति । यो मधुकाण्डे चतुर्थे नेति नेतीति निषेधमुखेन निर्दिष्टः स एष कूर्चब्राह्मणे तन्मुखेनैव वक्ष्यत इति योजना ॥ निषेधद्वारा निर्दिष्टमेव स्पष्टयति । सोऽयमिति । कार्य्यधर्म्माः शब्दादयोऽशनादयश्च ॥ श्रुत्युक्तं हेतुमवतार्य्य व्याचष्टे । कुत इत्यादिना । तद्विपरीतत्वं करणगोचरत्वं न चक्षुषेत्यादिश्रुतेः

उ॰ एतान्यष्टावायतनान्यष्टौ लोका अष्टौ देवा अष्टौ पुरुषाः स यस्तान्पुरुषान्निरुह्य प्रत्युह्यात्य-

---

भा॰ परीतत्वादबद्धत्वान्न व्यथतेऽतो न रिष्यति। ग्रहणशरणसङ्गबन्धकार्य्यधर्म्मरहितत्वान्न रिष्यति। न हिंसामापद्यते न विनश्यतीत्यर्थः। क्रममतिक्रम्यौपनिषदस्य पुरुषस्याख्यायिकातोऽपसृत्य श्रुत्या स्वेन रूपेण त्वरया निर्देशः कृतः॥

ततः पुनराख्यायिकामेवाश्रित्याह। एतानि यान्युक्तान्यष्टावायतनानि पृथिव्येव यस्यायतनमित्येवमादीनि अष्टौ लोका अग्निलोकादयोऽष्टौ देवा अमृतमिति होवाचेत्येवमादयोऽष्टौ पुरुषः शारीरः पुरुष इत्यादयः। स यः कश्चित्तान् पुरुषान् शारीरप्रभृतीन्निरुह्य निश्चयेनोह्य गमयित्वाष्टचतुष्कभेदेन लोकस्थितिमुपपाद्य पुनः प्राचीदिग्द्वारेण प्रत्यूह्य स्वात्मनि हृदयेऽत्यक्रामदतिक्रान्तवानुपाधिधर्म्मं हृदयाद्यात्मत्वं स्वेनैवात्मना व्यवस्थितो

व्या॰ तद्विपरीतत्वादमूर्त्तत्वादिति यावत्॥ पूर्व्वत्राप्युभयत्र तद्वैपरीत्यमेतदेवातःशब्दार्थं स्फुटयन्नुक्तमुपपादयति। ग्रहणेति। कार्य्यधर्म्माः शब्दादयोऽशनादयश्च प्रागुक्ताः॥ ननु शाकल्ययाज्ञवल्क्ययोः संवादात्मिकेयमाख्यायिका तत्र कथं शाकल्येनापृष्टमात्मानं याज्ञवल्क्यो व्याचष्टे तत्राह। क्रममिति॥

विज्ञानादिवाक्ये वक्ष्यमाणत्वात्किमित्यत्र निर्देश इत्याशङ्क्याह। त्वरयेति॥ एतान्यष्टावित्यादिवाक्यस्य पूर्व्वेणासङ्गतिमाशङ्क्याह। ततः पुनरिति॥ निश्चयेन गमयित्वेत्येतदेव स्पष्टयति। व्यष्टाविति॥ प्रत्यूह्योपसंहृत्येति यावत्॥ औपनिषदत्वं पुरुषस्य

उ० त्वामनन्त्वौपनिषदं पुरुषं पृच्छामि तञ्चेन्मे न विवक्ष्यसि मूर्द्धा ते विपतिष्यतीति । तꣳह न मेने शाकल्यस्तस्य ह मूर्द्धा विपपातापि हास्य परिमोषिणोऽस्थीन्यपजह्रुरन्यन्मन्यमानाः ॥ २६ ॥

भा० य औपनिषदः पुरुषोऽशनायादिवर्जित उपनिषत्स्वेव विज्ञेयो नान्यप्रमाणगम्यस्तं त्वा त्वां विद्याभिमानिनं पुरुषं पृच्छामि। तञ्चेद्यदि मे न विवक्ष्यसि विस्पष्टं न कथयिष्यसि मूर्द्धा ते विपतिष्यतीति । तन्त्वौपनिषदं पुरुषं शाकल्यो न मेने ह न विज्ञातवान् किल। तस्य ह मूर्द्धा विपपात विपतितः । समाप्ताख्यायिका । श्रुतेर्वचनं तं ह न मेने इत्यादि । किञ्चापि हास्य परिमोषिणस्तस्करा अस्थीन्यपि संस्कारार्थं शिष्यैर्नीयमानानि गृहान्प्रत्यपजह्रुरपहृतवन्तः। किं निमित्तमन्यद्धनं नीयमानं मन्यमानाः । पूर्ववृत्ता ह्याख्यायिकेह सूचिताष्टाध्याय्यां किल शाकल्येन । याज्ञवल्क्यस्य समानान्त एव संवादो निर्वृत्तः। तत्र

आ० व्युत्पादयति। उपनिषत्स्वेवेति ॥ तं हेत्यादिना याज्ञवल्क्यस्य वा मध्यमस्य वा वाक्यमिति शङ्कां वारयति। समाप्तेति ॥ ब्रह्मविद्विद्वेषे परलोकविरोधोऽपि स्यादित्याह। किञ्चेति ॥ मूर्द्धा ते विपतिष्यतीति मूर्ध्नि पतिते न्यायेन किमित्यग्निहोत्राग्निसंस्कारमपि शाकल्यो न प्राप्तवानित्याशङ्क्याह। पूर्ववृत्तेति ॥ तामेवाख्यायिकामनुक्रामति। अष्टाध्याय्यामिति। अष्टाध्यायी बृहदारण्यकात्प्राचीना कर्म्मविषया। पुरे पुण्यक्षेत्रातिरिक्ते देशेऽतिथौ पण्यतिथिशून्ये कालेऽस्थीनि च। नेति च न शब्दोऽप्यर्थः। उप-

उ० अथ होवाच ब्राह्मणा भगवन्तो यो वः कामयते स मा पृच्छतु सर्व्वे वा मा पृच्छत. यो वः कामयते

भा० याज्ञवल्क्येन शापो दत्तः। पुरेऽतिथ्ये मरिष्यसि। न तेऽस्थीनि च गृहान्प्राप्स्यन्तीति स तथैव ममार। तस्य ह्यप्यन्यन्मन्यमानाः परिमोषिणोऽस्थीन्यपजह्रुः। तस्मान्नोपवादी स्याद्युत ह्येवंवित्परो भवतीति। सैषाख्यायिकाऽऽचारार्थं सूचिता। विद्या स्तुता ॥ २६ ॥

यस्येह। यस्य नेति नेत्यन्यप्रतिषेधद्वारेण ब्रह्मणो निर्देशः कृतस्तस्य विधिमुखेन कथं निर्देशः कर्त्तव्य इति पुनराख्यायिकामेवमित्याश्रित्याह मूलञ्च जगतो वक्तव्यमिति। आख्यायिकासम्बन्धस्तु ब्रह्मविदो ब्राह्मणान् जित्वा गोधनं हर्तव्यमिति न्यायं मत्वाह ॥ अथ होवाच। अथाऽनन्तरं तूष्णींभूतेषु ब्राह्मणेषु ह उवाच। हे ब्राह्मणाः भगवन्त इत्येवं सम्बोध्य यो वो युष्माकं मध्ये कामयते

आ० वादी परिभवकर्त्ता ॥ तच्छब्दार्थमाह। उत हीति। किमितीयमाख्यायिकात्र विद्याप्रकरणे सूचितेत्याशङ्क्याह। सैषेति ॥ ब्रह्मविदि विनीतेन भवितव्यमित्याचारः। महती ह्ययं ब्रह्मविद्या। यत्तन्निष्ठावज्ञायामैहिकामुष्मिकविरोधः स्यादिति विद्यास्तुतिः ॥ २६ ॥

अथ हेत्याद्युत्तरग्रन्थमवतारयति। यस्येत्यादिना ॥ जगतो मूलस्य वक्तव्यमित्याख्यायिकामेवाश्रित्याहेति सम्बन्धः ॥ आख्यायिका किमर्थेत्यत आह। आख्यायिकेति ॥ इतिशब्दः सम्बन्धसमाप्त्यर्थः ॥ ननु ब्राह्मणेषु तूष्णीम्भूतेषु प्रतिषेद्धुरभावाद्गोधनं हर्त्तव्यं किमिति तान्प्रति याज्ञवल्क्योऽवदीदित्यत आह। न्यायं

उ० तं वः पृच्छामि सर्वान्वा वः पृच्छामीति ते ह ब्राह्मणा न दधृषुः ॥ २७ ॥

तान् हैतैः श्लोकैः पप्रच्छ । यथा वृक्षो वनस्पतिस्तथैव पुरुषोऽमृषा । तस्य लोमानि पर्णानि

भा० इच्छति याज्ञवल्क्यं पृच्छामीति स मा मामागत्य पृच्छतु । सर्व्वे वा मा पृच्छत । सर्व्वे वा यूयं मा मां पृच्छत । यो वः कामयते याज्ञवल्क्यो मां पृच्छत्विति तं वः पृच्छामि । सर्व्वान्वा वो युष्मानहं पृच्छामि । ते ह ब्राह्मणा न दधृषुस्ते ब्राह्मणा एवमुक्ता अपि न प्रगल्भाः संवृत्ताः किञ्चिदपि प्रत्युत्तरं वक्तुं ॥ २७ ॥

तेष्वप्रगल्भभूतेषु ब्राह्मणेषु तान् ह एतैर्वक्ष्यमाणैः श्लोकैः पप्रच्छ पृष्टवान् । यथा लोके वृक्षो वनस्पतिः । वृक्षस्य विशेषणं वनस्पतिरिति । तथैव पुरुषोऽमृषा । अमृषा सत्यमेतत् । तस्य लोमानि । तस्य पुरुषस्य लोमानीतरस्य वनस्पतेः पर्णानि । त्वगस्योत्पाटिका । वहिस्त्वक् अस्य पुरुषस्येतर-

---

आ० मत्वेति । ब्रह्मस्वं हि ब्राह्मणानुमतिमनापाद्य नीयमानमनर्थाय स्यादित्यभिप्रायः । सम्बोध्योवाचेति सम्बन्धः ॥ यो व इति प्रतीकमादाय व्याचष्टे । युष्माकमिति । व्याख्यातभागमनूद्य व्याख्येयमादाय व्याकरोति । यो व इत्यादिना ॥ यथोक्तप्रश्नानन्तरं ब्राह्मणानामप्रतिभां दर्शयति । ते हेति ॥ २७ ॥

स्वकीयज्ञानप्रकर्षप्रकटनार्थमेव प्रश्नान्तरमवतारयति । तेष्विति ॥ वृक्षो वनस्पतिरिति पर्य्यायत्वात्पुनरुक्तिरित्याशङ्क्याह । वृक्षस्येति । तच्च तस्य महत्त्वमाहेत्यपौनरुक्तिः । पुरुषस्य

उ॰ त्वगस्योत्पाटिका बहिः ॥ त्वच एवास्य रुधिरं प्रस्यन्दि त्वच उत्पटः । तस्मात्तदातृणात्प्रैति रसो वृक्षादिवाहतात् ॥ माꣳसान्यस्य शकराणि किनाटꣳ स्नावतत्स्थिरं । अस्थीन्यन्तरतो दारूणि

भा॰ सोत्पाटिका वनस्पतेस्त्वच एव सकाशादस्य पुरुषस्य रुधिरं प्रस्यन्दि वनस्पतेः । त्वच उत्पटस्त्वच एवोत्स्फुटति । यस्मादेवं सर्व्वं समानमेव वनस्पतेः पुरुषस्य च तस्मात्तदाहताद्धिंसिताप्रैति तद्रुधिरं निर्गच्छति वृक्षादिवाहताच्छिन्नाद्रसः । एवं मांसान्यस्य पुरुषस्य वनस्पतेस्तानि शकराणि शकलानीत्यर्थः । किनाटं । वृक्षस्य किनाटं नाम शकलेभ्योऽभ्यन्तरं वल्कलरूपं काष्ठसंलग्नं तत्स्नाववत्पुरुषस्य तत्स्थिरं तत्किनाटं स्नाववद्दृढं हि तत् । अस्थीनि । पुरुषस्य स्नाम्नोऽभ्यन्तरतोऽस्थीनि भवन्ति । तथा किनाटस्याभ्यन्तरतो दारूणि काष्ठानि । मज्जा । मज्जैव वनस्पतेः पुरुषस्य च मज्जोपमा कृता । मज्जाया उपमा मज्जोपमा

था॰ वृक्षसाधर्म्यमेतदित्युच्यते ॥ साधर्म्यमेव स्पष्टयति । तस्येत्यादिना । नीरसा त्वगुत्पाटिकेत्युच्यते । उत्पटो वृक्षनिर्यासः ॥ विशेषाभावमेवाभिनयति । यथेति ॥ साधर्म्ये सति वैधर्म्यं वक्तुमशक्यमित्याशयेनाह । यद्यदीति ॥ इदमपि साधर्म्यमेव किं न स्यादित्याशङ्क्याह । यदेति ॥ तस्मादिति । एतस्माद्विशेषणात्प्राग्यद्विशेषणमुक्तं तत्सर्व्वमुभयोः सामान्यमवगतमिति सम्बन्धः ॥ वृक्णस्याङ्गस्येति शेषः । मा भूत्तस्य प्ररोहणमिति चेन्नेत्याह । भवितव्यस्येति । ध्रुवं जन्म मृतस्य चेतीत्यर्थः ॥ जीवतो हि रेतो जायते स एव

उ० मज्जामज्जोपमा कृता ॥ यद्वृक्षो वृक्णो रोहति मूलान्नवतरः पुनः । मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति ॥ रेतस इति मा वोचत जीवतस्तत्प्रजायते । धानारुह इव वै वृक्षोऽञ्जसा

भा० नान्यो विशेषोऽस्तीत्यर्थः ॥ यथा वनस्पतेर्मज्जा तथा पुरुषस्य यथा पुरुषस्य तथा वनस्पतेः । यद्यदि वृक्षो वृक्णश्छिन्नो रोहति पुनः प्ररोहति प्रादुर्भवति मूलात्पुनर्नवतरः पूर्व्वस्मादभिनवतरो यदेतस्माद्विशेषणात्प्राग्वनस्पतेः पुरुषस्य च सर्व्वं सामान्यमवगतं । अयन्तु वनस्पतौ विशेषो दृश्यते यच्छिन्नस्य प्ररोहणं । न तु पुरुषे मृत्युना वृक्णे पुनः प्ररोहणं दृश्यते । भवितव्यञ्च कुतश्चित्प्ररोहणेन । तस्माद्वः पृच्छामि मर्त्त्यो मनुष्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति मृतस्य पुरुषस्य कुतः प्ररोहणमित्यर्थः । यदि चेदेवं वदथ रेतसः प्ररोहतीति मा वोचत मैवं वक्तुमर्हत । कस्माद्यस्माज्जीवतः पुरुषात्तद्रेतः प्रजायते न मृतात् ।

आ० कुतो भवतीति विचार्य्यते । न चासिद्धेन सिद्धस्य साधनं न च पुरुषान्तरादिति वाच्यं एकासिद्धावन्यतरप्रयोगानुपपत्तेरिति मन्वानो हेतुमाह । यस्मादिति ॥ वैधर्म्यान्तरमाह । अपि चेति ॥ काण्डरुहोऽपीत्यपेरर्थः । वैशब्दः प्रसिद्धिद्योतक इत्यभिप्रेत्याह । वै वृक्ष इति ॥ अञ्जसेत्यादेरर्थमुक्त्वा वाक्यार्थमाह । धानातोऽपीति ॥ तथापि कथं वैधर्म्यमित्याशङ्क्याह । यद्यदीति ॥ पुरुषस्यापि पुनरुत्पत्तिर्मा भूदित्याशङ्क्य पूर्व्वोक्तं निगमयति तस्मादिति ॥ स्वभाववादमुत्थापयति । जात इति ॥ शब्दस्वाद्य

उ॰ प्रेत्यसम्भवः ॥ यत्समूलमावृहेयुर्वृक्षं न पुनराभवेत्। मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति ॥ जात एव न जायते कोऽन्वेनं जनयेत्पुनः। विज्ञानमानन्दं ब्रह्म रातिर्दातुः

भा॰ अपि च धानारुहो धानाबीजं बीजरुहोऽपि वृक्षो भवति न केवलं काण्डरुह एव। इवशब्दोऽनर्थकः। वै वृक्षोऽञ्जसा साक्षात्प्रेत्य मृत्वा सम्भवो धानातोऽपि प्रेत्य सम्भवो भवेदञ्जसा पुनर्वनस्पतेः। यद्यदि सह मूलेन धानया वोद्वृहेयुरुद्यच्छेयुरुत्पाटयेयुर्वृक्षं न पुनराभवेत्पुनरागत्य न भवेत्तस्माद्वः पृच्छामि। सर्व्वस्यैव जगतो मूलं मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति जात एवेति मन्यध्वं यदि किमत्र प्रष्टव्यमिति। जनिष्यतो हि सम्भवः प्रष्टव्यो न जातस्यायं तु जात एवातोऽस्मिन्विषये प्रश्न एव नोपपद्यत इति चेत्। न। किन्तर्हि मृतः पुनरपि जायत एवान्यथाऽकृताभ्यागमकृतनाशप्रसङ्गात्। अतो वः पृच्छामि कोऽन्वेनं

व्या॰ समाप्त्यर्थः॥ तदेव स्फुटयति॥ जनिष्यतो हीति॥ न जायत इति भागेनोत्तरमाह। नेत्यादिना॥ स्वभाववादे दोषमाह। अन्यथेति॥ स्वभावासम्भवे फलितमाह। अत इति॥ उक्तमेव स्फुटयति। जगत इति॥ ब्रह्मविदां श्रेष्ठत्वे याज्ञवल्क्यस्य सिद्धे फलितमाह। अत इति॥ समाप्ताख्यायिकेति॥ ब्राह्मणाश्च सर्व्वे यथायथं जग्मुरित्यर्थः॥ विज्ञानादिवाक्यमुत्थापयति। यज्जगत इत्यादिना॥ विज्ञानशब्दस्य करणादिविषयत्वं वारयति। विज्ञ-

उ॰ परायणं । तिष्ठमानस्य तद्विद इति ॥ २८ ॥
नवमं ब्राह्मणं ॥ ९ ॥ इति बृहदारण्यके पञ्चमोऽध्यायः । उपनिषत्सु तृतीयोऽध्यायः ॥ ५ ॥

भा॰ मृतं पुनर्जनयेत्। तन्न विजज्ञुर्ब्राह्मणा यतो मृतः पुनः प्ररोहति जगतो मूलं न विज्ञातं ब्राह्मणैः । अतो ब्रह्मिष्ठत्वात् हृता गावो याज्ञवल्क्येन जिता ब्राह्मणाः। समाप्ताख्यायिका॥ यज्जगतो मूलं येन च शब्देन साक्षाद्व्यपदिश्यते ब्रह्म । यद्याज्ञवल्क्यो ब्राह्मणान्पृष्टवान् ततः स्वेन रूपेण श्रुतिरस्मभ्यमाह । विज्ञानं विज्ञप्तिर्विज्ञानं तच्चानन्दं न विषयविज्ञानवद्दुःखानुविद्धं । किन्तर्हि प्रसन्नं शिवमतुलमनायासं नित्यतृप्तमेकरसमित्यर्थः । किन्तद्ब्रह्मोभयविशेषणवद्रातिः रातेः षष्ठ्यर्थे प्रथमा धनस्येत्यर्थो धनस्य दातुः कर्म्मकृतो यजमानस्य परमयनं परागतिः कर्म्मफलस्य प्रदातृत्वात् । किञ्च व्युत्थायैषणाभ्यस्तस्मिन्नेव ब्रह्मणि तिष्ठत्यकर्म्मकृत्त-

---

व्या॰ प्तिरिति ॥ आनन्दविशेषणकृत्यं दर्शयति । नेत्यादिना ॥ प्रसन्नं दुःखहेतुकामक्रोधादिना सम्बन्धरहितं शिवं कामादिकारणेनाज्ञानेनापि सम्बन्धशून्यं सातिशयत्वप्रयुक्तदुःखराहित्यमाह । अतुलमिति ॥ साधनसाध्यत्वाधीनदुःखवैधुर्य्यमाह । अनायासमिति ॥ दुःखनिवृत्तिमात्रं सुखमिति पक्षं प्रतिक्षिपति । नित्यतृप्तमिति ॥ आनन्दो ज्ञानमिति ब्रह्मण्याकारभेदमाशङ्क्याह । एकरसमिति ॥ फलमत उपपत्तेरिति न्यायेन ब्रह्मणो जगन्मूलत्वमाह । रातेरित्यादिना ॥ ब्रह्मसंस्थोऽमृतत्वमेतीति श्रुत्यन्तर-

भा॰ ब्रह्म वेत्तीति तद्विच तस्य तिष्ठमानस्य च तद्विदो ब्रह्मविद इत्यर्थः परायणमिति ॥ २८ ॥

अत्रेदं विचार्य्यते । आनन्दशब्दो लोके सुखवाची प्रसिद्धः । अत्र च ब्रह्मणो विशेषणत्वेन आनन्दशब्दः । श्रूयते आनन्दं ब्रह्मेति । श्रुत्यन्तरे चानन्दो ब्रह्मेति व्यजानात् । आनन्दं ब्रह्मणो विद्वान् । यदेष आकाश आनन्दः । यो वै भूमा तत्सुखमिति च । एष परमानन्द इत्येवमाद्याः संवेद्ये च सुख आनन्दशब्दः प्रसिद्धः । ब्रह्मानन्दश्च यदि संवेद्यः स्याद्युक्ता एते ब्रह्मण्यानन्दशब्दाः । ननु च श्रुतिप्रामाण्यात्संवेद्यानन्दस्वरूपमेव ब्रह्म किं तत्र विचार्य्यमिति । न । विरुद्धश्रुतिवाक्यदर्शनात् । सत्यमानन्दशब्दो ब्रह्मणि श्रूयते विज्ञानप्रतिषेधश्चैकत्वे । यत्र त्वस्य सर्व्वमात्मैवाभूत्तत्केन कं पश्येद्विजानीयात्तं केन विजानीयाद्यत्र नान्यत्पश्यति नान्यद्विजानाति । प्राज्ञेनात्मना सम्परिष्वक्तो न

व्या॰ माश्रित्य तस्यैव मुक्तानित्यप्राप्तत्वमुपदिशति । किञ्चेति । ग्रन्थव्याख्यानसमाप्तिरितिशब्दः ॥ २८ ॥

सच्चिदानन्दात्मकं ब्रह्म विद्याविद्याभ्यां बन्धमोक्षास्पदमित्युक्तं । इदानीं ब्रह्मानन्दविचारमवतारयन्नविगीतमर्थमाह । अत्रेति ॥ तथापि प्रकृते वाक्ये किमायातमिति तदाह । अत्रेति ॥ न च केवलमत्रैवानन्दशब्दो ब्रह्मविशेषणार्थकत्वेन श्रुतः । किन्तु तैत्तिरीयकादावपीत्याह । श्रुत्यन्तरे चेति ॥ ब्रह्मविशेषणत्वेनानन्दशब्दः श्रूयत इति सम्बन्धः ॥ अन्याः श्रुतीरुदाहरति । आनन्द इत्यादिना ॥ एवमाद्याः श्रुतय इति शेषः । तथापि कथं विचारसिद्धिस्तत्राह । संवेद्य इति ॥ लोकप्रसिद्धेरद्वैतश्रुतेश्च

भा॰ वाह्यं किं च न वेदेत्यादिविरुद्धश्रुतिवाक्यदर्शनात्तेन कर्त्तव्यो विचारः ॥

तस्माद्युक्तं वेदवाक्यार्थनिर्णयाय विचारयितुं । मोक्ष-वादिविप्रतिपत्तेश्च । साङ्ख्या वैशेषिकाश्च मोक्षवादिनो नास्ति मोक्षे सुखं संवेद्यमित्येवं प्रतिपन्नाः । अन्ये निरति-शयसुखं स्वसंवेद्यमिति । किन्तावद्युक्तमानन्दादिश्रवणाद् जक्षन्क्रीडन्रममाणः स यदि पितृलोककामो भवति । स सर्व्वज्ञः सर्व्ववित् । सर्व्वान् कामान्समश्नुत इत्यादिश्रुतिभ्यो मोक्षे सुखं संवेद्यमिति । नन्वेकत्वे कारकविभागाभावा-

---

व्या॰ ब्रह्मण्यानन्दः संवेद्योऽसंवेद्यो वेति विचारः कर्त्तव्य इत्यर्थः ॥ उभयत्र फलं दर्शयति । ब्रह्मानन्दश्चेति ॥

अन्यथा लोकवेदयोः शब्दार्थभेदादविशिष्टस्तु वाक्यार्थ इति न्यायविरोधोऽसंवेद्यत्वं पुनरद्वैतश्रुतिर्विरुद्धेति भावः ॥ विचा-रमाक्षिपति । नन्विति ॥ विरुद्धश्रुत्यर्थनिर्णयार्थं विचारक-र्त्तव्यतां दर्शयति नेति ॥ सङ्ग्रहवाक्यं विवृणोति । सत्यमित्या-दिना ॥ एकत्वे सति विज्ञानप्रतिषेधश्रुतिमेवोदाहरति । यत्रे-त्यादिना । इत्यादिश्रवणमिति शेषः ॥ फलितमाह । विरुद्धश्रु-तीति ॥ श्रुतिविप्रतिपत्तेर्विचारकव्यतामुपसंहरति । तस्मादिति ॥ तत्रैव हेत्वन्तरमाह । मोक्षेति ॥ तामेव विप्रतिपत्तिं विवृ-णोति । साङ्ख्या इति ॥ विमर्शपूर्व्वकं पूर्व्वपक्षं गृह्णाति । किन्ता-वदित्यादिना ॥ आनन्दादिश्रवणाद्विज्ञानमानन्दं ब्रह्मेति श्रुते-र्मोक्षे सुखं संवेद्यमिति युक्तमिति सम्बन्धः ॥ तत्रैव वाक्यान्तरा-ण्युदाहरति । जक्षन्नित्यादिना ॥ पूर्व्वपक्षमाक्षिपति । नन्विति ॥ मोक्षे चेदिष्यते सुखज्ञानं तर्हि तदानेककारकसाध्यं वाच्यं क्रियात्वात्पाकादिवत्सर्व्वैकत्वे च मोक्षे कारकविभागाभावान्न सुखसंवेदनं भवतीत्यर्थः ॥ जन्यस्य कारकापेक्षायामपि सुखज्ञा-नस्याजन्यत्वान्न तदपेक्षेत्याशङ्क्याह । क्रियायाश्चेति ॥ या क्रिया

भा० दिज्ञानानुपपत्तिः। क्रियायाश्चानेककारकसाध्यत्वाद्वि-ज्ञानस्य च क्रियात्वात्। नैष दोषः। शब्दप्रामाण्याद्भवेद्विज्ञानमानन्दविषये। विज्ञानमानन्दमित्यादीन्यानन्दस्वरूपस्यासंवेद्यत्वेऽनुपपन्नानि वचनानीत्यवोचाम। ननु वचनेनाप्यग्नेः शैत्यमुदकस्य चौष्ण्यं न क्रियत एव ज्ञापकत्वाद्वचनानां। न च देशान्तरेऽग्निः शीत इति शक्यते ज्ञापयितुमगम्ये वा देशान्तर उष्णमुदकमिति। न प्रत्यगात्मन्यानन्दविज्ञानदर्शनान्न विज्ञानमानन्दमित्येवमादीनां वचनानां। शीतोऽग्निरित्यादिवाक्यवत् प्रत्यक्षा-

---

व्या० सानेककारकसाध्येति व्याप्तेर्गमनादाववगतत्वज्ञानस्यापि धात्वर्थेन क्रियात्वादनेककारकसाध्यतासिद्धेरित्यर्थः॥ श्रुतिप्रामाण्यमाश्रित्य पूर्ववादी परिहरति। नैष दोष इति॥ तदेव स्फुटयति। विज्ञानमिति॥ अद्वये ब्रह्मणि श्रुतिप्रामाण्यादानन्दज्ञानमुक्तमाक्षिपति। नन्विति॥ अद्वैतश्रुतिविरोधाद्ब्रह्मणि विज्ञानक्रियाकारकविभागापेक्षा नोपपद्यते। न हि विज्ञानमानन्दमित्यादिवचनानि मानान्तरविरोधेन विज्ञानक्रियां ब्रह्मण्युत्पादयन्ति। तेषां ज्ञापकत्वाज्ज्ञापकस्य चाविरोधापेक्षत्वादन्यथातिप्रसङ्गादित्यर्थः। लौकिकज्ञानस्य क्रियात्वेऽपि मोक्षे सुखज्ञानं क्रियैव न भवति॥ तत्र विज्ञानादिवाक्यस्याद्वैतश्रुतिविरोधोऽस्तीत्याशङ्क्याह। न चेति॥ पयःपावकयोः सार्वत्रैकरूप्यवद्विज्ञानस्यापि लोकवेदयोरेकरूपत्वमेवेति भावः॥ मानान्तरविरोधादात्मन्यानन्दज्ञानस्य सत्त्वमेव वा निषिध्यन्ते। तस्य क्रियात्वं वा निराक्रियते। तत्राद्यं दूषयति। नेत्यादिना॥ तदेव स्पष्टयति। न विज्ञानमिति॥ सुखज्ञानस्य गुणत्वाङ्गीकारात् क्रियात्वनिराकरणमिष्टमेवेति मत्वाह। अनुभूयते त्विति॥ अनुभवमेवाभिनयति। सुखमहमिति॥ तथापि श्रुतिविरोधः स्यादित्याशङ्क्य प्रत्यक्षानुसारेण साधि नेतव्येत्याशयेनाह। तस्मादिति॥ आत्म-

भा० दिविरुद्धार्थप्रतिपादकत्वं । अनुभूयते त्वविरुद्धार्थता । सुख्यहमिति सुखात्मकमात्मानं स्वयमेव वेदयते । तस्मात्सुतरां प्रत्यक्षा विरुद्धार्थता । तस्मादानन्दं ब्रह्मविज्ञानात्मकं सत्त्वयमेव वेदयते ॥

तथानन्दप्रतिपादकाः श्रुतयः समञ्जसाः स्युर्जक्षन्क्रीडन्नममाण इत्येवमाद्याः पूर्व्वोक्ताः । न । कार्य्यकारणाभावेऽनुपपत्तेर्विज्ञानस्य । शरीरवियोगो हि मोक्ष आत्यन्तिकः । शरीराभावे च करणानुपपत्तिराश्रयाभावात् । ततश्च विज्ञानानुपपत्तिरकार्य्यकरणत्वात् । देहाद्यभावे च विज्ञानोत्पत्तौ सर्व्वेषां कार्य्यकरणोपादानानर्थक्यप्रसङ्गः । एकत्वविरोधाच्च । परश्चेत् ब्रह्मानन्दात्मकमात्मानं नित्य-

---

व्या० न्यानन्दज्ञानस्य क्रियात्वानङ्गीकारात्कारकभेदापेक्षाभावादित्यर्थः ॥ गुणत्वपक्षे च प्रत्यक्षस्यानुगुणत्वादागमस्य विरोधिनस्तदनुसारेण नेयत्वादविरुद्धत्वादस्य भूयस्त्वादित्यतिशयः । त्वविरुद्धार्थता विज्ञानादिश्रुतेरिति शेषः । गुणगुणिभावेऽपि नाद्वैतश्रुतिः शक्या नेतुमित्याशङ्क्य स्ववेद्यत्वपक्षमाश्रित्याह । तस्मादानन्दमिति॥

यथा कथञ्चिद्ब्रह्मण्यानन्दस्य वेद्यत्वे श्रुतीनामानुगुण्यमस्तीत्याह । तथेति ॥ आनन्दो वेद्यो ब्रह्मणेति चोदिते सिद्धान्तमाह । नेति ॥ आगन्तुकमनागन्तुकं वा ज्ञानं मुक्तावानन्दं गोचरयति नाद्य इत्याह ॥ कार्य्येति ॥ अनुपपत्तिमेव स्फोरयति । शरीरेति॥ कार्य्यकरणयोरभावेऽपि मोक्षे ब्रह्मानन्दज्ञानं जनिष्यते संसारे हि हेत्वपेक्षेत्याशङ्क्याह । देहादीति ॥ द्वितीयं दूषयति । एकत्वेति ॥ न हि ब्रह्मस्वरूपज्ञानेनैव वेद्यानन्दरूपं भवितुमुत्सहते ॥ विषयविषयिणोरेकत्वविरोधात्ततश्चानागन्तुकमपि ज्ञानं मुक्तौ नानन्दमधिकरोतीत्यर्थः ॥ किञ्च ब्रह्म वा मुक्तो वा संसारी वा ब्रह्मानन्दं गोचरयेत्तत्राद्यमनुवदति । परश्चेदिति ॥ तस्मि-

भा॰ विज्ञानत्वान्नित्यमेव विजानीयात्। तत्र संसार्य्यपि संसारविनिर्मुक्तः स्वाभाव्यं प्रतिपद्येत। जलाशय इवोदकाञ्जलिः क्षिप्तो न पृथक्त्वेन व्यवतिष्ठते। आनन्दात्मकब्रह्मविज्ञानाय। तदा मुक्त आनन्दात्मकमात्मानं वेदयत इत्येतदनर्थकं वाक्यं। अथ ब्रह्मानन्दमन्यः सन्मुक्तो वेदयते प्रत्यगात्मानन्दं वाहमस्म्यानन्दस्वरूप इति। तदैकत्वविरोधः। तथा च सति सर्व्वश्रुतिविरोधः। तृतीया च कल्पना नोपपद्यते। किञ्चान्यद्ब्रह्मणश्च निरन्तरात्मानन्दविज्ञाने विज्ञानाविज्ञानकल्पनानर्थक्यं निरन्तरश्चेदात्मानन्दविषयं ब्रह्मणो विज्ञानं तदेव तस्य स्वभाव इत्यात्मानन्दं विजानातीति कल्पनानुपपन्ना। अतद्विज्ञानप्रसङ्गे हि

आ॰ न्यत्तो न ब्रह्मस्वरूपानन्दं वेत्ति। तेनैक्यादेकत्र विषयविषयित्वानुपपत्तेरुक्तत्वादिति दूषयति। तत्रेति॥ नापि संसारी ब्रह्मानन्दं गोचरयति। स खल्वनिवृत्ते संसारे संसारिणमात्मानमभिमन्यमानो न ब्रह्मानन्दमाकलयितुमलं। संसारे निवृत्ते तु ततो विनिर्मुक्तो ब्रह्मस्वाभाव्यं प्रतिपद्यमानस्तदानन्दं तद्वदेव विषयीकर्त्तुं नार्हतीति तृतीयं प्रत्याह। संसार्य्यपीति॥ मुक्तोऽपि ब्रह्मणो भिन्नोऽभिन्नो वेति विकल्प्याभेदपक्षमनुभाषते। जलेति॥ ब्रह्माभिन्नस्य मुक्तस्य तदानन्दविषयीकरणमुक्तन्यायेन निरस्यति। तदेति॥ भेदपक्षमनुवदति। अथेति॥ ब्रह्मानन्दं प्रत्यगात्मानमिति सम्बन्धः॥ वेदनप्रकारमभिनयति। अहमिति॥ तत्त्वमस्यादिश्रुतिविरोधेन निराकरोति। तदेति॥ मुक्तो ब्रह्मणः सकाशाद्भिन्नोऽभिन्नो वा मा भूद्भिन्नाभिन्नस्तु स्यादित्याशङ्क्याह। तृतीयेति॥ सर्व्वत्र भेदाभेदवादस्य दूषितत्वादित्यर्थः॥ ब्रह्मणः स्वानन्दस्यावेद्यत्वे हेत्वन्तरमाह। किञ्चान्यदिति॥ तदेवोपपादयति। निरन्तरश्चेदिति॥ आख्यातप्रयोगस्य तर्हि कन्नर्थवत्त्वं तत्राह।

भा० कल्पनाया अर्थवत्त्वं । यथात्मानं परञ्च वेत्तीति । न हि इत्याद्याश्रमनसो नैरन्तर्य्येण ज्ञानाज्ञानकल्पनाया अर्थवत्त्वं ॥

अथ विच्छिन्नमात्मानं विजानातीति । विज्ञानस्यात्मविज्ञानच्छिद्रेऽन्यविषयत्वप्रसङ्गे आत्मनश्च क्रियावत्त्वं । ततश्चानित्यत्वप्रसङ्गः । तस्माद्विज्ञानमानन्दमिति स्वरूपान्वाख्यानपरैव श्रुतिर्नात्मानन्दसंवेद्यत्वार्था । जक्षन्क्रीडन्नित्यादिश्रुतिविरोधोऽसंवेद्यत्व इति चेन्न । सर्व्वात्मैकत्वे यथा प्राप्तानुवादित्वात् । मुक्तस्य सर्व्वात्मभावे सति यत्र क्वचिद्योगिषु देवेषु वा जक्षणादिप्राप्तं तद्यथा प्राप्तमेवा-

---

आ० अतदिच्छानेति । देवदत्तो ह्यबुद्धिपूर्व्वकारित्वावस्थायां स्वात्मानमन्यञ्च विविच्य न जानाति नान्यदित्युभयथात्वदर्शनात्तत्राख्यातप्रयोगो युज्यते नैवं ब्रह्मण्यज्ञानप्रसङ्गोऽस्ति नित्यज्ञानस्वभावत्वात् । तथा च तत्राख्यातप्रयोगो नार्थवानित्यर्थः ॥ ब्रह्मण्याख्यातप्रयोगानर्थक्यं दृष्टान्तेन स्पष्टयति । न हीति ॥

प्रत्यगात्मनि नित्यज्ञानत्वासिद्धिं शङ्कयति । अथेति ॥ विच्छिन्नमिति ॥ क्रियाविशेषणं परिहरति । विज्ञानस्येति ॥ आत्मनो विज्ञानस्य छिद्रमन्तरालमसत्त्वावस्था तदापि विज्ञानमस्ति चेत्तस्यान्यविषयत्वप्रसङ्गस्तथा च यत्रान्यत्पश्यतीत्यादिश्रुतेरात्मनो मर्त्यत्वापत्तिर्न चेत्तदा विज्ञानं तदा पाषाणवदचेतनत्वं विज्ञप्तिरूपत्वानङ्गीकारादित्यर्थः ॥ आत्मनो नित्यज्ञानवत्त्वे दोषान्तरमाह । आत्मनश्चेति ॥ आनन्दज्ञाने ब्रह्मणि विषयविषयित्वायोगस्तेनायं विज्ञानादिवाक्यमित्याशङ्कोपसंहरति । तस्मादिति ॥ ब्रह्मण्यानन्दस्यावेद्यत्वे श्रुतिविरोधमुक्तं स्मारयति । जक्षदिति ॥ सर्व्वत्रात्मनो मुक्तस्यैक्ये सति योग्यादिषु यथा जक्षणादि प्राप्तं तथैव तदनुवादित्वादस्याः श्रुतेर्न विरोधोऽस्तीति परिहरति । नेत्यादिना ॥ तदेव प्रपञ्चयति । मुक्तस्येति ॥ किमनुवा-

उ॰ कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ ३
अस्तमित आदित्ये याज्ञवल्क्य चन्द्र स्य॥
मिते किं ज्योतिरेवायं पुरुष इत्य॥ग्निरेवास्य
ज्योतिर्भवतीत्यग्निनैवायं ज्योतिषाऽऽस्ते पल्य
यते कर्म्म कुरुते विपल्येतीत्येवमेवै. याज्ञवल्क्य
॥ ४ ॥ अस्तमित आदित्ये याज्ञवल्क्य चन्द्रम
स्यस्तमिते शान्तेऽग्नौ किं ज्योतिरेवायं पुरुष इति
वागेवास्य ज्योतिर्भवतीति वाचैवायं ज्योति

भा॰ श्रोत्रेन्द्रिये सम्प्रदीप्ते मनसि विवेक उपजायते। तेन मनस
वाह्यां चेष्टां प्रतिपद्यते। मनसा ह्येव पश्यति मनसा शृणो
तीति ब्राह्मणं। कथं पुनर्वाग्ज्योतिरिति। वाचो ज्योति
ष्टामप्रसिद्धमित्यत आह। तस्माद्वै सम्राट् यस्माद्वाच
ज्योतिषाऽनुगृहीतोऽयं पुरुषो व्यवहरति। तस्मात्प्रसिद्धमेत
द्वाचो ज्योतिष्ट्वं। कथमपि यत्र यस्मिन् काले प्रावृ
प्रायेण मेघान्धकारे सर्व्वज्योतिःप्रत्यस्तमये स्वोऽपि पाणि
र्हस्तो न विस्पष्टं निर्ज्ञायते। अथ तस्मिन् काले सर्व्वचेष्टा
निरोधे प्राप्ते वाह्यज्योतिषोऽभावाद्यत्र वागुच्चरति श्वा व

आ॰ तत्र प्रमाणमाह। मनसा हीति॥ एवं पातनिकां कृत्वा वाचो
ज्योतिष्ट्वसाधनार्थं पृच्छति। कथमिति॥ का पुनरत्रानुपपत्तिस्त
त्राह। वाच इति॥ तत्रानन्तरवाक्यमुत्तरत्वेनोत्थाप्य व्याकरोति
अत आहेत्यादिना॥ प्रसिद्धमेवाकाङ्क्षापूर्व्वकं स्फुटयति। कथ
मित्यादिना॥ उपैवेत्यादि व्याचष्टे। तेन शब्देनेति॥ ज्योति

उ० षाऽऽस्ते पल्ययते कर्म्म कुरुते विपल्येतीति तस्माद्वै सम्राडपि यत्र स्वः पाणिर्न्न विनिर्ज्ञायते ऽथ यत्र वागुच्चरत्युपैव तत्र न्येतीत्येवमेवै-तद्याज्ञवल्क्य ॥ ५ ॥

अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्त-

भा० भवति गर्दभो वा रौति उपैव तत्र न्येति तेन शब्देन ज्योतिषा श्रोत्रमनसोर्नैरन्तर्यं भवति । तेन ज्योतिः-कार्य्यत्वं वाक्प्रतिपद्यते। तेन वाचा ज्योतिषा उपन्येत्येव। तत्र च कर्म्म कुरुते विपल्येति । तत्र वाग्ज्योतिषो ग्रहणं गन्धा-दीनामुपलक्षणार्थं। गन्धादिभिरपि हि घ्राणादिष्वनुगृह्णी-तेषु प्रवृत्तिनिवृत्त्यादयो भवन्ति । तेन तैरप्यनुग्रहो भवति कार्य्यकरणसङ्घातस्यैवमेवैतद्याज्ञवल्क्य ॥ ३ ॥ ४ ॥ ५ ॥

शान्तायां पुनर्वाचि गन्धादिष्वपि च शान्तेषु वाह्येष्व-नुग्राहकेषु सर्व्वप्रवृत्तिनिरोधः प्राप्तोऽस्य पुरुषस्यैतदुक्तं भवति । जाग्रद्विषये वहिर्मुखानि करणानि चक्षुरादीन्या-

---

व्या० कार्य्यवत्त्वं तज्जन्यव्यवहाररूपकार्य्यवत्त्वमिति यावत् । तत्र वाग्ज्योतिष इत्यत्र चतुर्थपर्य्यायः सप्तम्यर्थः ॥ किमिति गन्धादयः शब्देनोपलक्ष्यन्ते तत्राह। गन्धादिभिरिति ॥ प्रश्नान्तरमुत्था-पयति। एवमेवेति ॥ तथापि स्वप्नादौ तस्य प्रवृत्तिदर्शनात्त-त्कारणीभूतं ज्योतिर्वक्तव्यमिति शेषः ॥ ३ ॥ ४ ॥ ५ ॥

कथं पुनरत्र पृच्छ्यते ज्योतिरन्तरमित्याशङ्क्य प्रष्टुरभिप्रायमाह। एतदुक्तं भवतीति॥ यो व्यवहारः सोऽतिरिक्तज्योतिर्निमित्तो यथा ह्यादित्यादिनिमित्तो जाग्रद्व्यवहार इति व्याप्तिमुक्तां निगमयति।

उ॰ मिते शान्तेऽग्नौ शान्तायां वाचि किंज्योतिरेवायं पुरुष इत्यात्मैवास्य ज्योतिर्भवतीत्यात्मनैवायं

भा॰ दित्यादिज्योतिर्भिरनुगृह्यमाणानि यदा तदा स्फुटतरः संव्यवहारोऽस्य पुरुषस्य भवतीति। एवं तावज्जागरिते स्वावयवसङ्घातव्यतिरिक्तेनैव ज्योतिषा ज्योतिःकार्य्यसिद्धिरस्य पुरुषस्य दृष्टा। तस्मात्ते वयं मन्यामहे सर्व्वबाह्यज्योतिःप्रत्यस्तमयेऽपि स्वप्नसुषुप्तिकाले जागरिते च तादृगवस्थायां स्वावयवसङ्घातव्यतिरिक्तेनैव ज्योतिषा ज्योतिः कार्य्यसिद्धिरस्येति। दृश्यते च स्वप्ने ज्योतिःकार्य्यसिद्धिर्बन्धुसङ्गमनवियोगदर्शनं देशान्तरगमनागमनादिकं सुषुप्ताच्चोत्थानं सुखमहमस्वाप्सं न किञ्चिदवेदिषमिति। तस्मादस्ति व्यतिरिक्तं किमपि ज्योतिः। किं पुनस्तच्छान्तायां वाचि ज्योतिर्भवतीति। उच्यते। आत्मावास्य ज्योतिर्भवतीत्यात्मेति। कार्य्यकरणस्वावयवसङ्घातव्यतिरिक्तं कार्य्यकर-

---

घा॰ एवं तावदिति ॥ व्याप्तिज्ञानकार्य्यमनुमानमाह। तस्मादिति॥ तादृगवस्थायां सर्व्वज्योतिप्रत्यस्तमयदशायामिति यावत् ॥ विमतो व्यवहारोऽतिरिक्तज्योतिरधीनो व्यवहारत्वात्सम्प्रतिपन्नवदित्यधस्तादेवानुमानमावेदितमिति भावः॥ हेतोराश्रयासिद्धिमाशङ्क्य परिहरति। दृश्यते चेति ॥ आदिशब्देन देशान्तरादौ कर्म्मकरणं गृह्यते ॥ आश्रयैकदेशासिद्धिमाशङ्क्याह। सुषुप्ताच्चेति॥ ध्यानदेवतादशायामिष्टदेवतादर्शनं चकारार्थः॥ अनुमानफलं निगमयति। तस्मादिति ॥ यथोक्तानुमानाज्ज्योतिः सिद्धञ्चेत्किं प्रश्नेनेत्याशङ्क्याह। किं पुनरिति॥ सर्व्वज्योतिरुपरमे दृश्यमानस्य व्यवहारस्य कारणतयानुमानतो ज्योतिर्मात्रसिद्धावपि तद्वि-

उ॰ ज्योतिषाऽऽस्ते पल्ययते कर्म्म कुरुते विपल्येतीति ॥ ६ ॥

भा॰ अवभासकमादित्यादि वाह्यज्योतिर्वत्स्वयमन्येनानवभास्यमानमभिधीयते। ज्योतिरन्तरस्थं च तत्पारिशेष्यात्कार्य्यकरणव्यतिरिक्तं तदिति तावत्सिद्धं। यच्च कार्य्यकरणव्यतिरिक्तं कार्य्यकरणसङ्घातानुग्राहकं च ज्योतिस्तदाह्यं चक्षुरादिकरणैरुपलभ्यमानं दृष्टं। न तु तथा तच्चक्षुरादिभिरुपलभ्यते आदित्यादिज्योतिःषूपरतेषु। कार्य्यन्तु ज्योतिषो दृश्यते। यस्मादात्मनैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म्म कुरुते विपल्येतीति। तस्मान्नूनमन्तःस्थं ज्योतिरित्यवगम्यते।

किञ्चादित्यादिज्योतिर्विलक्षणं तदभौतिकं च। स एव हेतुर्यच्चक्षुराद्यग्राह्यत्वमादित्यादिवत्। न समानजातीयेनैवोपकारदर्शनात्। यदादित्यादिविलक्षणं ज्योतिरन्तर-

---

आ॰ शेषबुभुत्साया प्रश्नोपपत्तिरित्यर्थः॥ प्रतिवचनमवतार्य्य व्याकरोति। उच्यत इत्यादिना॥ अवभासकत्वे दृष्टान्तमाह। आदित्यादीति॥ तच्च व्यतिरिक्तत्वं साधयति। कार्य्येति॥ अनुग्राहकत्वादादित्यादिवदिति शेषः॥ तच्चान्तःस्थं पारिशेष्यादित्युक्तमुपपादयति। यच्चेति॥ उपरतेष्वात्मज्योतिरिति शेष॥ तदेव तर्हि माभूदिति चेन्नेत्याह। कार्य्यन्त्विति॥ स्वप्नादौ दृश्यमानं व्यवहारं हेतूकृत्य फलितमाह। यस्मादित्यादिना॥ विमतमन्तःस्थमतीन्द्रियत्वादादित्यवदिति व्यतिरेकीत्यर्थः॥

व्यतिरेकान्तरमाह। किञ्चेति॥ सम्मति लोकायतश्चोदयति। नेत्यादिना॥ तत्र नञर्थं व्याचष्टे। यदिति॥ उक्तं हेतुं प्रश्न-

भा॰ सिद्धमित्येतदसत्। कस्मादुपक्रियमाणसमानजातीयेनैवादित्यादिज्योतिषा कार्य्यकरणसङ्घातस्य भौतिकस्य भौतिकेनैवोपकारः क्रियमाणो दृश्यते। यथा दृष्टश्चेत्तदनुमेयं। यदि नाम कार्य्यकारणादर्थान्तरं तदुपकारकं आदित्यादिवज्ज्योतिस्तथापि कार्य्यकरणसङ्घातसजातीयमेवानुमेयं कार्य्यकरणसङ्घातोपकारकत्वादादित्यादिज्योतिर्वत्। यत्पुनरन्तःस्थत्वादप्रत्यक्षत्वाच्च वैलक्षण्यमुच्यते तच्चक्षुरादिज्योतिर्भिरनैकान्तिकं। यतोऽप्रत्यक्षाण्यन्तःस्थानि चक्षुरादिज्योतींषि। तस्मात्तव मनोरथमात्रं विलक्षणमात्मज्योतिः सिद्धमिति। कार्य्यकरणसङ्घातभावभावित्वाच्च सङ्घातधर्म्मत्वमनुमीयते ज्योतिषः। सामान्यतो दृष्टस्य चानुमानस्य व्यभिचारित्वादप्रामाण्यं। सामान्यतो दृष्टबलेन हि भवानादित्यादिवद्व्यतिरिक्तं ज्योतिः

आ॰ पूर्व्वोक्तं विभजते। कस्मादित्यादिना॥ यद्यपि देहादेरुपकार्य्यादुपकारकमादित्यादिसजातीयं दृष्टं तथापि नात्मज्योतिरुपकार्य्यसजातीयमनुमेयमित्याशङ्क्याह। यथा दृष्टश्चेति॥ तदेव स्पष्टयति। यदि नामेति॥ विमतमन्तःस्थमतिरिक्तञ्चातीन्द्रियत्वादादित्यवदिति परोक्तं व्यतिरेक्यनुमानमनूद्य दूषयति। यत्पुनरित्यादिना॥ अनैकान्तिकत्वं व्यनक्ति। यत इति॥ अन्तःस्थान्यव्यतिरिक्तानि च सङ्घातादिति द्रष्टव्यं॥ व्यभिचारफलमाह। तस्मादिति॥ विलक्षणमन्तःस्थञ्चेति मन्तव्यं॥ किञ्च चैतन्यं शरीरधर्म्मस्तद्भावभावित्वाद्रूपादिवदित्याह। कार्य्यकरणेति॥ विमतं सङ्घाताद्भिन्नं तद्भासकत्वादादित्यवदित्यनुमानान्न सङ्घातधर्म्मत्वं चैतन्यस्येत्याशङ्क्याह। सामान्यतो दृष्टस्येति॥ लोकायतस्य देहावभासकमपि चक्षुस्ततो न भिद्यते। तथा च व्यभिचारान्न त्वदनुमान-

भा॰ साधयति कार्य्यकरणेभ्यः। न च प्रत्यक्षमनुमानेन बाधि
शक्यते। अयमेव तु कार्य्यकरणसङ्घातः प्रत्यक्षं पश्य
शृणोति मनुते विजानाति च। यदि नाम ज्योतिरन्तर
मस्योपकारकं स्यादादित्यादिवन्न तदात्मा स्याज्ज्योति
रन्तरमादित्यादिवदेव। य एव तु प्रत्यक्षं दर्शनादि
क्रियां करोति स एवात्मा स्यात्कार्य्यकरणसङ्घातो नान्यः
प्रत्यक्षविरोधेऽनुमानस्याप्रामाण्यात्। नन्वयमेव चेद्दर्शन
दिक्रियाकर्त्तात्मा सङ्घातः कथमविकलस्यैवास्य दर्शन
दिक्रियाकर्त्तृत्वं कदाचिद्भवति कदाचिन्नेति।

नैष दोषोऽदृष्टत्वात्। न हि दृष्टेऽनुपपन्नं नाम। न
खद्योतप्रकाशाप्रकाशकत्वेन दृश्यमाने कारणान्तरमनुमेय
अनुमेयत्वे च केनचित्सामान्यात्सर्व्वं सर्व्वत्रानुमेयं स्यात्

व्या॰ प्रामाण्यमित्यर्थः॥ मनुष्योऽहं जानामीति प्रत्यक्षविरोधाच्च तव
नुमानमप्रमाणमित्याह। सामान्यतो दृष्टेति॥ ननु तेन प्रत्यक्षम
त्सार्थ्यतामिति चेन्नेत्याह। न चेति॥ इतश्च देहस्यैव चैतन्यमि
त्याह॥ अयमेवेति॥ ज्योतिषो देहव्यतिरेकमङ्गीकृत्यापि दूषयति
यदि नामेति॥ विमतं ज्योतिरनात्मा देहोपकारत्वादादित्यव
दित्यर्थः॥ आत्मत्वं तर्हि कस्येत्याशङ्क्याह। य एव त्विति॥ अन
मानादात्मनो देहव्यतिरिक्तत्वमुक्तमित्याशङ्क्याह। प्रत्यक्षेति
नान्य आत्मेति पूर्व्वेण सम्बन्धः॥ देहस्यात्मत्वे कादाचित्कं द्रष्टृत्व
श्रोतृत्वाद्ययुक्तमिति शङ्कते। नन्विति॥ स्वभाववादी परिहरति
नैष दोष इति॥ कादाचित्के दर्शनादर्शने सम्भवतो देहस्वाभा
व्यादित्यत्र दृष्टान्तमाह। न हीति॥

विमतं कारणान्तरपूर्व्वकं कादाचित्कत्वाद्घटवदित्यनुमान
दृष्टान्ते भविष्यतीत्याशङ्क्यातिरिक्षा इति वदुष्णमुदकमित्यपि द्रव
त्वादिनानुमीयेतेत्यतिप्रसङ्गमाह। अनुमेयत्वे चेति॥ ननु यत्र

भा० तच्चानिष्टं। न च पदार्थस्वभावो नास्ति। न ह्यग्नेरुष्णस्वाभाव्यमन्यनिमित्तमुदकस्य वा शैत्यं प्राणिधर्म्माधर्म्माद्यपेक्षमिति चेत्। धर्म्माधर्म्मादेर्निमित्तान्तरापेक्षस्वभावप्रसङ्गो ऽस्त्विति चेन्न। तदनवस्थाप्रसङ्गः। स चानिष्टः। न स्वप्नस्मृत्योर्दृष्टस्यैव दर्शनात्। यदुक्तं स्वभाववादिना देहस्यैव दर्शनादिक्रिया न व्यतिरिक्तस्येति तन्न। यदि हि देहस्यैव दर्शनाक्रिया स्वप्ने दृष्टस्यैव दर्शनं न स्यात्। अन्धः स्वप्नं पश्यन्दृष्टपूर्व्वस्यैव पश्यति। न शाकद्वीपादिगतमदृष्टपूर्व्वं। ततश्चैतत्सिद्धं भवति। यः स्वप्ने पश्यति दृष्टपूर्व्वं वस्तु स एव पूर्व्वं विद्यमाने चक्षुष्यद्राक्षीन्न देह इति। देहस्येद्द्रष्टा येनाद्राक्षीत्तस्मिन्नुद्धृते चक्षुषि। स्वप्ने तदेव दृष्टपूर्व्वं न

व्या० वति तत्सनिमित्तमेव न स्वभावाद्भवत्किञ्चिदस्माकं प्रसिद्धं तत्राह। न चेति। अग्नेरौष्ण्यमुदकस्य शैत्यमित्याद्यपि न निर्निमित्तं किन्तु प्राण्यदृष्टापेक्षमिति शङ्कते। प्राणीति॥ आदिशब्देनेश्वरादि गृह्यते। गूढाभिसन्धिः स्वभाववाद्याह। धर्म्मेति। प्रसङ्गस्येष्टत्वं शङ्कित्वा स्वाभिप्रायमाह। अस्त्वित्यादिना॥ सिद्धान्ती स्वप्नादिसिद्ध्यनुपपत्त्या देहातिरिक्तमात्मानमभ्युपगमयन्नुत्तरमाह। नेत्यादिना॥ तत्र नञर्थं विभजते। यदुक्तमिति॥ स्वप्ने दृष्टस्यैव दर्शनादिति हेतुभागं व्यतिरेकद्वारा विवृणोति। यदि हीति॥ जाग्रद्देहस्य द्रष्टुः स्वप्ने नष्टत्वादतीन्द्रियस्य संस्कारस्य चानिष्टत्वादन्यदृष्टे चान्यस्य स्वप्नायोगान्न स्वप्ने दृष्टस्यैव दर्शनं देहात्मवादे सम्भवतीत्यर्थः॥ मा भूद्दृष्टस्यैव स्वप्ने दृष्टिरन्धस्यापि स्वप्ने दृष्टेरित्याशङ्क्याह। अन्ध इति॥ अपिशब्दोऽध्याहर्त्तव्यः॥ पूर्व्वदृष्टस्यैव स्वप्ने दृष्टत्वेऽपि कुतो देहव्यतिरिक्तो द्रष्टा सिद्ध्यतीत्याशङ्क्याह। ततश्चेति॥ अथोभयत्र देहस्यैव द्रष्टृत्वे का हानिरिति चेदत आह। देहस्येदिति॥ तत्र सहकारिचक्षुरभावाच्चक्षु-

भा॰ पश्येत्। अस्ति च लोके प्रसिद्धिः। पूर्वं दृष्टं मया हिमवतः शृङ्गमद्याहं स्वप्नेऽद्राक्षमित्युद्धृतचक्षुषामन्धानामपि। तस्मादनुद्धृतेऽपि चक्षुषि यः स्वप्नदृक् स एव द्रष्टा। न देह इत्यवगम्यते। तथा स्मृतौ द्रष्टृस्मर्त्रोरेकत्वे सति य एव द्रष्टा स एव स्मर्त्ता। यदा चैवं तदा निमीलिताक्षोऽपि स्मरन्दृष्टपूर्वं यद्रूपं तद्दृष्टवदेव पश्यतीति। तस्माद्यन्निमीलितं तन्न द्रष्टृ यन्निमीलिते चक्षुषि स्मरद्रूपं पश्यति तदेवानिमीलितेऽपि चक्षुषि द्रष्टासीदित्यवगम्यते। मृते च देहेऽविकलस्यैव च रूपादिदर्शनाभावात्॥

देहस्यैव द्रष्टृत्वे मृतेऽपि दर्शनादिक्रिया स्यात्। तस्माद्यदपाये देहे दर्शनं न भवति। यद्भावे च भवति। तद्दर्शनादिक्रियाकर्त्तृ न देह इत्यवगम्यते। चक्षुरादीन्येव दर्शनादि

आ॰ रन्तरस्यैवोत्पत्तौ देहान्तरस्यापि समुत्पत्तिसम्भवादन्यदृष्टेऽन्यस्य न स्वप्नः स्यादित्यर्थः॥ मा भूत्पूर्वदृष्टे स्वप्नो देहत्वभावादित्याशङ्क्याह। अस्ति चेति॥ कथं ते जात्यन्धानामीदृग्दर्शनमिति चेज्जन्मान्तरानुभववशादिति ब्रूमः॥ अन्धस्य देहस्याद्रष्टृत्वेऽपि चक्षुष्मतस्तस्य स्यादेव द्रष्टृत्वमित्याशङ्क्याह। तस्मादिति॥ स्वप्ने दृष्टस्यैव दर्शनादिति हेतुं व्याख्याय स्मृतौ दृष्टस्यैव दर्शनादिति हेतुं व्याचष्टे। तथेति॥ द्रष्टृस्मर्त्रोरेकत्वेऽपि कुतो देहातिरिक्तो द्रष्टेत्याशङ्क्याह। यदा चेति॥ देहातिरिक्तस्य स्मर्त्तृत्वेऽपि कुतो द्रष्टृत्वमित्याशङ्क्याह। तस्मादिति॥ द्रष्टृस्मर्त्रोरेकत्वस्योक्तत्वाद्देहातिरिक्तः स्मर्त्ता चेद्द्रष्टापि तथा सिद्ध्यतीति भावः॥ देहस्याद्रष्टृत्वे हेत्वन्तरमाह। मृते चेति॥ न तस्य द्रष्टृतेति शेषः॥

तदेवोपपादयति। देहस्यवेति॥ देहव्यतिरिक्तमात्मानमुपपादितमुपसंहरति। तस्मादिति॥ चैतन्यं यत्तदोरर्थः॥ माभूद्देहस्यात्मत्वं इन्द्रियाणान्तु स्यादिति शङ्कते। चक्षुरादीनीति॥

भा॰ क्रियाकर्तृणीति चेत्। न यदहमद्राक्षं तत्स्पृशामीति। भिन्न-
कर्तृकत्वे प्रतिसन्धानानुपपत्तेः। मनस्तर्हीति चेत्। न मनसो
ऽपि विषयत्वाद्रूपादिवद्द्रष्टृत्वाद्यनुपपत्तिः। तस्मादन्तःस्थं
व्यतिरिक्तमादित्यादिवदिति सिद्धं। यदुक्तं कार्य्यकरणस-
ङ्घातसमानजातीयमेव ज्योतिरन्तरमनुमेयं। आदित्यादि-
भिस्तत्समानजातीयैरेवोपक्रियमाणत्वादिति। तदसत्। उप-
कार्य्योपकारकभावस्यानियमदर्शनात्। कथं पार्थिवैरिन्धनैः
पार्थिवत्वसमानजातीयैस्तृणोलपादिभिरग्नेः प्रज्वलनोप-
कारः क्रियमाणो दृश्यते। न च तावता तत्समानजाती-
यैरेवाग्नेः प्रज्वलनोपकारः सर्व्वत्रानुमेयः स्यात्। येनोद-
केनापि प्रज्वलनोपकारो भिन्नजातीयेन वैद्युतस्याग्नेर्ज-

आ॰ अन्यदृष्टस्येतरेणाप्रत्यभिज्ञानादिति न्यायेन परिहरति। नेत्या-
दिना॥ आत्मप्रतिपत्तिहेतूनां मनसि सम्भवादिति न्यायेन
शङ्कते। मन इति॥ ज्ञातुर्ज्ञानसाधनोपपत्तेः सञ्ज्ञाभेदमात्रमिति
न्यायेन परिहरति। न मनसोऽपीति॥ देहादेरनात्मत्वे फलि-
तमाह। तस्मादिति॥ आत्मज्योतिःसङ्घातादिति शेषः॥ परो-
क्तमनुवदति। यदुक्तमिति॥ अनुग्राह्यसजातीयमनुग्राहक-
मित्यत्र हेतुमाह। आदित्यादिभिरिति॥ उपकार्य्योपकारकत्व-
साजात्यनियमं दूषयति। तदसदिति॥ अनियमदर्शनमाकाङ्क्षा-
पूर्व्वकमुदाहरति। कथं पार्थिवैरिति॥ उलपं बालतृणं। पार्थि-
वस्याग्निं प्रत्युपकारकत्वनियमं वारयति। न चेति॥ तावता
पार्थिवेनाग्नेरुपक्रियमाणत्वदर्शनेनेति यावत्। तत्समानजा-
तीयैरिति तच्छब्दः पार्थिवविषयः॥ तत्र हेतुमाह। येनेति॥
दर्शनफलं निगमयति। तस्मादिति॥ उपकार्य्योपकारकभावे
साजात्यानियमवदुपकार्य्योपकारकभावेऽपि वैजात्यनियमो ना-
स्तीत्यर्थः। तत्रोपकार्य्योपकारकत्वे साजात्यनियमाभावं उदाहार-

भा॰ ठरस्य च क्रियमाणो दृश्यते। तस्मादुपकार्य्योपकारकभावे समानजातीयासमानजातीयनियमो नास्ति। कदाचित्स-मानजातीया मनुष्या मनुष्यैरेवोपक्रियन्ते। कदाचित्स्था-वरपश्वादिभिश्च भिन्नजातीयैः। तस्मादहेतुः। कार्य्यक-रणसङ्घातसमानजातीयैरेवादित्यादिज्योतिर्भिरुपक्रियमा-णत्वादिति॥

यत्पुनरात्थ चक्षुरादिभिरादित्यादिज्योतिर्वद्दृश्य-त्वादिति। अयं हेतुर्ज्योतिरन्तरस्यान्तःस्थत्वं वैलक्षण्यञ्च न साधयति। चक्षुरादिभिरनैकान्तिकत्वादिति। तदसत्। चक्षुरादिकरणेभ्योऽन्यत्वे सतीति हेतोर्विशेषणत्वोपपत्तेः। कार्य्यकरणसङ्घातधर्मत्वं ज्योतिष इति यदुक्तं तन्न। अनु-मानविरोधात्। आदित्यादिज्योतिर्वत्कार्य्यकरणसङ्घाता-दर्थान्तरं ज्योतिरिति ह्यनुमानमुक्तं तेन विरुध्यते। इयं प्रतिज्ञा कार्य्यकरणसङ्घातधर्मत्वं ज्योतिष इति। तद्भाव-

---

व्या॰ न्तरेण दर्शयति। कदाचिदिति॥ स्वस्वामिना वामेरुपपशान्त्यु-पलम्भादुपकार्य्योपकारकत्वे वैजात्यनियमो नास्तीति सत्वोपसं-हरति। तस्मादिति॥ उक्तानियमदर्शनं तच्छब्दार्थः। अहेतु-रात्मज्योतिष सङ्घातेन समानजातीयतायामिति शेषः। अनु-ग्राहकमनुग्राह्यसजातीयमनुग्राहकत्वादादित्यवदित्यपास्तं॥

सम्प्रत्यतीन्द्रियत्वहेतोरनैकान्त्यं परोक्तमनुभाष्य दूषयति। यत्पु-नरित्यादिना॥ विमतं ज्योतिःसङ्घातधर्मस्तद्भावभावित्वाद्रू-पादिवदित्युक्तमनूद्य निराकरोति। कार्य्येति॥ अनुमानविरोध-मेव साधयति। आदित्यादीति॥ कालात्ययापदेशमुक्त्वा हेत्व-सिद्धिं दोषान्तरमाह। तद्भावेति॥ अदर्शनादिति छेदः। यत्पुनर्विशेषे ऽनुगमाभावः सामान्ये सिद्धसाध्यतेत्यनुमानदूषण-

भा॰ भावित्वं त्वसिद्धं। मृते देहे ज्योतिषोऽदर्शनात्। सामान्यतो दृष्टस्यानुमानस्याप्रामाण्ये सति पानभोजनादिसर्व्वव्यवहारलोपप्रसङ्गः। स चानिष्टः। पानभोजनादिषु हि क्षुत्पिपासादिनिवृत्तिमुपलब्धवतस्तत्सामान्यात्पानभोजनाद्युपादानं दृश्यमानं लोके न प्राप्नोति। दृश्यन्ते ह्युपलब्धपानभोजनाः सामान्यतः पुनः पानभोजनान्तरैः क्षुत्पिपासादिनिवृत्तिमनुमिन्वन्तस्तादर्थ्ये न प्रवर्त्तमानाः। यदुक्तमयमेव तु देहो दर्शनादिक्रियाकर्त्तेति तत्प्रथममेव परिहृतं। स्वप्नस्मृत्योर्देहादर्थान्तरभूतो द्रष्टेति। अनेनैव ज्योतिरन्तरस्यानात्मत्वमपि प्रत्युक्तं। यत्पुनः खद्योतादेः कादाचित्कं प्रकाशाप्रकाशकत्वं तदसत्। पक्षाद्यवयवसङ्कोचविकाशनिमित्तत्वात्प्रकाशाप्रकाशकत्वस्य। त्पुन ... धर्म्माधर्म्मयोरवश्यं फलदातृत्वस्वभावोऽभ्युपगन्तव्य इति

आ॰ मभिप्रेत्य सामान्यतो दृष्टस्य चेत्याद्युक्तं तद्दूषयति। साम न्यतो दृष्टस्येति॥ विशेषतोऽदृष्टस्येत्यपि द्रष्टव्यं। कि मत्यनु न ।।म सर्व्वव्यवहारहानिरित्याशङ्क्याह। पानेति॥ तत्सामान्यात्पानत्व भोजनत्वादिसादृश्यादिति यावत्। पानभोजनाद्युपादानं दृश्यमानमित्युक्तं विशदयति। दृश्यन्ते हीति॥ तादर्थ्येन क्षुत्पिपासादिनिवृत्त्युपायभोजनपानाद्यर्थत्वेनेति यावत्॥ देहस्यैव द्रष्टृत्वमित्युक्तमनूद्य पूर्व्वोक्तं परिहारं स्मारयति। यदुक्तमित्यादिना ज्योतिरन्तरमादित्यादिवदनात्मेत्युक्तं प्रत्याह। अनेनेति सङ्घातादेर्द्रष्टृत्वनिराकरणेनेति यावत्॥ देहस्य कादाचित्कं दर्शनादिमत्त्वं स्वाभाविकमित्यत्र परोक्तं दृष्टान्तमनुभाष्य निराचष्टे यत्पुनरित्यादिना॥ सिद्धान्तिनापि स्वभाववादस्य क्वचिदेष्टत्वमुपदिष्टमनूद्य दूषयति। यत्पुनरिति॥ धर्म्मादेर्यदि हे॰ न्त स्वाधीनं फलदातृत्वं तदा हेत्वन्तरस्यापि हेत्वन्तर ... न ...

उ॰ कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः ।

भा॰ तदभ्युपगमे भवतः सिद्धान्तहानात्। एतेनानवस्थादोषः प्रत्युक्तः। तस्मादस्ति व्यतिरिक्तश्चान्तःस्थं ज्योतिरात्मेति॥६॥

यद्यपि व्यतिरिक्तत्वादि सिद्धं तथापि समानजातीयानुग्राहकत्वदर्शननिमित्तभ्रान्त्या करणानामेवान्यतमो व्यतिरिक्तो वेत्यविवेकतः पृच्छति कतम इति। न्यायसूक्ष्मताया दुर्विज्ञेयत्वादुपपद्यते भ्रान्तिः। अथवा शरीरव्यतिरिक्ते सिद्धेऽपि करणानि सर्व्वाणि विज्ञानवन्ति च विवेकत आत्मनोऽनुपलब्धत्वात्। अतोऽहं पृच्छामि कतम आत्मेति। कतमोऽसौ देहेन्द्रियप्राणमनःसु यस्त्वयोक्त आत्मा। येन ज्योतिषाऽऽस्त इत्युक्तः। अथवा योऽयमात्मा त्वयाभिप्रेतो विज्ञानमयः। सर्व्वे इमे प्राणा विज्ञानमया

आ॰ त्वमित्यनवस्थेत्युक्तं प्रत्याह। एतेनेति॥ सिद्धान्तविरोधप्रसङ्गेनेति यावत्॥ लौकायतमतासम्भवे स्वपक्षमुपसंहरति। तस्मादिति॥६॥

न त्वात्मज्योतिःसङ्घाताद्व्यतिरिक्तमन्तःस्थञ्चेति साधितं। तथा च कथं कतम आत्मेति पृच्छ्यते तत्राह। यद्यपीति॥ अनुग्राह्येण देहादिना समानजातीयस्यादित्यादेरनुग्राहकत्वदर्शनान्निमित्तादनुग्राहकत्वाविशेषादात्मज्योतिरपि समानजातीयं देहादिनेति भ्रान्तिर्भवति तयेति यावत्॥ अविवेकिनो निष्कृष्टदृष्ट्यभावादित्यर्थः॥ व्यतिरेकसाधकस्य न्यायस्य दर्शितत्वात्कुतो भ्रान्तिरित्याशङ्क्याह। न्यायेति॥ भ्रान्तिनिमित्ताविवेककृतं प्रश्नमुक्त्वा प्रकारान्तरेण प्रश्नमुत्थापयति। अथवेति॥ प्रश्नाक्षराणि व्याचष्टे। कतमोऽसाविति॥ ज्योतिर्निमित्तो व्यवहारो मयोक्तो

भा॰ इवेषु प्राणेषु कतमः। यथा समुदितेषु ब्राह्मणेषु सर्व्वे इमे तेजस्विनः कतम एतेषु षडङ्गविदिति। पूर्व्वस्मिन्व्याख्याने कतम आत्मेत्येतावदेव प्रश्नवाक्यं। योऽयं विज्ञानमय इति प्रतिवचनं। द्वितीये तु व्याख्याने प्राणेष्वित्येवमन्तं प्रश्नवाक्यं। अथवा सर्व्वमेव प्रश्नवाक्यं विज्ञानमयो हृद्यन्तर्ज्योतिःपुरुषः कतम इत्येतदन्तं। योऽयं विज्ञानमय इत्येतस्य शब्दस्य निर्धारितार्थविशेषविषयत्वं। कतम आत्मेतीति शब्दस्य प्रश्नवाक्यपरिसमाप्त्यर्थत्वं व्यवहित सम्बन्धमन्तरेण युक्तमिति कृत्वा कतम आत्मेत्येवमन्तमेव प्रश्नवाक्यं। योऽयमित्यादिपरं सर्व्वमेव प्रतिवचनमिति निश्चीयते। योऽयमित्यात्मनः प्रत्यक्षत्वान्निर्द्देशः। विज्ञानमयो विज्ञानप्रायो बुद्धिविज्ञानोपाधिसम्पर्काविवेकाद्विज्ञानमय इत्युच्यते॥

आ॰ न त्वात्मेत्याशङ्क्याह। येनेति॥ आत्मनैवायं ज्योतिषेत्युक्तत्वादासनादिनिमित्तं ज्योतिरात्मेत्यर्थः। प्रकारान्तरेण प्रश्नं व्याकरोति॥ अथवेति। सप्तम्यर्थं कथयति। सर्व्व इति॥ योऽयं त्वयाभिप्रेतो विज्ञानमयः स प्राणेषु मध्ये कतमः स्यात्तेऽपि हि विज्ञानमया इव भान्तीति योजना। उक्तमर्थं दृष्टान्तेन बुद्धावारोपयति। यथेति॥ व्याख्यानयोरवान्तरविभागमाह। पूर्व्वस्मिन्नित्यादिना॥ हृदीत्यादिप्रतिवचनमिति शेषः॥ द्वितीयतृतीयपक्षयोररुचिं सूचयन्नाद्यं पक्षमङ्गीकरोति। योऽयमिति॥ यस्त्वया पृष्टः सोऽयमित्यात्मनश्चिद्रूपत्वेन प्रत्यक्षत्वादयमिति निर्द्देश इति पदद्वयस्यार्थः॥ देहव्यवच्छेदार्थं विशिनष्टि। विज्ञानमय इति॥ विज्ञानशब्दार्थमाचक्षाणस्तत्प्रायत्वं प्रकटयति। बुद्धीति॥ बुद्धिरेव विज्ञानं विज्ञायतेऽनेनेति व्युत्पत्तेस्तेनोपाधिना सम्पर्क एवाविवेकस्तस्मादिति यावत्॥

भा०, बुद्धिविज्ञानसंयुक्त एव हि यस्मादुपलभ्यते राजेव चन्द्रादित्यसंयुक्तः । बुद्धिर्हि सर्व्वार्थकरणं । तमसीव प्रदीपः पुरोऽवस्थितः । मनसा ह्येव पश्यति मनसा शृणोतीत्युक्तं । बुद्धिविज्ञानालोकविशिष्टमेव हि सर्व्वं विषयजातमुपलभ्यते पुरोऽवस्थितप्रदीपालोकविशिष्टमिव तमसि । द्वारमात्राणि त्वन्यानि करणानि बुद्धेः । तस्मात्तेनैव विशेष्यते विज्ञानमय इति । येषां परमात्मविज्ञप्तिविकार इति व्याख्यानं तेषां विज्ञानमयो मनोमय इत्यादौ विज्ञानमयस्य शब्दस्यान्यार्थदर्शनादश्रौतार्थतावसीयते । सन्दिग्धश्च पदार्थोऽन्यत्र निश्चितप्रयोगदर्शनान्निर्द्धारयितुं शक्यो वाक्यशेषान्निश्चितन्यायबलाद्वा स धीरिति

व्या० तत्सम्पर्के प्रमाणमाह । बुद्धिविज्ञानेति ॥ तस्माद्विज्ञानमय इति शेषः ॥ ननु चक्षुर्मयः श्रोत्रमय इत्यादि हित्वा विज्ञानमय इत्येव कस्मादुपदिश्यते तत्राह । बुद्धिर्हीति ॥ तस्याः साधारणकरणत्वे प्रमाणमाह । मनसा हीति ॥ मनसः सर्व्वार्थत्वं समर्थयते । बुद्धीति ॥ किमर्थानि तर्हि चक्षुरादीनि करणानीत्याशङ्क्याह । द्वारमात्राणीति ॥ बुद्धेः सति प्राधान्ये फलितमाह । तस्मादिति ॥ विज्ञानं परम्ब्रह्म तत्प्रकृतिको जीवो विज्ञानमय इति भर्तृप्रपञ्चैरुक्तमनुवदति । येषामिति ॥ विज्ञानमयादिग्रन्थे मयटो न विकारार्थतेति तैरेवोच्यते। तत्र मनः समभिव्याहाराद्विज्ञानं बुद्धिर्न चात्मा तद्विकारस्तस्मादस्मिन्प्रयोगे मयटो विकारार्थत्वं वदतां स्वोक्तिविरोधः स्यादिति दूषयति। तेषामिति ॥ कथं विज्ञानमयपदार्थनिर्णयार्थं प्रयोगान्तरमनुशीयते तत्राह । सन्दिग्धश्चेति ॥ यथा पुरोडाशं चतुर्धा कृत्वा बर्हिषदं करोतीति पुरोडाशमात्रचतुर्द्धाकरणवाक्यमेकार्थं सम्बन्धिना शाखान्तरीयेणाग्नेयं चतुर्द्धा करोतीत्यनेन विशेषविषयतया

भा॰ चोत्तरत्र पाठात् हृद्यन्तरिति वचनाद्युक्तं विज्ञानप्रायत्वमेव। प्राणेष्विति व्यतिरेकप्रदर्शनार्था सप्तमी। यथा वृक्षेषु पाषाण इति सामीप्यलक्षणा। प्राणेषु हि व्यतिरेकाव्यतिरेकता सन्दिह्यत आत्मनः। प्राणेषु प्राणेभ्यो व्यतिरिक्त इत्यर्थः। यो हि येषु भवति स तद्व्यतिरिक्तो भवत्येव। यथा पाषाणेषु वृक्षः। हृदि तत्रैतत्स्यात्प्राणेषु प्राणजातीयैव बुद्धिः स्यादित्यत आह। हृद्यन्तरिति। हृच्छब्देन पुण्डरीकाकारो मांसपिण्डस्तात्स्थ्याद्बुद्धिर्हृत्तस्यां हृदि बुद्धौ। अन्तरिति बुद्धिवृत्तिव्यतिरेकप्रदर्शनार्थं। ज्योतिरवभासात्मकत्वादात्मोच्यते॥

तेन ह्यवभासकेनात्मना ज्योतिषाऽऽस्ते पल्ययते कर्म्म कुरुते चेतनावानिव ह्ययं कार्य्यकरणपिण्डो यथादित्य-

---

आ॰ निश्चितार्थेनाशेय एव पुरोडाशे व्यवस्थाप्यते। यथा वोक्ताः शर्करा उपदधातीत्यत्र केनोक्ता इत्यपेक्षायां तेजो वै घृतमिति वाक्यशेषान्निर्णयस्तथेहापीत्यर्थः॥ आत्मविकारत्वे मोक्षानुपपत्त्याद्यबाधितन्यायाद्वा विज्ञानमयपदार्थनिश्चय इत्याह। निश्चितेति॥ यदुक्तं निर्णयो वाक्यशेषादिति तदेव व्यनक्ति। साधीरिति चेति॥ आधाराद्यर्था सप्तमी दृष्टा सा कथं व्यतिरेकप्रदर्शनार्थेत्याशङ्क्याह। यथेति॥ भवत्वत्रापि सामीप्यलक्षणा सप्तमी तथापि कथं व्यतिरेकप्रदर्शनमित्याशङ्क्याह। प्राणेषु हीति॥ फलितं सप्तम्यर्थमभिनयति। प्राणेष्विति॥ तेषु समीपस्थोऽपि कथं तेभ्यो व्यतिरिच्यते तत्राह। यो हीति॥ विशेषणान्तरमादाय व्यावर्त्याशङ्कामुक्त्वा पुनरवतार्य्य व्याकरोति। हृदीत्यादिना॥ विशेषणान्तरस्य तात्पर्य्यमाह। अन्तरितीति॥

ज्योतिःशब्दार्थमाह। ज्योतिरिति॥ ज्योतिष्ट्वं स्पष्टयति। तेनेति॥ आत्मज्योतिषा व्याप्तस्य कार्य्यकरणसङ्घातस्य व्यवहार-

भा॰ प्रकाशस्थो घटो यथा वा मरकतादिर्मणिः क्षीरादिद्रव्ये प्रक्षिप्तः । परीक्षणायात्मच्छायमेव तत्क्षीरादिद्रव्यं करोति । तादृगेतदात्मज्योतिर्बुद्धेरपि हृदयात्सूक्ष्मत्वा-द्धृदयान्तःस्थमपि हृदयादिकं कार्य्यकरणसङ्घातं चैकीकृत्या-त्मज्योतिश्छायं करोति । पारम्पर्य्येण सूक्ष्मस्थूलतारतम्या-त्सर्व्वान्तरतमत्वात् । बुद्धिस्तावत्स्वच्छत्वादानन्तर्य्याच्चात्मचै-तन्यज्योतिःप्रतिच्छाया भवति । तेन हि विवेकिनामपि तत्रात्माभिमानबुद्धिः प्रथमा । ततोऽप्यानन्तर्य्यान्मनसि चैतन्यावभासता । बुद्धिसम्पर्कात् । तत इन्द्रियेषु मनः संयो-गात् । ततोऽनन्तरं शरीरेन्द्रियसम्पर्कात् । एवं पारम्पर्य्येण कृत्स्नं कार्य्यकरणसङ्घातमात्मा चैतन्यस्य स्वरूपज्योतिषाव-भासयति । तेन हि सर्व्वस्य लोकस्य कार्य्यकरणसङ्घाते

आ॰ क्षमत्वे दृष्टान्तमाह । यथेति ॥ चेतनावानिवेत्युक्तं दृष्टान्तेनोप-पादयति । यथावेति ॥ हृदयं बुद्धिस्ततोऽपि सूक्ष्मत्वादात्मज्यो-तिस्तदन्तस्थमपि हृदयादिकं सङ्घातं च सर्व्वमेकीकृत्य स्वच्छायं करोतीति कृत्वा यथोक्तमणिसादृश्यमुचितमिति दार्ष्टान्तिके योजना ॥ कथमिदमात्मज्योतिः सर्व्वमात्मच्छायं करोति तत्राह । पारम्पर्य्येणेति ॥ विषयादिप्रत्यगात्मा तेषु उत्तरोत्तरं सूक्ष्मता-रतम्यात्तेष्वेवात्मादिविषयान्तेषु स्थूलतारतम्याच्च प्रतीचः सर्व्व-स्मादन्तरतमत्वात्तत्र तत्र स्वाकारहेतुत्वमस्तीत्यर्थः । बुद्धेरात्म-च्छायत्वं समर्थयते । बुद्धिस्तावदिति ॥ लौकिकपरीक्षकाणां बुद्धावात्माभिमानभ्रान्तिमुक्तेऽर्थे प्रमाणयति । तेन हीति । बुद्धेः पश्चान्मनस्यपि चिच्छायतेत्यत्र हेतुमाह । बुद्धीति ॥ आत्मनः सर्व्वावभासकत्वमुक्तमुपसंहरति । एवमिति ॥ आत्मनः सर्व्वा-वभासकत्वे किमिति कस्यचित्क्वचिदेवात्मधीरित्याशङ्क्याह । तेन हीति ॥ बुद्ध्यादेरुक्तक्रमेणात्मच्छायत्वं तच्छब्दार्थः ॥ आत्मज्योतिष-

भा० स्तद्वृत्तिषु चानियतात्माभिमानवुद्धिर्यथा विवेकं जायत तथा च भगवतोक्तं गीतासु। यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः। क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत। यदादित्यगतं तेजो जगद्भासयतेऽखिलमित्यादि च। नित्यानित्यानाञ्चेतनाचेतनानामिति च। काठके। तमेव भान्तमनुभाति सर्व्वं। तस्य भासा सर्व्वमिदं विभातीति च। येन सूर्य्यस्तपति तेजसेद्ध इति च मन्त्रवर्णः। तेनायं हृद्यन्तर्ज्योतिःपुरुष आकाशवत्सर्व्वगतत्वात्पूर्ण इति पुरुषः॥

निरतिशयञ्चास्य स्वयं ज्योतिष्ट्वं सर्व्वावभासात्मकत्वात्स्वयमन्यानवभास्यत्वाच्च। स एष पुरुषः स्वयमेव ज्योतिःस्वभावो यं त्वं पृच्छसि कतम आत्मेति। वाह्यानां ज्योतिषां सर्व्वकरणानुग्राहकाणां प्रत्यक्षमयेऽन्तःकरण-

---

आ० सर्व्वावभासकत्वे लोकप्रसिद्धिरेव न प्रमाणं किन्तु भगवद्वाक्यमपीत्याह। तथा चेति॥ अनाम्निनामयमनाम्नी चेतनाश्चेतयितारो ब्रह्मादयस्तेषामयमेव चेतनो यथोदकादीनां अनग्नीनामग्निनिमित्तं दाहकत्वं तथात्मनिमित्तमेव चेतयितृत्वमन्येषामित्याह। नित्य इति॥ अनुगमनवदनुमानं स्वगतया भासा स्यादिति शङ्कां प्रत्याह। तस्येति॥ येनेति॥ तत्र नावेदविन्मनुते तं वृहन्तमित्युत्तरत्र सम्बन्धः॥ ज्योतिःशब्दव्याख्यानमुपसंहरति। तेनेति॥ हृद्यन्तःस्थितोऽयमात्मा सर्व्वावभासकत्वेन ज्योतिर्भवतीति योजना॥ पदान्तरमादाय व्याचष्टे। पुरुष इति॥

आदित्यादिज्योतिषः सकाशादात्मज्योतिषि विशेषमाह। निरतिशयञ्चेति॥ प्रतिवचनवाक्यार्थमुपसंहरति। स एष इति॥ स समानः सन्नित्याद्यवतारयितुं कीर्त्तयति। वाह्यानामिति॥

॰द्वारेण हृद्यन्तर्ज्योतिः पुरुष आत्मा ऽनुग्राहकः करणाना-मित्युक्तं । यदा तु वाह्यकरणानुग्राहकाणामादित्यादि-ज्योतिषां भावस्तदाप्यादित्यादि ज्योतिषां परार्थत्वात्का-र्य्यकरणसङ्घातस्याचैतन्ये स्वार्थानुपपत्तेः । स्वार्थज्योतिष आत्मनो ऽनुग्रहाभावे ऽयं कार्य्यकरणसङ्घातो न व्यवहाराय कल्प्यते । आत्मज्योतिरनुग्रहेणैव हि सर्व्वदा सर्व्वं संव्यव-हारः। यदेतद्धृदयं मनश्चैतत्संज्ञानमित्यादि श्रुत्यन्तरात्। साभिमानो हि सर्व्वं प्राणिसंव्यवहारः । अभिमानहेतुं च मरकतमणिदृष्टान्तेनावोचाम। यद्यप्येवमेतत्तथापि जाग्र-द्विषये सर्व्वकरणगोचरत्वादात्मज्योतिषो बुद्ध्यादि वाह्या-भ्यन्तर कार्य्यकरणव्यापारसन्निपातव्याकुलत्वान्न शक्यते। तज्ज्योतिरात्माख्यं मुञ्जेषीकावन्निष्कृष्य दर्शयितुमित्यतः स्वप्ने दिदर्शयिषुः प्रकुरुते। स समानः सन्नुभौ लोकाव-

---

आ॰ तर्हि वाह्यज्योतिः सद्भावावस्थायामकिञ्चित्करमात्मज्योतिरि-त्याशङ्क्याह । यदात्विति ॥ व्यतिरेकमुखेनोक्तमर्थमन्वयमुखेन कथयति । आत्मज्योतिरिति ॥ आत्मज्योतिषः सर्व्वानुग्राहकत्वे प्रमाणमाह । यदेतदिति ॥ सर्व्वमन्तःकरणादि प्रज्ञानेत्रमित्यैत-रेयके श्रवणादुक्तमात्मज्योतिषः सर्व्वानुग्राहकत्वमित्यर्थः ॥ किञ्चा-चेतनानां कार्य्यकरणानामचेतनत्वप्रसिद्ध्यनुपपत्त्या सदा चिदा-त्मव्याप्तिरेष्टव्येत्याह । साभिमानो हीति ॥ कथमसङ्गस्य प्रतीचः सर्व्वत्र बुद्ध्यादावहं मान इत्याशङ्क्याह। अभिमानेति ॥ उत्त-मनूद्योत्तरवाक्यमवतारयति । यद्यपीति ॥ यथोक्तमपि प्रत्य-ग्ज्योतिर्जागरिते दर्शयितुमशक्यमिति श्रुतिः स्वप्नं प्रस्तौतीत्यर्थः। तदशक्यत्वे हेतुद्वयमाह । सर्व्वेति ॥ स्वप्ने निष्कृष्टं ज्योतिरिति शेषः। सदृशः सन्ननुसञ्चरतीति सम्बन्धः। सादृश्यस्य प्रतियोगि

उ० स समानः सन्नुभौ लोकावनु सञ्चरति ध्यायतीव लेलायतीव ।

भा० नुसञ्चरति । यः स पुरुषः स्वयमेव ज्योतिरात्मा स समानः सदृशः सन् केन प्रकृतत्वात्सन्निहितत्वाच्च । हृदयेन हृदीति च । हृच्छब्दवाच्या बुद्धिः प्रकृता सा सन्निहिता च । तस्मात्तयैव सामान्यं । किं पुनः सामान्यमश्वमहिषवद्विवेकतोऽनुपलब्धिः । अवभास्या बुद्धिरवभासकं तदात्मज्योतिरालोकवदवभास्यावभासकयोर्विवेकतोऽनुपलब्धिः प्रसिद्धा । विशुद्धत्वाद्ध्यालोकोऽवभास्येन सदृशो भवति ॥

यथा रक्तमेव भासयन् आलोकरक्तसदृशो रक्ताकारो भवति । यथा हरितं नीलं लोहितं वाऽवभासयन्नालोकस्तत्सदृशस्तत्समानो भवति । तथा बुद्धिमवभासयन् बुद्धिद्वारेण कृत्स्नं क्षेत्रमवभासयतीत्युक्तं । मरकतमणि-

---

व्या० सापेक्षत्वमवेक्ष्य पृच्छति । केनेति ॥ उत्तरं । प्रकृतत्वादिति ॥ प्राणानामपि तुल्यं तदिति चेत्तत्राह । सन्निहितत्वाच्चेति ॥ हेतुद्वयं साधयति । हृदीत्यादिना ॥ प्रकृतत्वादिफलमाह । तस्मादिति ॥ सामान्यप्रश्नपूर्व्वकं विशदयति । किं पुनरित्यादिना ॥ विवेकतोऽनुपलब्धिं व्यक्तीकर्त्तुं बुद्धिज्योतिषोः स्वरूपमाह । अवभास्येति ॥ अवभासकत्वे दृष्टान्तमाह । आलोकवदिति ॥ तथापि कथं विवेकतोऽनुपलब्धिस्तत्राह । अवभास्येति ॥ प्रसिद्धिमेव प्रकटयति । विशुद्धत्वाद्धीति ॥

उक्तमर्थं दृष्टान्तेन बुद्धावारोपयति । यथेत्यादिना ॥ दृष्टान्तगतमर्थं दार्ष्टान्तिके योजयति । तथेति ॥ पुनरुक्तिं परिहरति । इत्युक्तमिति ॥ सर्व्वावभासकत्वे कथं बुद्ध्यैव साम्यमित्याशङ्क्याह । तेनेति ॥ सर्व्वावभासकत्वं तच्छब्दार्थः ॥ किमर्थं तर्हि

भा० निदर्शनेन। तेन सर्व्वेण समानो बुद्धिसामान्यद्वारेण सर्व्वमय इति च। अतएव वक्ष्यति। तेनासौ कुतश्चित्प्रविभज्य मुञ्जेषीकावत्स्वेन ज्योतीरूपेण दर्शयितुं न शक्यत इति सर्व्वव्यापारं तत्राध्यारोप्य नामरूपगतं ज्योतिर्धर्म्मञ्च नामरूपयोर्नामरूपे चात्मज्योतिषि सर्व्वो लोको मोमुह्यते। अयमात्मा नायमात्मेत्येवं धर्मी नैवं धर्मो कर्ताऽकर्ता शुद्धोऽशुद्धो बद्धो मुक्तः स्थितो गत आगतोऽस्ति नास्तीत्यादिविकल्पैः। अतः समानः सन्नुभौ लोकौ प्रतिपन्नप्रतिपत्तव्याविह लोकपरलोकावुपात्तौ। देहेन्द्रियादिसङ्घातत्यागान्योपादानसन्तानप्रबन्धशतसन्निपातैरनुक्रमेण सञ्चरति। धीसादृश्यमेवोभयलोकसञ्चरणहेतुर्न स्वत इति। तत्र नामरूपोपाधिसादृश्यं भ्रान्तिनिमित्तं यत्तदेव हेतुर्न स्वत इत्येतदुच्यते। यस्मात्स समानः सन्नुभौ लोकावनुक्रमेण सञ्चरति तदेतत्प्रत्यक्षमित्येतद्दर्शयति। यतो ध्यायतीव ध्यानव्यापारं करोतीव

व्या० बुद्ध्या सामान्यमुक्तमित्याशङ्क्य द्वारत्वेनेत्याह। बुद्धीति॥ आत्मनः सर्व्वेण समानत्वे वाक्यशेषमनुकूलयति। सर्व्वमय इति चेति॥ वाक्यशेषसिद्धेऽर्थे लोकभ्रान्तेर्गमकत्वमाह। तेनेति॥ सर्व्वमयत्वेनेति यावत्। आत्मानात्मनोर्विवेकदर्शनस्याशक्यत्वे परस्पराध्यासत्तद्धर्म्माध्यासश्च स्यात्तत्र लोकानां मोहो भवेदित्याह। इति सर्व्वेति। धर्म्मिविषयं मोहमभिनयति। अयमिति॥ धर्म्मविषयं मोहं दर्शयति। एवं धर्म्मेति॥ तदेव स्फुटयति। कर्त्तेत्यादिना॥ विकल्पैः सर्व्वो लोको मोमुह्यत इति सम्बन्धः॥ स समानः सन्नित्यस्यार्थमुक्त्वाऽवशिष्टभागं व्याकरोति। यत इत्यादिना॥ आत्मनः स्वाभाविकमुभयलोकसञ्चरणमित्याशङ्क्यानन्त-

उ॰ सहि स्वप्नो भूत्वेमं लोकमतिक्रामति मृत्यो रूपाणि ॥ ७ ॥

भा॰ चिन्तयतीव ध्यानव्यापारवतीं बुद्धिं स तत्स्थेन चित्स्वभावज्योतीरूपेणावभासयं तत्सदृशस्तत्समानः सन् ध्यायतीवाऽऽलोकवदेव। अतो भवति चिन्तयतीति भ्रान्तिर्लोकस्य। न तु परमार्थतो ध्यायति तथा लेलायतीवात्यर्थं चलतीव। तेष्वेव करणेषु बुद्ध्यादिषु वायुषु च चलत्सु। तदवभासकत्वात्तत्सदृशं तदिति लेलायतीव। न तु परमार्थतश्चलनधर्म्मकं तदात्मज्योतिः॥

कथं पुनरेतदवगम्यते। तत्समानत्वभ्रान्तिरेवोभयलोकसञ्चरणादिहेतुर्न स्वत इत्यस्यार्थस्य प्रदर्शनाय हेतुरुपदिश्यते। स आत्मा हि यस्मात्स्वप्नो भूत्वा स यया धिया

आ॰ इवाक्यमादत्ते। तत्रेति॥ आत्मा सप्तम्यर्थः। यतः शब्दो वच्यमाणोऽतः शब्देन सम्बध्यते। उत्तरोत्यमर्थमुक्त्वा वाक्यार्थमाह। ध्यानेति॥ ध्यानवतीं बुद्धिं व्याप्तश्चिदात्मा ध्यायतीवेत्यत्र दृष्टान्तमाह। आलोकवदिति॥ यथा खल्वालोको नीलं पीतं वा विषयं व्यश्नुवानस्तदाकारो दृश्यते तथा यमपि ध्यानवतीं बुद्धिं भासयन्ध्यानवानिव भवतीत्यर्थः॥ यथोक्तबुद्ध्यवभासकत्वमुक्तं हेतुमनूद्य फलितमाह। अत इति॥ इवशब्दार्थं कथयति। न त्विति॥ बुद्धिधर्म्माणामात्मन्यौपाधिकत्वं साधयति। तेष्विति॥ इवशब्दसामर्थ्यसिद्धमर्थमाह। न त्विति॥

स हीत्याद्यनन्तरवाक्यमाकाङ्क्षाद्वारोत्थापयति। कथमित्यादिना॥ तच्छब्दो बुद्धिविषयः। सञ्चरणादीत्यादिशब्दो ध्यानादिव्यापारसङ्ग्रहार्थः। स्वप्नो भूत्वा लोकमतिक्रामतीति सम्बन्धः॥ कथमात्मा स्वप्नो भवति तत्राह। स ययेति॥ उक्तोऽर्थे वाक्य-

भा॰ समानः साधीर्यद्भवति तत्तद्भावपि भवतीवात उच्यते । तस्माद्यदासौ स्वप्नो भवति स्वापवृत्तिं प्रतिपद्यते धीस्तदा सोऽपि स्वप्नवृत्तिं प्रतिपद्यते । यदा धीर्जिजागरिषति तदाऽसावप्यत आह । स्वप्नो भूत्वा स्वप्नवृत्तिमवभासयन् धियः स्वापवृत्त्याकारो भूत्वा इमं लोकं जागरितव्यवहा-रलक्षणं कार्यकरणसङ्घातात्मकं लौकिकशास्त्रीयव्यवहा-रास्पदमतिक्रामति अतीत्य क्रामति । विविक्तेन स्वेना-त्मज्योतिषा स्वप्नात्मिकां धीवृत्तिमवभासयन्नवतिष्ठते । यस्मात्तस्मात्स्वयं ज्योतिःस्वभाव एवासौ विशुद्धः सन् कर्तृक्रियाकारकफलशून्यः परमार्थतो धीसादृश्यमेवोभ-यलोकसञ्चारादिसव्यवहारभ्रान्तिहेतुर्मृत्यो रूपाणि मृत्युः कर्माविद्यादिर्न तस्यान्यद्रूपं स्वतः कार्यकरणान्येवास्य रूपाणि । अतस्तानि मृत्यो रूपाण्यतिक्रामति क्रियाफला-श्रयाणि । ननु नास्त्येव धियासमान । अन्यद्बुद्धेर्योऽवभास-कमात्मज्योतिर्धीव्यतिरेकेण प्रत्यक्षेण वानुमानेन वाऽनु-

---

व्या॰ सवतार्थं व्याकरोति । आहेति ॥ उक्तं हेतुमनूद्य फलितमाह । यस्मादित्यादिना ॥ कार्यकरणातीतत्वात्प्रत्यगात्मनो न स्वतः संसा-रित्वमित्यत आह । मृत्योरिति । रूपाण्यतिक्रामतीति पूर्वेण सम्बन्धः । क्रियास्तत्फलानि चाश्रयो येषां यानि वा क्रियाणां तत्फलानां चाश्रयस्तानीति यावत् । बुद्ध्यवभासकं ज्योतिरात्मे-त्युक्तं श्रुत्वा शाक्यः शङ्कते । नन्विति ॥ प्रमाणादतिरिक्तात्मोप-लब्धिरित्याशङ्क्य प्रत्यक्षमनुमानं चेति प्रमाणद्वैविध्यनियममभि प्रेत्य ताभ्यामतिरिक्तात्मानुपलम्भान्नासावस्तीत्याह । धीव्यतिरे केणेति ॥ तत्र दृष्टान्तमाह । यथेति ॥ घटादिरालोकस्तेत्युभयो

भा॰ पलम्भात्। यथान्या तत्काल एव द्वितीया धीः। यत्त्वत्र भास्यावभासकयोरन्यत्वेऽपि विवेकानुपलम्भात्सादृश्यमिति घटाद्यालोकयोः तत्र अवलन्यत्वेनालोकस्योपलम्भद्घटादेः संश्लिष्टयोः सादृश्यं भिन्नयोरेव। न च तथेह घटादिरिव धियोऽवभासकं ज्योतिरन्तरं प्रत्यक्षेण चानुमानेन वोपलभामहे। धीरेव हि चित्स्वरूपावभासकत्वेन हि स्वाकारविषयाकारा च। तस्मान्नानुमानतो नापि प्रत्यक्षतो धियोऽवभासकं ज्योतिः शक्यते प्रतिपादयितुं व्यतिरिक्तम्। यदपि दृष्टान्तरूपमभिहितमवभास्यावभासकयोर्भिन्नयोरेव घटाद्यालोकयोः संयुक्तयोः सादृश्यमिति। तत्राभ्युपगममात्रमस्माभिरुक्तं। न तु तत्र घटाद्यव भास्यावभासकौ भिन्नौ। परमार्थतस्तु घटादिरेवावभासात्मकः सालोकोऽन्योन्यो हि घटादिरुत्पद्यते। विज्ञानमात्र-

---

व्या॰ मिथः संसृष्टयोर्विवेकेनानुपलम्भवदवभास्यावभासकयोर्बुद्ध्यात्मनोर्भेदेऽपि पृथगनुपलम्भादैक्यमवभासते॥ वस्तुतस्तु तयोरन्यत्वमेवेति शङ्कामनुवदति। यत्त्विति॥ वैषम्यप्रदर्शनेनोत्तरमाह। तत्रेति॥ दृष्टान्तः सप्तम्यर्थः। घटादेरन्यत्वेनेति सम्बन्धः। ज्योतिरन्तरं नास्ति चेत्कुतो ग्राह्यग्राहकसंवित्तिरित्याशङ्क्याह। धीरेवेति॥ वाह्यार्थवादिनोः सौत्रान्तिकवैभाषिकयोरभिप्रायमुपसंहरति। तस्मान्नेति॥ इदानीं विज्ञानवादी वाह्यार्थवादिभ्यामभ्युपगतं दृष्टान्तमनुवदति। यदपीति॥

वाह्यार्थवादप्रक्रिया न सुगताभिप्रेतेति दूषयति। तत्रेति॥ उभयदृष्टान्तस्वरूपं सप्तम्यर्थः। ननु घटादेरवभास्यादालोकोऽवभासको भिन्नो लक्ष्यते नेत्याह। परमार्थतस्त्विति॥ तस्य स्थायित्वं व्यावर्त्तयति। अन्योऽन्य इति॥ प्रतीतं विषयप्राधान्यं व्यावर्त्त-

व वा सालोकघटादिविषयाकारमवभासते। यदैवं
दा न बाह्यो दृष्टान्तोऽस्ति विज्ञानलक्षणमात्रत्वात्सर्व्वस्य।
एवं तस्यैव विज्ञानस्य ग्राह्यग्राहकाकारतामलं परिकल्प्य-
तस्यैव पुनर्विशुद्धिं परिकल्पयन्ति। तद्ग्राह्यग्राहकविनिर्मुक्तं
विज्ञानं स्वच्छीभूतं क्षणिकं व्यवतिष्ठत इति केचित्। तस्यापि
शान्तिं केचिदिच्छन्ति। अन्ये तदपि विज्ञानं सावृतं ग्राह्य-
ग्राहकांशविनिर्मुक्तं शून्यमेव। घटादिबाह्यवस्तुवदित्य-
परे माध्यमिका आचक्षते। सर्व्वा एताः कल्पना बुद्धिविज्ञा-
नावभासकस्य व्यतिरिक्तस्यात्मज्योतिषोऽपह्नवादस्याश्रयो
मार्गस्य प्रतिपक्षभूतावैदिकस्य। तत्र येषां बाह्योर्थोऽस्ति
तान्प्रत्युच्यते। तावन्न स्वात्मानवभासकत्वाद्घटादेस्तमस्यव-
स्थितो घटादिस्तावन्न कदाचिदपि स्वात्मनावभास्यते।

---

१० यस्मुक्तमेव व्यनक्ति। विज्ञानमात्रमिति॥ विज्ञानवादे यथोक्त-
दृष्टान्तराहित्यं फलतीत्याह। यदेति॥ शिष्यबुद्ध्यनुसारेण
त्रिविधं बुद्धाभिप्रायमुपसंहरति। एवमित्यादिना॥ परिक-
ल्पयन्त्यन्तेन बाह्यार्थवादमुपसंहृत्य तस्यैवेत्यादिना विज्ञानवा-
दमुपसंजहार॥ तत्र विज्ञानवादोपसंहारं विवृणोति। तद्ग्रा-
ह्येति॥ शून्यवादिमतमाह। तस्यापीति॥ तदेव स्फुटयति।
तदपीति॥ पक्षत्रयेऽपि दोषं सम्भावयति। सर्व्वा इति॥ कथ-
मशेषां कल्पनानां दूषणमित्याशङ्क्य प्रथमं बाह्यार्थवादिनं
प्रत्याह। तत्रेति॥ निर्द्धारणे सप्तमी। यत्तु धीरेवावभासकत्वेन
साकारेति तत्राह। नेति॥ यदवभास्यं तत्स्वातिरिक्तावभास्यं
अवभास्यत्वात् यथा घटादि। अवभास्या चेयं बुद्धिरित्यनुमा-
नाद्बुद्ध्यतिरिक्तः साक्षी सिद्ध्यतीत्यर्थः॥ दृष्टान्तं साधयति। तम-
सीति॥ तस्यावभासकापेक्षां दर्शयितुं विशेषणं। सालोको घट
इति॥ संश्लेषावगमान्नास्ति घटस्य व्यतिरिक्तावभास्यत्वमित्याश-

भा० प्रदीपाद्यालोकसंयोगेन तु नियमेनैवावभास्यमानो दृष्टः । संश्लिष्टयोरपि घटालोकयोरन्यत्वमेव । पुनः पुनः संश्लेषे विश्लेषे च विशेषदर्शनाद्रज्जुघटयोरिव । अन्यत्वे च व्यतिरिक्तावभासकत्वं न स्वात्मनैव स्वमात्मानमवभासयति । ननु प्रदीपः स्वात्मानमेवावभासयन्दृष्ट इति । न हि घटादिवत् प्रदीपदर्शनाय प्रकाशान्तरमुपपाददते लौकिकाः । तस्मात्प्रदीपः स्वात्मानं प्रकाशयति नावभास्यत्वादिशेषात् ।

यद्यपि प्रदीपोऽन्यस्यावभासकः स्वयमवभासात्मकत्वात्तथापि व्यतिरिक्तचैतन्यावभास्यत्वं न व्यभिचरति घटादिवदेव । यदा चैवं तदा व्यतिरिक्तावभास्यत्वं तावदवश्यम्भावि । ननु यथा घटचैतन्यावभास्यत्वेपि व्यतिरिक्तमालोकान्तरमपेक्षते नत्वेवं प्रदीपोऽन्यमालोकान्तरमपे-

---

स्वा० ङ्क्याह । संश्लिष्टयोरपीति ॥ भवत्वन्यत्वं किं तावतेत्याशङ्क्याह । अन्यत्वे चेति ॥ व्यतिरिक्तावभासकत्वं तादृशावभासकसाहित्यमिति यावत् ॥ अवभासयति घटादिरिति शेषः ॥ दृष्टान्तस्य साध्यविकलत्वे परिहृते व्यभिचारमाशङ्कते । नन्विति ॥ तदेव व्यतिरेकमुखेनाह । न हीति ॥ अनैकान्तिकत्वं निगमयति । तस्मादिति ॥ प्रदीपस्य पक्षतुल्यत्वान्न व्यभिचारोऽस्तीति परिहरति । नावभास्यत्वेति ॥

अथान्यावभासकत्वात्तस्य नान्याभास्यत्वमिति चेत्तत्राह । यद्यपीति ॥ अवभास्यत्वहेतोरव्यभिचारे फलितमाह । यदा चेति ॥ व्यतिरिक्तावभास्यत्वं बुद्धेरिति शेषः ॥ अवभास्यत्वे सत्यपि प्रदीपे स्वातिरिक्तेनैवावभास्यत्वमिति नियमासिद्धेर्व्यभिचारतादवस्थ्यमिति शङ्कते । नन्विति ॥ यदि प्रदीपस्य स्वावभास-

ते । तस्मात्प्रदीपोऽन्यावभास्योऽपि सन्नात्मानमवभासयति। न स्वतः परतो वा विशेषाभावात्। यथा चैतन्यावभास्यत्वं घटस्य तथा प्रदीपस्यापि चैतन्यावभास्यत्वमविशिष्टं। यत्तूच्यते प्रदीप आत्मानं घटञ्चावभासयतीति तदसत्। कस्माद्यदात्मानं नावभासयति तदा कीदृशः स्यात्। न हि तदा प्रदीपस्य स्वतो वा परतो वा विशेषः कश्चिदुपलभ्यते। स नाम ह्यवभास्यो भवति। यदाऽस्यावभासकः सन्निधावसन्निधौ च विशेष उपलभ्यते। न हि प्रदीपस्य स्वात्मसन्निधिरसन्निधिर्वा शक्यः कल्पयितुं। असति च कादाचित्के विशेष आत्मानं प्रदीपः प्रकाशयतीति मृषैवोच्यते। चैतन्यग्राह्यकत्वन्तु घटादिभिरविशिष्टं प्रदीपस्य। तस्माद्विज्ञानस्यात्मग्राह्यग्राहकत्वेन प्रदीपो दृष्टान्तश्चैतन्य-

---

नात् पूर्व्वमसन्निशेषः समनन्तरकाले स्यात्। तदा स्वात्मानं भासयतीति वक्तुं युक्तं न च सोऽस्तीति दूषयति। नेत्यादिना॥ तदेव विवृणोति। यथेति॥ अवभास्यत्वाविशेषादित्यर्थः॥ प्रदीपे परोक्तं विशेषमनुभाष्य दूषयति। यत्त्वित्यादिना॥ यदा दीपो न स्वात्मानं भासयति तदानवभासमानः स्यादित्याशङ्क्याह। न हीति॥ विशेषाभावेऽपि दीपस्य स्वेनैवावभास्यत्वं किं न स्यादिति चेत्तत्राह। स नाम हीति॥ दीपस्य विशेषान्तराभावेऽपि स्वात्मसन्निध्यसन्निधी विशेषावित्याशङ्क्याह। न हीति॥ दीपस्य स्वेनान्येन वा स्वल्पविशेषाभावे फलितमाह। असतीति॥ व्यभिचारनिरासपूर्व्वकं भास्यत्वानुमानमुपपाद्यानुमानान्तरमाह। चैतन्येति॥ यद्ग्राह्यं तत्स्वविजातीयग्राह्यं यथा रूपादि। ग्राह्यञ्च विज्ञानं तस्माद्विज्ञानव्यतिरिक्तश्चिदात्मा सिद्ध्यतीत्यर्थः॥ प्रदीपस्य न स्वावभास्यत्वं किन्तु विजातीयचैतन्यावभास्यत्वमिति स्थिते फलितमाह। तस्मादिति॥ यद्ग्राह्यं तद्ग्राहकान्तर-

भा० ग्राह्यत्वं च विज्ञानस्य बाह्यविषयैरविशिष्टं। चैतन्यग्राह्यत्वे च विज्ञानस्य किं ग्राह्यविज्ञानग्राह्यतैव किं वा ग्राहक-विज्ञानग्राह्यतेति तत्र सन्दिह्यमाने वस्तुनि यथान्यत्र दृष्टो न्यायः कल्पयितुं युक्तो न तु दृष्टविपरीतः। तथा च सति यथा व्यतिरिक्तेनैव ग्राहकेण बाह्यानां प्रदीपादीनां ग्राह्यत्वं दृष्टं तथा विज्ञानस्यापि चैतन्यग्राह्यत्वात्। प्रकाशकत्वे सत्यपि प्रदीपवद्व्यतिरिक्तचैतन्यग्राह्यत्वं युक्तं कल्पयितुं न त्वनन्यग्राह्यत्वं। यस्मान्यो विज्ञानस्य ग्रहीता स आत्मा ज्योतिरन्तरं विज्ञानात्तदाऽनवस्थेति चेन्न॥

ग्राह्याग्राह्यत्वमात्रं हि तद्ग्राहकस्य वस्त्वन्तरत्वे लिङ्ग-मुक्तं न्यायतः। न त्वेकान्तग्राहकत्वे तद्ग्राहकान्तरास्तित्वे वा कदाचिदपि लिङ्गं सम्भवति। तस्मान्न तदनवस्थाप्रसङ्गः। विज्ञानस्य व्यतिरिक्तग्राह्यत्वे करणान्तरापेक्षायामनवस्थेति चेत्। न नियमाभावात्। न हि सर्व्वत्रायं नियमो भवति। यत्र वस्त्वन्तरेण गृह्यते वस्त्वन्तरं तत्र ग्राह्यग्राहकव्यतिरिक्तं

आ० ग्राह्यं यथा दीपः॥ ग्राह्यं चेदविज्ञानमित्यनुमानान्तरमाह। चैतन्येति॥ तथापि कथं त्वदिष्टग्राहकसिद्धिरित्याशङ्क्य विमृशति। चैतन्यग्राह्यत्वे चेति॥ कथं तर्हि निर्णयस्तत्राह। इति सन्दिह्यमान इति॥ अस्तु लोकानुसारी निश्चयो लोकस्तु कथमित्याशङ्क्याह। तथा चेति॥ तथापि कुतो विवक्षितात्मज्योतिस्तत्राह। यस्येति॥

विज्ञानस्य ग्राहकान्तरग्राह्यत्वे तस्यापि ग्राहकान्तरापेक्षायामनवस्थाप्रसक्तिरिति शङ्कते। अनवस्थेति चेदिति॥ कूटस्थबोधस्य विज्ञानसाक्षिणोऽविषयत्वान्नानवस्थेति परिहरति। नेति॥ यद्ग्राह्यं तत्स्वातिरिक्तग्राह्यं यथा घटादीति ग्राह्यत्वमात्रं

करणान्तरं स्यादिति नैकान्तेन नियन्तुं शक्यते। वैचित्र्यदर्शनात्। कथं घटस्तावत्स्वात्मव्यतिरिक्तेनात्मना गृह्यते तत्र प्रदीपादिरालोको ग्राह्यग्राहकव्यतिरिक्तं करणं। न हि प्रदीपाद्यालोके घटांशश्चक्षुरंशो वा। घटवच्चक्षुर्ग्राह्यत्वेऽपि प्रदीपस्य चक्षुः प्रदीपव्यतिरिक्तेण बाह्यमालोकस्थानीयं किञ्चित्करणान्तरमपेक्षते। तस्मान्नैव नियन्तुं शक्यते। यत्र यत्र व्यतिरिक्तं ग्राह्यत्वं तत्र तत्र करणान्तरं स्यादेवेति। तस्माद्विज्ञानस्य व्यतिरिक्तग्राहकग्राह्यत्वेन करणद्वारानवस्था नापि ग्राहकद्वारा कदाचिदप्युपादयितुं शक्यते तस्मात्सिद्धं विज्ञानव्यतिरिक्तमात्मज्योतिरन्तरमिति। ननु नास्त्येव बाह्योऽर्थो घटादिः प्रदीपो वा विज्ञानव्यतिरिक्तः। यद्धि यद्व्यतिरेकेण नोपलभ्यते तत्तावन्मात्रं वस्तु दृष्टं। यथा स्वप्नविज्ञानग्राह्यं घटपटादिवस्तु स्वप्नविज्ञान-

---

१० बुद्धिग्राहकस्य ततो वस्त्वन्तरत्वे प्रदीपस्य स्वानवभास्यत्वन्यायेन लिङ्गमुक्तं। न च बुद्धिसाक्षिणो ग्राह्यत्वमस्ति कूटस्थदृष्टिस्वाभाव्यात्तत्कुतोऽनवस्थेत्युपपादयति। ग्राह्यत्वमात्रं हीति ॥ साक्षी स्वातिरिक्तग्राह्यो ग्राहकत्वाद्बुद्धिवदित्याशङ्क्याह। न त्विति ॥ ग्राहकत्वं हि ग्रहणकर्तृत्वं वा साक्षित्वं वा आद्ये बुद्धिसाक्षिणो मुख्यवृत्त्याग्रहणकर्तृत्वेन किञ्चिल्लिङ्गं सम्भवति ॥ द्वितीये तस्य ग्राहकान्तराभावेन कदाचिदपि प्रमाणमस्ति तत्कुतोऽनवस्थेत्यर्थः ॥ ग्राहकानवस्थां परिहृत्य करणानवस्थामाशङ्कते। विज्ञानस्येति ॥ तस्य ग्राह्यत्वे चक्षुरादिस्थानीयेन करणेन भवितव्यं ॥ तस्यापि ग्राह्यत्वेऽन्यत्करणमित्यनवस्थां दूषयति। न नियमाभावादिति ॥ नियमाभावं साधयति। न हीत्यादिना ॥ वैचित्र्यदर्शनमाकाङ्क्षापूर्वकं स्फुटयति। कथमित्यादिना ॥ उभयव्यतिरेकं दर्शयति।

भा० व्यतिरेकेणानुपलम्भात्स्वप्नघटप्रदीपादेः स्वप्नविज्ञानमात्रतावगम्यते। तथा जागरितेऽपि घटप्रदीपादेर्जाग्रद्विज्ञानव्यतिरेकेणानुपलम्भाज्जाग्रद्विज्ञानमात्रतैव युक्ता भवितुं। तस्मान्नास्ति बाह्योऽर्थो घटप्रदीपादिर्विज्ञानमात्रमेव तु सर्व्वं। तत्र यदुक्तं विज्ञानस्य व्यतिरिक्तावभास्यत्वाद्विज्ञानव्यतिरिक्तमस्ति। ज्योतिरन्तरं घटादिरिवेति तन्मिथ्या। सर्व्वस्य विज्ञानमात्रत्वे दृष्टान्ताभावात्।

न यावत्तावदभ्युपगमात्। न तु बाह्योऽर्थो भवतैकान्तेनैव नाभ्युपगम्यते। ननु मया नाभ्युपगम्यत एव। न विज्ञानं घटः प्रदीप इति च शब्दार्थपृथक्त्वाद्यावत्तावदपि बाह्यमर्थान्तरमवश्यमभ्युपगन्तव्यं। विज्ञानादर्थान्तरं वस्तु न चेदभ्युपगम्यते विज्ञानं घटः पट इत्येवमादीनां शब्दा-

---

आ० न हीति॥ तथापि कथं वैचित्र्यं तत्राह। घटवदिति॥ नियमाभावमुपसंहरति। तस्मादिति॥ अनवस्थादयंनिराकरणं निगमयति। तस्माद्विज्ञानस्येति॥ वाह्यार्थवादिमतनिराकरणमुपसंहरति। तस्मात्सिद्धमिति॥ वाह्यार्थवादिनि ध्वस्ते विज्ञानवादी चोदयति। नन्विति॥ वाह्यार्थो विज्ञानातिरिक्तो नास्तीत्यत्र प्रमाणमाह। यद्धीति॥ नोपलभ्यते च जाग्रदस्तु जाग्रद्विज्ञानव्यतिरेकेणेति शेषः॥ दृष्टान्तं समर्थयते। स्वप्नेति॥ दार्ष्टान्तिकं विवृणोति। तथेति॥ उक्तमनुमानमुपसंहरति। तस्मादिति॥ सर्व्वविज्ञानमात्रमिति स्थिते फलितमाह। तत्रेति॥ किमिति तस्य मिथ्यात्वं तत्राह। सर्व्वस्येति॥ वाह्यार्थापलापवादिनं दूषयति॥

नेत्यादिना॥ हेतुं विशदयति। नत्विति॥ विज्ञानमात्रवादित्वादेकान्तेन वाह्यार्थानभ्युपगतिरिति शङ्कते। नन्विति॥ वाह्यार्थं हठादङ्गीकारयति। नेत्यादिना॥ अन्वयमुखेनोक्तमर्थं व्यतिरेक-

भा० नामेकार्थत्वे पर्य्यायशब्दत्वं प्राप्नोति । तथा साधनानां फलस्य चैकत्वे साध्यसाधनभेदोपदेशशास्त्रानर्थक्यप्रसङ्गः । तत्कर्त्तुरज्ञानप्रसङ्गो वा । किञ्चान्यद्विज्ञानव्यतिरेकेण वादिप्रतिवादिवाददोषाभ्युपगमात् । न ह्यात्मविज्ञानमात्रमेव वादी प्रतिवादी प्रतिवादिवादस्तद्दोषो वाभ्युपगम्यते । निराकर्त्तव्यत्वात्प्रतिवाद्यादीनां । न ह्यात्मीयविज्ञानं निराकर्त्तव्यमभ्युपगम्यते स्वयं वात्मा कस्यचित् । तथा च सति सर्व्वसंव्यवहारलोपप्रसङ्गः । न च प्रतिवाद्यादयः स्वात्मनैव गृह्यन्त इत्यभ्युपगमः । व्यतिरिक्त ग्राह्याश्चैत अभ्युपगम्यन्ते । तस्मात्तत्सर्व्वमेव व्यतिरिक्तग्राह्यं वस्तु जाग्रद्विषयत्वाज्जाग्रद्वस्तु प्रतिवाद्यादिवदिति सुलभो दृष्टान्तः । सन्तान्तरवद्विज्ञानान्तरवच्चेति । तस्माद्विज्ञानवादिनापि न

व्या० मुखेन विघटयति । विज्ञानादिति ॥ ज्ञानज्ञेययोरैक्ये दोषान्तरमाह । तथेति ॥ अनर्थकं शास्त्रमुपदिशतो बुद्धस्य सर्व्वज्ञत्वं न स्यादित्याह । तत्कर्त्तुरिति ॥ वा शब्दश्चार्थः ॥ इतश्च सर्व्वस्य नास्ति विज्ञानमात्रत्वमित्याह । किञ्चान्यदिति ॥ न केवलं पूर्व्वोक्तोपपत्तिवशादेव बाह्योर्थोऽभ्युपेयः किन्तु तत्रैवान्यदपि कारणमुच्यत इति यावत् ॥ तदेव स्फुटयति । विज्ञानेति ॥ यद्ग्राह्यं तत्स्वव्यतिरिक्तग्राह्यं यथा प्रतिवाद्यादि जाग्रद्वस्तु चेदं ग्राह्यमित्यनुमानान्न बाह्यार्थापलापसिद्धिरित्यर्थः ॥ दृष्टान्ते विप्रतिपत्तिं प्रत्याह । न हीति ॥ निराकर्त्तव्यत्वेऽपि तेषां ज्ञानमात्रत्वं किं न स्यादित्याशङ्क्यात्मीयज्ञानत्वं वा तेषामिति विकल्प्य क्रमेण दूषयति । न हीत्यादिना ॥ स्वकीयनिषेधे चानिष्टापत्तिमाचष्टे । तथा चेति ॥ त्वदङ्गीकारालोचनायामपि प्रतिवाद्यादीनां विज्ञानातिरेकः सेत्स्यतीत्याह । न चेति । अन्यथा विवादाभावापातादिति भावः ॥ कथं तर्हि तेषामङ्गीकारस्तत्राह । व्यतिरिक्तेति ॥ सिद्धे दृष्टान्ते

भा॰ शक्यं विज्ञानव्यतिरिक्तं ज्योतिरन्तरं निराकर्त्तुं । स्वप्ने विज्ञानव्यतिरेकाभावादयुक्तमिति चेत् । नाभावादपि भावस्य वस्त्वन्तरत्वोपपत्तेः। भवत्येव तावत्स्वप्ने घटादिविज्ञानस्य भूतभावत्वमभ्युपगतं । तदभ्युपगम्य तद्व्यतिरेकेण घटाद्यभाव उच्यते ॥

स विज्ञानविषयो घटादिः। यद्यभावो यदि वा भावः स्यादुभयथापि घटादिविज्ञानस्य भावभूतत्वमभ्युपगतमेव। न तु तन्निवर्त्तयितुं शक्यते। तन्निवर्त्तकन्यायाभावात्। एतेन सर्व्वस्य शून्यता प्रत्युक्ता। प्रत्यगात्मग्राह्यता चात्मनोऽहमिति मीमांसकपक्षः प्रत्युक्तः। यत्तूक्तं सालोकोऽन्यस्यान्यस्य

व्या॰ फलितमनुमानं निगमयति। तस्मादिति। किञ्च चैत्रसन्तानेन मैत्रसन्तानो व्यवहारादनुमीयते सर्व्वज्ञज्ञानेन चासर्व्वज्ञज्ञानानि ज्ञायन्ते। तत्र भेदस्य तेऽपि सिद्धेस्तद्दृष्टान्तान्नीलादेस्तद्धि यस्य भेदः शक्योऽनुमातुमित्याह। सन्तत्यन्तरवदिति ॥ न वाह्यार्थापलापसिद्धिरिति शेषः ॥ तदपलापासम्भवे फलितमाह। तस्मादिति ॥ विज्ञानार्थभेदोक्त्या प्रत्यगात्मा विज्ञानातिरिक्त उक्तः॥ सम्प्रति विमतं न ज्ञानाभिन्नं ग्राह्यत्वात्स्वप्नग्राह्यवदित्युक्तमनुवदति। स्वप्न इति ॥ अयुक्तं विज्ञानातिरिक्तत्वमर्थस्येति शेषः॥ दृष्टान्तस्य साध्यविकलतामभिप्रेत्य परिहरति। नाभावादपीति ॥ सङ्ग्रहवाक्यं विवृणोति। भवत्येवेति ॥ वाह्यार्थवादिभ्यो विशेषमाह। तदभ्युपगम्येति ॥

तथापि कथं दृष्टान्तस्य साध्यविकलतेत्याशङ्क्याह। स इति ॥ घटादिविज्ञानस्य भावभूतस्याभ्युपगतस्य घटादेर्भावादभावाद्वा विषयादर्थान्तरत्वाद्यस्य कस्यचिद्वाह्यार्थस्योपगमाद्दृष्टान्तस्य साध्यविकलता सुप्रसिद्धेत्यर्थः॥ माध्यमिकमतमतिदेशेन निराकरोति। एतेनेति ॥ ज्ञानज्ञेययोर्निराकर्त्तुमशक्यत्ववचनेनेति यावत् ॥ आत्मनो ग्राह्यस्याहमिति प्रत्यगात्मनैव ग्राह्यतेति

१॰घटो जायत इति तदसत्। क्षणान्तरे स एवायं घट इति प्रत्यभिज्ञानात्। सादृश्यात्प्रत्यभिज्ञानं लूनोत्थितकेशनखादिष्विवेति चेत्। न तत्रापि क्षणिकत्वस्यासिद्धत्वात्। जात्येकत्वाच्च। लूनेषु पुनरुत्थितेषु च केशनखादिषु केशनखत्वजातेरेकत्वात्केशनखत्वप्रत्ययस्तन्निमित्तोऽभ्रान्त एव। न हि दृश्यमानलूनोत्थितकेशनखादिषु व्यक्तिनिमित्तः स एवेति प्रत्ययो भवति। कस्यचिद्दीर्घकालव्यवहितदृष्टेषु च तुल्यपरिमाणेषु तत्कालीनबालादितुल्या इति प्रत्ययो भवति न तु त एवेति। घटादिषु पुनर्भवति स एवेति प्रत्ययः। तस्मान्न समो दृष्टान्तः। प्रत्यक्षेण हि प्रत्यभिज्ञायमाने वस्तुनि तदेवेति। न चान्यत्वमनुमातुं युक्तं प्रत्यक्षविरोधे लिङ्गस्याभासोपपत्तेः। सादृश्यप्रत्ययानुपपत्तेश्च।

व्या॰ मीमांसकमतमपि प्रत्युक्तमेकस्यैव ग्राह्यग्राहकतायाः निरस्तत्वादित्याह। प्रत्यगात्मेति॥ क्षणभङ्गवादिनोक्तमनूद्य प्रत्यभिज्ञाविरोधेन निराकरोति। यत्तूक्तमित्यादिना॥ स्वपक्षेऽपि प्रत्यभिज्ञोपपत्तिं प्राप्तः शङ्कते। सादृश्यादिति॥ दृष्टान्तं विघटयन्नुत्तरमाह। न तत्रापीति॥ तथापि कथं तत्र प्रत्यभिज्ञेत्याशङ्क्याह। जातीति॥ तन्निमित्ता तेषु प्रत्यभिज्ञेति शेषः॥ तदेव प्रपञ्चयति। लूनेष्विति॥ अभ्रान्त इति छेदः॥ किमिति जातिनिमित्तैषा धीर्व्यक्तिनिमित्ता किं न स्यादत आह। न हीति॥ ननु सादृश्यवशाद्व्यक्तिमेव विषयीकृत्य प्रत्यभिज्ञानं केशादिषु किं न स्यात्तत्राह। कस्यचिदिति॥ अभ्रान्तस्येति यावत्॥ दार्ष्टान्तिकवैषम्यमाह। घटादिष्विति॥ वैषम्यमुपसंहरति। तस्मादिति॥ यत्सत्तत्क्षणिकं यथा प्रदीपादि। सन्तश्चामी भावा इत्यनुमानविरोधाक्रान्तं प्रत्यभिज्ञानमित्याशङ्क्याह। प्रत्यक्षेणेति॥ अनुमातानुमानयोः प्रत्यक्षविरोधे क्षणिकत्वानुमानं नोदेत्यबाधितविषयत्व-

भा० ज्ञानस्य क्षणिकत्वात्। एकस्य हि वस्तुदर्शिनो वस्त्वन्तरदर्शने सादृश्यप्रत्ययः स्यात्। न तु वस्तुदर्श्येको वस्त्वन्तरदर्शनाय क्षणान्तरमवतिष्ठते। विज्ञानस्य क्षणिकत्वात्सकृद्वस्तुदर्शनेनैव क्षयोपपत्तेः। तेनेदं सदृशमिति हि सादृश्यप्रत्ययो भवति। तेनेति दृष्टस्मरणमिदमिति वर्त्तमानप्रत्ययस्तेनेति दृष्टं स्मृत्वा यावदिदमिति वर्त्तमानं क्षणकालमवतिष्ठेत्। ततः क्षणवादहानिः।

अथ तेनेत्येवोपक्षीणः स्मार्त्तः प्रत्यय इदमिति चान्य एव वार्त्तमानिकः प्रत्ययः। क्षीयते ततः सादृश्यप्रत्ययानुपपत्तिस्तेनेदं सदृशमिति। अनेकदर्शिन एकस्याभावात्। व्यपदेशानुपपत्तिश्च द्रष्टव्यदर्शनेनैवोपक्षयाद्विज्ञानस्येदं दृष्ट*मदोऽद्राक्षमिति व्यपदेशानुपपत्तिर्दृष्ट-

---

व्या० स्याप्यनुमित्यङ्गत्वादिति भावः॥ इतश्च प्रत्यभिज्ञानं सादृश्यनिबन्धनो भ्रमो न भवतीत्याह। सादृश्येति॥ तदनुपपत्तौ हेतुमाह। ज्ञानस्येति॥ तस्य क्षणिकत्वेऽपि किमिति सादृश्यप्रत्ययो न सिध्यतीत्याशङ्क्याह। एकस्येति॥ अस्तु तर्हि वस्तुद्वयदर्शित्वमेकस्येति चेन्नेत्याह। न त्विति॥ उक्तमेवार्थं प्रपञ्चयति। तेनेत्यादिना॥

भवतु किन्तावतेति तत्राह। तेनेति॥ दृष्टमित्यवतिष्ठेत यदीति शेषः॥ क्षणिकत्वहानिपरिहारं शङ्कित्वा परिहरति। अथेत्यादिना॥ तत्र हेतुमाह। अनेकेति॥ परपक्षे दोषान्तरमाह। व्यपदेशेति॥ तदेव विवृणोति। इदमिति॥ व्यपदेशक्षणेऽनवस्थानासिद्धिं शङ्कित्वा दूषयति। अथेत्यादिना॥ अन्यो द्रष्टान्यश्च व्यपदेष्टेत्याशङ्क्य परिहरति। अथेत्यादिना॥ शास्त्र-

---

* पश्यमीति पाठान्तरः।

भा० वतो व्यपदेशक्षणानवस्थानात्। अथावतिष्ठेत क्षणवादहानिः। अथादृष्टवतो व्यपदेशः सादृश्यप्रत्ययश्च तदानीं जात्यन्धस्येव रूपविशेषव्यपदेशस्तत्सादृश्यप्रत्ययश्च सर्व्वमन्धपरम्परेति प्रसज्येत सर्व्वज्ञशास्त्रप्रणयनादि। न चैतदिष्यते। अकृताभ्यागमकृतविप्रनाशदोषौ तु प्रसिद्धतरौ क्षणवादे। दृष्टव्यपदेशहेतुः पूर्व्वोत्तरसहित एक एव हि शृङ्खलावत्प्रत्ययो जायत इति चेत्। तेनेदं सदृशमिति च। न वर्त्तमानातीतयोर्भिन्नकालत्वात्तत्र वर्त्तमानप्रत्यय एकः शृङ्खलावयवस्थानीयोऽतीतश्चापरस्तौ प्रत्ययौ भिन्नकालौ तदुभयप्रत्ययविषयस्पृक्चेच्छृङ्खलाप्रत्ययः। ततः क्षणद्वयव्यापित्वादेकस्य विज्ञानस्य पुनः क्षणवादे हानिः। ममत्ववतादिविशेषानुपपत्तेश्च सर्व्वसंव्यवहारालापप्रसङ्गः। सर्व्वस्य च स्वसंवेद्यविज्ञानमात्रत्वे विज्ञानस्य च स्वच्छाववोधावभासमात्र-

---

व्या० प्रणयनादीत्यादिशब्देन शास्त्रीयं साध्यसाधनादि गृह्यते। क्षणिकत्वपक्षे दूषणान्तरमाह। अकृतेति॥ व्यपदेशानुपपत्तिमुक्ता समादधानः शङ्कते। दृष्टेति॥ सादृश्यप्रत्ययस्य शृङ्खलास्थानीयेन प्रत्ययेनैव सेत्स्यतीत्याह। तेनेदमिति॥ अपसिद्धान्तप्रसक्त्या प्रत्याचष्टे। नेत्यादिना॥ तावेवोभौ प्रत्ययौ विषयौ तदवगाही चेन्मध्यवर्त्ती शृङ्खलावयवस्थानीयः प्रत्यय इति यावत्॥ क्षणानां मिथः सम्बन्धस्तर्हि माभूदिति चेत्तत्राह। ममेति॥ व्यपदेशसादृश्यप्रत्ययानुपपत्तिस्तु स्थितैवेति चकारार्थः॥ यत्तु विज्ञानस्य दुःखाद्युपप्लुतत्वं तद्दूषयति। सर्व्वस्य चेति॥ शुद्धत्वात्तत्संसर्गाद्यभावाच्च न ज्ञानस्य दुःखादिसम्भवः स्वसंवेद्यत्वाङ्गीकारादित्यर्थः॥ ज्ञानस्य शुद्धबोधैकस्वाभाव्यमसिद्धं दाडिमादिवन्नानाविधदुःखाद्यंशवत्त्वाश्रवणादित्याशङ्क्याह। न चेति॥ तत्रैव हेत्वन्तरमाह।

भा० स्वाभाव्याभ्युपगमात्तद्दर्शिनश्चान्यस्याभावे ऽनित्यदुःखशून्यानात्मत्वाद्यनेककल्पनानुपपत्तिः। न च दाडिमादेरिव विरुद्धानेकांशवत्त्वं विज्ञानस्य स्वच्छावभासस्वाभाव्याद्विज्ञानस्य। अनित्यदुःखादीनां विज्ञानांशत्वे च सत्यनुभूयमानत्वाद्व्यतिरिक्तविषयत्वप्रसङ्गः। अथानित्यदुःखाद्यात्मैकत्वमेव विज्ञानस्य तदा तद्वियोगाद्विशुद्धिकल्पनानुपपत्तिः॥

संयोगिमलवियोगाद्धि विशुद्धिर्भवति। यथादर्शप्रभृतीनां। न तु स्वाभाविकेन धर्म्मेण कस्यचिद्वियोगो दृष्टः। न ह्यग्नेः स्वाभाविकेन प्रकाशेनौष्ण्येन वा वियोगो दृष्टः। यदपि पुष्पगुणानां रक्तत्वादीनां द्रव्यान्तरयोगेन वियोजनं दृश्यते तत्रापि संयोगपूर्व्वत्वमनुमीयते। वीजभावनया पुष्पफलादीनां गुणान्तरोत्पत्तिदर्शनात्। अतो विज्ञानस्य विशुद्धिकल्पनानुपपत्तिः। विषयविषय्याभासत्वञ्च

आ० अनित्येति॥ तेषां तद्धर्म्मत्वे सत्यनुभूयमानत्वात्ततोऽतिरिक्तत्वं स्याद्धर्म्माणां धर्म्मिमात्रत्वाभावान्मेयानाञ्च मानादर्थान्तरत्वादतो यन्मेयं तज्ज्ञानांशो यथा घटादिमेयं च दुःखादीत्यर्थः। ज्ञानस्य दुःखादिधर्म्मो न भवति किन्तु स्वरूपमेवेति शङ्कामनुभाष्य दोषमाह। अथेत्यादिना॥

अनुपपत्तिमेव प्रकटयति। संयोगीत्यादिना॥ स्वाभाविकस्यापि वियोगोऽस्ति पुष्परक्तत्वादीनां तथोपलम्भादित्याशङ्क्याह। यदपीति॥ द्रव्यान्तरशब्देन पुष्पसम्बन्धिनोऽवयवास्तद्गतरक्तत्वाद्यारम्भका विवक्षिताः। विमतं संयोगपूर्व्वकं विभागवत्त्वान्मेषादिवदित्यनुमानान्न स्वाभाविकस्य सति वस्तुनि नाशोऽस्तीत्यर्थः॥ अनुमानानुगुणं प्रत्यक्षं दर्शयति। वीजेति॥ कार्पासादिवीजे द्रव्यविशेषसम्पर्कान्नक्तादिवासनया पुष्पादीनां रक्तादि-

भा॰ यन्मलं परिकल्प्यते विज्ञानस्य तदप्यन्यसंसर्गाभावाद-नुपपन्नं। न ह्यविद्यमानेन विद्यमानस्य संसर्गः स्यात्। असति चान्यसंसर्गे यो धर्मो यस्य दृष्टः स तत्स्वभावत्वान्न तेन वियोगमर्हति। यथाग्नेरौष्ण्यं सवितुर्वा प्रभा। तस्मा-दन्यसंसर्गेण मलिनत्वं तद्विशुद्धिश्च विज्ञानस्येतीयं कल्प-नान्धपरंपरेव प्रमाणशून्येत्यवगम्यते। यदपि तस्य विज्ञा-नस्य निर्वाणं पुरुषार्थं कल्पयन्ति तत्रापि फलाश्र-यानुपपत्तिः। कण्टकविशुद्धस्य हि कण्टकवेधजनितदुःख-निवृत्तिफलं न तु कण्टकविद्धमरणे तद्दुःखनिवृत्तिफल-स्याश्रय उपपद्यते। तद्वत्सर्वनिर्वाणेऽसति फलाश्रये पुरुषार्थकल्पना व्यर्थैव। यस्य पुरुषशब्दवाच्यस्य हि सत्त्व-

---

व्या॰ गुणोदयोपलम्भात्तत्संयोगिद्रव्यापगमादेव तत्पुष्पादिषु रक्तत्वा-द्यपगतिरित्यर्थः॥ विशुद्ध्यनुपपत्तिमुपसंहरति। अत इति॥ कल्पनान्तरमनूद्य दूषयति। विषयविषयीति॥ कथं पुनर्ज्ञान-स्यान्येन संसर्गाभावस्तस्य विषयेण संसर्गादित्याशङ्क्याह। न हीति॥ अथान्यसंसर्गमन्तरेणापि ज्ञानस्य विषयविषय्याभास-त्वमलं स्यादिति चेत्तत्राह। असति चेति॥ कल्पनाद्वयमप्रामा-णिकमनादेयमित्युपसंहरति। तस्मादिति॥ कल्पनान्तरमुत्था-पयति। यदपीति॥ उपशान्तिर्निर्वाणशब्दार्थः॥ दूषयति। तत्रापीति॥ फल्यभावेऽपि फलं स्यादिति चेन्नेत्याह। कण्टकेति॥ दार्ष्टान्तिकं विवृणोति। यस्य हीति॥ ननु त्वन्मतेऽपि वस्तुनो ऽद्वयत्वात्तस्यासङ्गस्य केनचिदपि संयोगवियोगयोरयोगात्फ-लित्वासम्भवे मोक्षासम्भवादितुल्यमित्याशङ्क्याह। यस्य पुन-रिति॥ यद्यपि पूर्वं वस्तु वस्तुतो सङ्गमङ्गीक्रियते। तथापि क्रियाकारकफलभेदस्याविद्यामात्रकृतत्वादस्मन्मते सर्वव्यवहार-सम्भवान्न साम्यमिति भावः॥ ननु बाह्यार्थवादो विज्ञानवादश्च

उ० स वाऽयं पुरुषो जायमानः शरीरमभिसम्पद्य-

भा० स्यात्मनो विज्ञानस्य चार्थः परिकल्प्यते तस्य पुनः पुरुषस्य निर्वाणे कस्यार्थः पुरुषार्थ इति स्यात्। यस्य पुनरस्त्यनेकार्थदर्शी विज्ञानव्यतिरिक्त आत्मा तस्य दृष्टस्मरणदुःखसंयोगवियोगादि सर्व्वमेवोपपन्नमन्यसंयोगनिमित्तं कालुष्यं तद्वियोगनिमित्ता च विशुद्धिरिति । शून्यवादिपक्षस्तु सर्व्वप्रमाणविप्रतिपिद्ध इति तन्निराकरणाय नादरः क्रियते ॥ ७ ॥

यद्येवेहैकस्मिन्देहे स्वप्नो भूत्वा मृत्यो रूपाणि कार्य्यकरणसङ्घातान्यतिक्रम्य स्वप्न आत्मज्योतिव्यास्त एवं स वै प्रकृतः पुरुषोऽयं जायमानः। कथं जायमान इत्युच्यते। शरीरं देहेन्द्रियसङ्घातमभिसम्पद्यमानः शरीर आत्म-

आ० निराकृतौ शून्यवादो निराकर्त्तव्योपि कस्मान्न निराक्रियते तत्राह। शून्यवादीति ॥ समस्तस्य वस्तुनः सत्त्वेन भानान्मानानाञ्च सर्व्वेषां सद्विषयत्वाच्छून्यस्य चाविषयतया ग्राह्यभावेन निराकरणानर्हत्वात्तद्विषयत्वे च शून्यवादिनैव विषयनिराकरणोक्त्या शून्यस्यापकृतवात्तस्य च स्फुरणास्फुरणयोः सर्व्वशून्यत्वायोगात्तद्वादिनश्च सत्त्वासत्त्वयोस्तदनुपपत्तेः सम्मृतेश्चाश्रयाभावादसम्भवात्तदाश्रयत्वे च शून्यस्य स्वरूपहानान्निराश्रयत्वे चासम्मृतित्वान्नास्माभिस्तद्वादनिरासायादरः क्रियते तत्सिद्धं बुद्ध्यादयतिरिक्तं नित्यसिद्धमत्यन्तशुद्धं कूटस्थमद्वयमात्मज्योरिति भावः॥७॥

प्रसङ्गागतं परपक्षं निराकृत्य श्रुतिव्याख्यानमेवानुवर्त्तयन्नुत्तरवाक्यतात्पर्य्यमाह । यथेति ॥ एवमात्मदेहभेदेऽपि वर्त्तमानं जन्म त्यजन्जन्मान्तरं चोपाददानः कार्य्यकरणान्यतिक्रामतीति शेषः । अतः स्वप्नजागरितसञ्चाराद्देहाद्यतिरेकवदिह लोक-

उ० मानः पाप्मभिः सꣳसृज्यते स उत्क्रामन्म्रियमाणः पाप्मनो विजहाति ॥ ८ ॥

भा० भावमापद्यमान इत्यर्थः । पाप्मभिः पाप्मसमवायिभिर्धर्माधर्माश्रयैः कार्य्यकरणैरित्यर्थः । संसृज्यते संयुज्यते स एवोत्क्रामञ्छरीरान्तरमूर्द्ध्वं क्रामन् गच्छन् म्रियमाण इत्येतस्य व्याख्यानमुत्क्रामन्निति । तान्येव संश्लिष्टान् पाप्मरूपान् कार्य्यकरणलक्षणान् विजहाति तैर्विंयुज्यते तान्परित्यजति । यथायं स्वप्नजाग्रद्वृत्त्योर्वर्त्तमान एवैकस्मिन्देहे पाप्मरूपकार्य्यकरणोपादानपरित्यागाभ्यामनवरतं सञ्चरति धिया समानः सन् । तथा सोऽयम्पुरुष उभाविहलोकपरलोकौ जन्ममरणाभ्यां कार्य्यकरणोपादानपरित्यागाभ्यामनवरतं प्रतिपद्य आसंसारमोक्षात् सञ्चरति । तस्मात् सिद्धमस्यात्मज्योतिषो ऽन्यत्वं कार्य्यकरणरूपेभ्यः पाप्मभ्यः

व्या० परलोकसञ्चारोऽस्यापि तदतिरेकस्तस्योच्यतेऽनन्तरवाक्येनेत्यर्थः । समनन्तरं वाक्यं गृहीत्वा व्याकरोति । स वा इत्यादिना ॥ पाप्मशब्दस्य लक्षणया तत्कार्य्यविषयत्वं दर्शयति । पाप्मसमवायिभिरिति ॥ पाप्मशब्दस्य पापवाचित्वेऽपि कार्य्यसाम्याद्धर्म्मेऽपि वृत्तिं सूचयति । धर्म्माधर्म्मेति ॥ उक्तमर्थं दृष्टान्तत्वेनानुवदति । यथेति ॥ अवस्थाद्वयसञ्चारस्य लोकद्वयसञ्चारं दार्ष्टान्तिकमाह । तथेति ॥ इहलोकपरलोकावनवरतं सञ्चरतीति सम्बन्धः । सञ्चरणप्रकारं प्रकटयति । जन्मेति ॥ जन्मना कार्य्यकरणयोरुपादानमरणेन च तयोस्त्यागमविच्छेदेन लभमानो मोक्षादर्वागनवरतं सञ्चरं दुःखीभवतीत्यर्थः ॥ स वा इत्यादिवाक्यतात्पर्य्यमुपसंहरति । तस्मादिति ॥ तच्छब्दार्थमेव स्फुटयति । संयोगेति ॥

उ० तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवत इदञ्च परलोकस्थानञ्च सन्ध्यं तृतीयꣳ स्वप्न-

भा० संयोगवियोगाभ्यां। न हि तद्धर्मत्वे सति तैरेव संयोगो वियोगो वा युक्तः ॥ ८ ॥

ननु नस्तो ऽसावसौ लोकौ यौ जन्ममरणाभ्यामनुक्रमेण सञ्चरति स्वप्नजागरिते इव। स्वप्नजागरिते तु प्रत्यक्षमवगम्येते न त्विहलोक परलोकौ केनचित्प्रमाणेन। तस्मादेते एव स्वप्नजागरिते इहलोकपरलोकाविति। उच्यते। तस्यैतस्य पुरुषस्य वै द्वे एव स्थाने भवतो न तृतीयं चतुर्थं वा। के ते इदं च यत्प्रतिपन्नं वर्त्तमानं जन्मशरीरेन्द्रियविषयवेदनाविशिष्टं स्थानं प्रत्यक्षतो ऽनुभूयमानं। परलोक एव स्थानं परलोकस्थानं। तच्च शरीरादिवियोगोत्तरकालानुभाव्यं। ननु स्वप्नोऽपि परलोकस्तथा च सति द्वे

आ० कथमेतावता तेभ्योऽन्यत्वं तत्राह। न हीति ॥ स्वाभाविकस्य हि धर्म्मस्य सति स्वभावे कुतः संयोगवियोगौ वन्ह्यौष्ण्यादिष्वदर्शनात्काय्यकरणयोश्च संयोगविभागवशादस्वाभाविकत्वे सिद्धमात्मनस्तदन्यत्वमित्यर्थः ॥ ८ ॥

तस्येत्यादिवाक्यस्य व्यावर्त्यांशङ्कामाह। नन्विति ॥ अवस्थाद्वयवल्लोकद्वयसिद्धिरित्याशङ्क्याह। स्वप्नेति ॥ कथं तर्हि लोकद्वयप्रसिद्धिरत आह। तस्मादिति ॥ तत्रोत्तरत्वेनोत्तरवाक्यमुत्थाप्य व्याकरोति। उच्यत इति ॥ स्थानद्वयप्रसिद्धिद्योतनार्थो वै शब्दः। अवधारणं विवृणोति। नेति ॥ वेदना सुखदुःखादिलक्षणा आगमस्य परलोकसाधकत्वमभिप्रेत्याह। तच्चेति ॥ अवधारणमाक्षिपति। नन्विति ॥ तस्य स्थानान्तरत्वं दूषयति। नेति ॥

उ॰ स्थानं तस्मिन्सन्ध्ये स्थाने तिष्ठन्नेते उभे स्थाने पश्यतीदं च परलोकस्थानं च ॥

भा॰ एवेत्यवधारणमयुक्तं। न। कथं तर्हि। सन्ध्यं तत्। इहलोकपरलोकयोर्यः सन्धिस्तस्मिन्भवं सन्ध्यं यत्तृतीयं तत्स्वप्नस्थानं। तेन स्थानद्वित्वावधारणं। न हि ग्रामयोः सन्धिस्तावेव ग्रामावपेक्ष्य तृतीयत्वपरिगणनमर्हति। कथं तर्हि पुनस्तस्य परलोकस्थानस्यास्तित्वमवगम्यते यदपेक्ष्य स्वप्नस्थानं सन्ध्यं भवेत्। यतस्तस्मिन्सन्ध्ये स्वप्नस्थाने तिष्ठन्भवन् वर्त्तमान एते उभे स्थाने पश्यति। के ते उभे। इदं च परलोकस्थानं च। तस्मात्स्तः स्वप्नजागरितव्यतिरेकेणोभौ लोकौ यौ धिया समानः सन्ननुसञ्चरति जन्ममरणसन्तानप्रबन्धेन। कथं पुनः स्वप्ने स्थितः सन्नुभौ लोकौ पश्यति। किमाश्रयः केन विधिनेत्युच्यते॥

व्या॰ स्वप्नस्य लोकद्वयातिरिक्तस्थानत्वाभावे कथं तृतीयत्वप्रसिद्धिरित्याह। कथमिति॥ तस्य सन्ध्यत्वान्न स्थानान्तरत्वमित्युत्तरमाह। सन्ध्यं तदिति॥ सन्ध्यत्वं व्युत्पादयति। इहेति॥ यत्तत्स्वप्नस्थानं तृतीयं मन्यसे तदिहलोकपरलोकयोः सन्ध्यमिति सम्बन्धः॥ अस्य सन्ध्यत्वे फलितमाह। तेनेति॥ पूरणप्रत्ययश्रुत्या स्थानान्तरत्वमेव स्वप्नस्य किं न स्यादित्याशङ्क्य प्रथमश्रुतसन्ध्यशब्दविरोधान्नैवमित्याह। न हीति॥ परलोकास्तित्वे प्रमाणान्तरजिज्ञासया पृच्छति। कथमिति॥ प्रत्यक्षं प्रमाणमित्युत्तरमाह। यत इत्यादिना॥ स्वप्नप्रत्यक्षं परलोकास्तित्वे प्रमाणमित्युक्तं तदेवोत्तरवाक्येन स्फुटयितुं पृच्छति। कथमिति॥ कथं शब्दार्थमेव प्रकटयति। किमित्यादिना॥ उत्तरवाक्यमुत्तरत्वेनोत्थापयति। उच्यत इति॥

उ० अथ यथाक्रमोऽयं परलोकस्थाने भवति तमाक्रममाक्रम्योभयान्पाप्मन आनन्दाꣳश्च पश्यति ॥

भा० अथ कथं पश्यतीति । शृणु । यथाक्रम आक्रमत्यनेनेत्याक्रम आश्रयोऽवष्टम्भ इत्यर्थो यादृश आक्रमोऽस्य सोऽयं यथाक्रमः । अयं पुरुषः परलोकस्थाने प्रतिपत्तव्ये निमित्ते यथाक्रमो भवति यादृशेन परलोकप्रतिपत्तिसाधनेन विद्याकर्मपूर्व्वप्रज्ञालक्षणेन युक्तो भवतीत्यर्थः । तमाक्रमं परलोकस्थानायोन्मुखीभूतं प्राप्ताङ्कुरीभावमिव वीजं तमाक्रममाक्रम्यावष्टभ्याश्रित्योभयान्पश्यति बहुवचनं धर्म्माधर्म्मफलानेकत्वादुभयप्रकारानित्यर्थः । कांस्तान् पाप्मनः पापफलानि । न तु पुनः साक्षादेव पाप्मनां दर्शनं सम्भवति तस्मात्पापफलानि दुःखानीत्यर्थः । आनन्दांश्च

आ० तत्राथशब्दमुक्तप्रश्नार्थतया व्याकरोति । अथेति ॥ उत्तरभागमुत्तरत्वेन व्याचष्टे । शृण्विति ॥ यदुक्तं किमाश्रय इति तत्राह । यथाक्रम इति ॥ यदुक्तं केन विधिनेति तत्राह । तमाक्रममिति ॥ पाप्मशब्दस्य यथार्थत्वे सम्भवति किमिति फलविषयत्वं तत्राह । नत्विति ॥ साक्षादागमादृते प्रत्यक्षेणेति यावत् । पाप्मनामेव साक्षाद्दर्शनासम्भवस्तच्छब्दार्थः ॥ कथं पुनराद्ये वयसि पाप्मनामानन्दानाञ्च स्वप्ने दर्शनं तत्राह । जन्मान्तरेति ॥ यद्यपि मध्यमेव वयसि करणपाटवादैहिकवासनया स्वप्नो दृश्यते तथापि कथमन्तिमे वयसि स्वप्नदर्शनं तदाह । यानि चेति ॥ फलानां क्षुद्रत्वमल्पलेशतो मुक्तत्वं । यानीत्युपक्रमात्तानीत्युपसंख्यातव्यं । ऐहिकवासनावशादैहिकानामेव पाप्मनामानन्दानाञ्च स्वप्ने दर्शनसम्भवान्न स्वप्नप्रत्यक्षं परलोकसाधकमिति शङ्कते । तत्कथमिति ॥ परिहरति । उच्यत इति ॥ यद्यपि स्वप्ने

भा॰ धर्म्मफलानि सुखानीत्येतत्तानुभयान्पापानन्त्रान्दांश्च पश्यति जन्मान्तरदृष्ट वासनामयान् । यानि च प्रतिपत्त-व्यजन्मविषयाणि क्षुद्रधर्म्माधर्म्मफलानि धर्म्माधर्म्मप्रयुक्तो देवतानुग्रहाद्वा पश्यति । तत्कथमवगम्यते परलोकस्थान-भावि तत्पाप्मानं दर्शनं स्वप्न इत्युच्यते । यस्मादिह जन्मन्य-ननुभाव्यमपि पश्यति वङ्क । न च स्वप्नो नामा पूर्व्वं दर्शनं । पूर्व्वदृष्टस्मृतिर्हि स्वप्नः प्रायेण । तेन स्वप्नजागरितस्थान-व्यतिरेकेण स उभौ लोकौ । यदुक्तमादित्यादि वाह्यज्यो-तिषामभावे ऽयं कार्य्यकरणसङ्घातः पुरुषो येन ज्योतिषा व्यतिरिक्तेनात्मना ज्योतिषा व्यवहरतीत्युक्तं । तदेव नास्ति । यदादित्यादि ज्योतिषामभावगमनं । यत्रेदं विविक्तं स्वयं ज्योतिरुपलभ्येत ॥

आ॰ मनुष्याणामिन्द्रादिभावोऽननुभूतोऽपि भाति । तथापि तदपूर्व्व-मेव दर्शनमित्याशङ्क्याह । न चेति ॥ स्वप्नधिया भाविजन्मभा-विनोऽपि स्वप्ने दर्शनात्प्रायेणेत्युक्तं ॥ न च तदपूर्व्वदर्शनमपि सम्यग्ज्ञानमुत्थानप्रत्ययबाधात् । न चैवं स्वप्नधिया भाविजन्मासि-द्धिर्यथा ज्ञानमर्थाङ्गीकारादिति भावः ॥ प्रमाणफलमुपसंहरति । तेनेति ॥ स यत्रेत्यादिवाक्यस्य व्यवहितेन सम्बन्धं वक्तुं वृत्तम-नूद्याक्षिपति । यदित्यादिना ॥ वाह्यज्योतिरभावे सत्ययं पुरुषः कार्य्यकरणसङ्घातो येन सङ्घातातिरिक्तेनात्मज्योतिषा-गमनादिनिर्व्वर्त्तयति । तदात्मज्योतिरस्तीति ॥ यदुक्तमित्यनु-वादार्थः । विशिष्टस्थानाभावं वक्तुं विशेषणाभावं तावद्दर्श-यति । तदेवेति ॥ आदित्यादिज्योतिरभावविशिष्टस्थानं यत्रे-त्युक्तं । तदेव स्थानं नास्ति विशेषणाभावादिति शेषः ॥

उ० स यत्र प्रस्वपित्यस्य लोकस्य सर्व्वावतो मात्रामपादाय स्वयं विहत्य स्वयं निर्म्माय स्वेन भासा

भा० येन सर्व्वदैवायं कार्य्यकरणसङ्घातः संसृष्ट एवोपलभ्यते। तस्मादसत्समोऽसन्नेव वा स्वेन विविक्तस्वभावेन ज्योतीरूपेणात्मेति। अथ क्वचिद्विविक्तः स्वेन ज्योतीरूपेणोपलभ्यते। बाह्याध्यात्मिकभूतभौतिकसंसर्गशून्यः। ततो यथोक्तं सर्व्वं भविष्यतीत्येतदर्थमाह। स यः प्रकृत आत्मा यत्र यस्मिन्काले प्रस्वपिति प्रकर्षेण स्वापमनुभवति। तदा किमुपादानः केन विधिना स्वपिति सन्ध्यं स्थानं प्रतिपद्यत इत्युच्यते। दृष्टस्य लोकस्य जागरितलक्षणस्य सर्व्वावतः सर्व्वमवतीति सर्व्वावान्। नायं लोकः कार्य्यकरणसङ्घातो विषयवेदनासंयुक्तः। सर्व्वावत्त्वमस्य व्याख्यातमन्नत्रयप्रकरणे। अथो ऽयं वा आत्मेत्यादिना। सर्व्वा वा भूतभौतिकमात्रा अस्य संसर्गकारणभूता विद्यन्त इति सर्व्वावान्सर्व्ववानेव सर्व्वावांस्तस्य सर्व्वावतो मात्रामेकदेशमवय-

---

आ० यथोक्तस्थानाभावे हेतुमाह। येनेति॥ संसृष्टो बाह्यैर्ज्योतिर्भिरिति शेषः॥ व्यवहारभूमौ बाह्यज्योतिरभावाभावे फलितमाह। तस्मादिति॥ उत्तरग्रन्थमुत्तरत्वेनावतारयति। अथेत्यादिना॥ यथोक्तं सर्व्वव्यतिरिक्तत्वं स्वयं ज्योतिष्ट्वमित्यादि। व्याह स्वप्नं प्रस्तौतीति यावत्॥ उपादानशब्दः परिग्रहविषयः। कथमस्य सर्व्वावत्त्वं तदाह। सर्व्वावत्त्वमिति॥ संसर्गकारणभूताः सबाह्याध्यात्मादिविभागेनेति शेषः॥ किमुपादानमित्यस्योत्तरमुक्ता केन विधिनेत्यस्योत्तरमाह। स्वयमित्यादिना॥ आपाद्य

५० स्वेन ज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयं ज्योतिर्भवति ॥ ९ ॥

भा० वमपादायापच्छिद्यादाय गृहीत्वा दृष्टजन्मवासनावासितः सन्नित्यर्थः । स्वयमात्मनैव विहत्य देहं पातयित्वा निःसम्बोधमापाद्य जागरिते ह्यादित्यादीनां चक्षुरादिष्वनुग्रहो देहव्यवहारार्थः । देहव्यवहारश्चात्मनो धर्म्माधर्म्मफलोपभोगप्रयुक्तः । धर्म्माधर्म्मफलोपभोगोपरमणमस्मिन्देहे आत्मकर्म्मोपरमकृतमित्यात्मास्य विहन्तेत्युच्यते । स्वयं निर्म्माय निर्म्माणं कृत्वा वासनामयं स्वप्नदेहं मायामयमिव निर्म्माणमपि तत्कर्म्मापेक्षत्वात्स्वयं कर्तृकमुच्यते । स्वेनात्मीयेन भासामात्रोपादानलक्षणेन । भासादीप्त्या प्रकाशेन सर्व्ववासनात्मकेनान्तःकरणवृत्तिप्रकाशेनेत्यर्थः ॥

सा हि तत्र विषयभूता सर्व्ववासनामयी प्रकाशते । सा तत्र स्वयं भा उच्यते । तेन स्वेन भासाविषयभूतेन स्वेन

चा० प्रस्वपितीत्युत्तरत्रसम्बन्धः । कथं पुनरात्मनो देहविहन्तृत्वं जाग्रद्धेतुकर्म्मफलोपभोगोपरमणाद्धि स विहन्यते तत्राह । जागरिते हीत्यादिना ॥ निर्म्माणविषयं दर्शयति । वासनामयमिति ॥ यथा मायावी मायामयं देहं निर्मिमीते तद्वदित्याह । मायामयमिवेति ॥ कथं पुनरात्मनो यथोक्तं देहनिर्म्माणकर्तृत्वं कर्म्मकृतत्वात्तन्निर्म्माणस्येत्याशङ्क्याह । निर्म्माणमपीति ॥ स्वेन भासेत्यत्रेत्थं भावे तृतीया । करणे तृतीयां व्यावर्त्तयति । सा हीति ॥

तत्रेति स्वप्नोक्तिः । यथोक्तान्तःकरणवृत्तेर्विषयत्वेन प्रकाश्यमानत्वेऽपि स्वभासो भवतु करणत्वमित्याशङ्क्याह । सातत्रेति ॥

भा॰ च ज्योतिषा तद्विषयिणा विविक्तरूपेणालुप्तदृक् स्वभावेन तद्भारूपं वासनात्मकं विषयीकुर्व्वन् प्रस्वपिति। यदेवं वर्त्तनं तत्प्रस्वपितीत्युच्यते। अत्रैतस्यामवस्थायामेतस्मिन्काले च पुरुष आत्मा स्वयमेव विविक्तज्योतिर्भवति वाह्याध्यात्मिकभूतभौतिकसंसर्गरहितं ज्योतिर्भवति। नन्वस्य लोकस्य मात्रोपादानं कृतं। कथं तस्मिन् सत्यत्रायं पुरुषः स्वयं ज्योतिर्भवतीत्युच्यते। नैष दोषो विषयभूतमेव हि तत्। तेनैव चात्रायं पुरुषः स्वयं ज्योतिर्दर्शयितुं शक्यः। न त्वन्यथा सति विषये कस्मिंश्चित्सुषुप्तकाल इव। यदा पुनः सा भाः वासनात्मिका विषयभूतोपलभ्यमाना भवति तदासिः कोशादिव निष्कृष्टः सर्व्वसंसर्गरहितं चक्षुरादिकार्य्यकरणव्यावृत्तस्वरूपमलुप्तदृगात्मज्योतिः स्वेन

आ॰ स्वेन ज्योतिषेति कर्त्तरि तृतीया। स्वशब्दोऽत्रात्मविषयः। कोऽयं प्रस्वापो नाम तत्राह। यदेवमिति॥ विविक्तविशेषणं विवृणोति। वाह्येति॥ स्वप्ने स्वयं ज्योतिरात्मेत्युक्तमाक्षिपति। नन्वस्येति॥ वासनापरिग्रहस्य मनोवृत्तिरूपस्य विषयतया विषयत्वाभावादविरुद्धमात्मनः स्वप्ने स्वयं ज्योतिष्ट्वमिति समाधत्ते। नैष दोष इति॥ कुतो वासनोपादानस्य विषयत्वमित्याशङ्क्य स्वयं ज्योतिष्ट्वश्रुतिसामर्थ्यादित्याह। तेनेति॥ मात्रादानस्य विषयत्वेनेति यावत्। तदेव व्यतिरेकमुखेनाह। नत्विति॥ यथा सुषुप्तिकाले व्यक्तस्य विषयस्याभावे स्वयं ज्योतिरात्मा दर्शयितुं न शक्यते तथा स्वप्नेऽपि॥ तस्मात्तत्र स्वयं ज्योतिष्ट्वश्रुत्या मात्रादानस्य विषयत्वं प्रकाशितमित्यर्थः। भवतु स्वप्ने वासनादानस्य विषयत्वं तथापि कथं स्वयं ज्योतिरात्मा शक्यते विविच्य दर्शयितुमित्याशङ्क्याह। यदा पुनरिति॥ अवभासयदवभास्यं वासनात्मक-

उ॰ न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान्पथः सृजते न तत्रानन्दा मुदः प्रमुदो भवन्त्यथानन्दान्मुदः प्रमुदः सृजते न तत्र

भा॰ रूपेणावभासयद्दृश्यते। तेनात्रायं पुरुषः स्वयं ज्योतिर्भवतीति सिद्धं ॥ ९ ॥

नन्वत्र कथं पुरुषः स्वयं ज्योतिर्येन जागरित इव ग्राह्यग्राहकादिलक्षणः सर्व्वो व्यवहारो दृश्यते। चक्षुराद्यनुग्राहकाश्चादित्याद्या लोकास्तथैव दृश्यन्ते यथा जागरिते। तत्र कथं विशेषोऽवधारणं क्रियते। अत्रायं पुरुषः स्वयं ज्योतिर्भवतीत्युच्यते वैलक्षण्यात्स्वप्नदर्शनस्य। जागरिते हीन्द्रियबुद्धि मनश्चालोकादिव्यापारसंकीर्णमात्मज्योतिः। इह तु स्वप्नइन्द्रियाभावात्तदनुग्राहकादित्याद्यालोकाभावाच्च विविक्तं केवलं भवति। तस्माद्विलक्षणं। ननु तथैव विषया उपलभ्यन्ते स्वप्नेऽपि। यथा जागरिते तत्र कथमिन्द्रियाभावाद्वैलक्षण्यमुच्यत इति।

व्या॰ मन्तःकरणमिति शेषः ॥ स्वप्नावस्थायामात्मनोऽवभासकान्तराभावे फलितमाह। तेनेति ॥ ९ ॥

यदुक्तं स्वप्ने स्वयं ज्योतिरात्मेति तत्प्रकारान्तरेणाक्षिपति। नन्विति ॥ व्यवस्थाद्वये विशेषाभावकृतं चोद्यं दूषयति। उच्यत इति ॥ वैलक्षण्यं स्फुटयति। जागरिते हीति ॥ मनस्तु स्वप्ने सदपि विषयत्वान्न स्वयं ज्योतिष्ट्वविघातीति भावः। उक्तं वैलक्षण्यं प्रतीतिमाश्रित्याक्षिपति। नन्विति ॥ न तत्रेत्यादिवाक्यं व्याकुर्वन्नुत्तरमाह। उच्यतइति ॥ प्रतीतिं घटयति। यथेति ॥ रथादि-

उ० वेशान्ताः पुष्करिण्यः स्रवन्त्यो भवन्त्यथ वेशान्ताः पुष्करिण्यः स्रवन्त्यः सृजते स हि कर्त्ता ॥ १० ॥

भा० शृणु । न तत्र विषयाः स्वप्ने रथादिलक्षणाः । तथा न रथयोगा रथे युज्यन्त इति रथयोगा अश्वादयस्तत्र न विद्यन्ते । न च पन्थानो रथमार्गा भवन्ति । अथ च रथान् रथयोगान्पथश्च सृजते स्वयं । कथं पुनः सृजते रथादि-साधनानां वृक्षादीनामभावे । ननूक्तमस्य लोकस्य सर्व्वावतो मात्रामपादाय स्वयं विहत्य स्वयं निर्म्मायेत्यन्तःकरण-वृत्तिरस्य लोकस्य वासनामात्रा तामपादाय रथादि वासनारूपान्तःकरणवृत्तिस्तदुपलब्धिनिमित्तेन कर्म्मणा चोद्यमाना दृश्यत्वेन व्यवतिष्ठते तदुच्यते । स्वयं निर्म्मा-येति । तदेवाह रथादीन्सृजत इति । ननु तत्र करणं वा करणानुग्राहकाणि वादित्यादिज्योतींषि तदव-भास्या वा रथादयो विषया विद्यन्ते तद्वासनामात्रन्तु केवलं तदुपलब्धिकर्म्मनिमित्तचोदितोद्भूतान्तःकरणवृत्त्या-

आ० स्वप्निमाक्षिपति । कथं पुनरिति ॥ वासनामयीसृष्टिश्लिष्टेत्युत्त-रमाह । उच्यत इति ॥ तदुपलब्धिनिमित्तेनेत्यत्र तच्छब्देन वास-नात्मिका मनोवृत्तिरेवोक्ता । उक्तमेव प्रपञ्चयति । नन्वित्यादिना ॥ तदुपलब्धिर्वासनोपलब्धिस्तत्र यत्कर्म्मनिमित्तं तेन चोदिततया योद्भूतान्तःकरणवृत्तिग्राहकावस्था तदाश्रयं तदात्मकं तद्वासना-रूपं दृश्यत इति योजना ॥ तथापि कथमात्मज्योतिः स्वप्ने केवलं सिध्यति तत्राह । तद्यस्येति ॥ तथा कोशादसिर्विविक्तो भवति तथा दृश्यायाः बुद्धेर्विविक्तमात्मज्योतिरिति कैवल्यं साधयति । असिरिवेति ॥ तथा रथाद्यभाववदिति यावत् ॥ सुखान्येव

भा॰ अयं दृश्यते। तदस्य ज्योतिषो दृष्टान्तो लुप्तदृष्टमादात्म-ज्योतिरत्र केवलमसिरिव कोशाद्विविक्तं। तथा न तत्रा-नन्दाः सुखविशेषाः मुदो हर्षाः पुत्रादिलाभनिमित्ताः प्रमुदस्त एव प्रकर्षोपेताः॥

अथ चानन्दादीन् सृजते। तथा न तत्र वेशान्ताः पल्वलाः पुष्करिण्यस्तडागा स्रवन्त्यो नद्यो भवन्ति। अथ वेशान्तादीन् सृजते वासनामात्ररूपान्। यस्मात्स हि कर्त्ता। तद्वासनाश्रयचित्तवृत्त्युद्भवनिमित्तकर्म्म हेतुत्वेनेत्य-वोचाम तस्य कर्त्तृत्वं न तु साक्षादेव तत्र क्रिया सम्भवति तत्र साधनाभावात्। न हि कारकमन्तरेण क्रिया सम्भवति। न च तत्र हस्तपादादीनि क्रियाकारकाणि सम्भवन्ति। यत्र तु तानि विद्यन्ते जागरिते तत्रात्मज्योतिरवभा-सितैः कार्य्यकरणैरथादिवासनाश्रयान्तःकरणवृत्त्युद्भवनि-मित्तं कर्म्म निर्वर्त्त्यते तेनोच्यते स हि कर्त्तेति। तदुक्तमा-

---

व्या॰ विशिष्यन्त इति विशेषाः सुखसामान्यानीत्यर्थः॥ तथेत्यानन्दाद्य-भावो दृष्टान्तितः। स्वल्पीयांसि सरांसि पल्वलशब्देनोच्यते। स हि कर्त्तेत्यत्र हि शब्दो य स्मादित्युक्तस्तस्मात्सृजतीति शेषः॥

कुतोऽस्य कर्तृत्वं सह्यकार्य्यभावादित्याशङ्क्याह। तद्वासनेति॥ तच्छब्देन वेशान्तादिग्रहणं। तदीयवासनाधारश्चित्तपरिणाम-स्तेनोद्भवति यत्कर्म्म तस्य हन्यमाननिदानत्वेनेति यावत्॥ मुख्यं कर्तृत्वं वारयति। नत्विति॥ तत्रेति स्वप्नोक्तिः। साधनाभावे ऽपि स्वप्ने क्रिया किं न स्यादित्याशङ्क्याह। न हीति॥ तर्हि स्वप्ने कान्यपि भविष्यन्ति नेत्याह। न चेति। तर्हि पूर्व्वोक्तमपि कर्तृत्वं कथमिति चेत्तत्राह। यत्रत्विति॥ उक्तेऽर्थे वाक्योपक्र-ममनुकूलयति। तदुक्तमिति॥ उपक्रमे मुख्यं कर्तृत्वं इहत्वोप

उ० तदेते श्लोका भवन्ति ॥ स्वप्नेन शारीरमभि प्रहत्यासुप्तः सुप्तानभिचाकशीति । शुक्रमादाय

भा० त्मनैवायं ज्योतिषास्ते पल्ययते कर्म्म कुरुत इति । तत्रापि न परमार्थतः स्वतः कर्तृत्वं चैतन्यज्योतिषावभासकत्व-व्यतिरेकेण । यच्चैतन्यात्मज्योतिषान्तःकरणद्वारेणावभास-यति । कार्य्यकरणानि तदवभासितानि कर्म्मसु व्याप्रियन्ते कार्य्यकरणानि । तत्र कर्तृत्वमुपचर्य्यत आत्मनः । तदुक्तं ध्यायतीव लेलायतीवेति तदेवानूद्यते स हि कर्त्तेतीह हेत्वर्थं ॥ १० ॥

तदेतस्मिन्नुक्तेऽर्थे एते श्लोका मन्त्रा भवन्ति । स्वप्नेन स्वप्नभावेन शारीरं शरीरमभिप्रहत्य निश्चेष्टमापाद्या-सुप्तः स्वयमलुप्तदृगादिशक्तिस्वाभाव्यात्सुप्तान्वासनाकारो-द्भूतानन्तःकरणवृत्त्याश्रयान् वाह्याध्यात्मिकान् सर्व्वानेव भावान् स्वेन रूपेण प्रत्यस्तमितान् सुप्तानभिचाकशीत्य-

आ० चारिकमिति विशेषमाशङ्क्याह । तत्रापीति ॥ परमार्थतश्चैत-न्यज्योतिषो व्यापारवदुपाध्यवभासकत्वव्यतिरेकेण स्वतो न कर्तृत्वं वाक्योपक्रमेऽपि विवक्षितमित्यर्थः ॥ आत्मनो वाक्योपक्रमे कर्तृ-त्वमौपचारिकमित्युपसंहरति । यदिति ॥ स हि कर्त्तेत्यौपचा-रिकं कर्तृत्वमित्युच्यते चेत्तस्य ध्यायतीवेत्यादिनोक्तत्वात्पुनरुक्ति-रित्याशङ्क्याह । तदुक्तमिति ॥ अनुवादे प्रयोजनमाह । हेत्वर्थ-मिति ॥ स्वप्ने रथादिद्रष्टाविति शेषः ॥ १० ॥

तदेते श्लोका भवन्तीत्येतत्प्रतीकं गृहीत्वा व्याचष्टे ॥ एते इति ॥ उक्तोऽर्थः स्वयं ज्योतिष्ट्वादिः । शरीरमिति स्वार्थे वृद्धिः । स्वयमसुप्तत्वे हेतुमाह । अलुप्तेति ॥ व्याख्येयं पदमादाय व्याचष्टे ।

NOTICE.

ɴ English translation of the Upanishad and Commentary will be
n in one or two separate numbers, after the completion of the Text.

उ० त्रयो लोका एत एव वागेवायं लोको मनोऽन्तरिक्षलोकः प्राणोऽसौ लोकः ।४। त्रयो वेदा एत एव वागेवर्ग्वेदो मनो यजुर्वेदः प्राणः सामवेदः ।५। देवाः पितरो मनुष्या एत एव वागेव देवा मनः पितरः प्राणो मनुष्याः ।६। पिता माता प्रजैत एव मन एव पिता वाङ्माता प्राणः प्रजा ।७। विज्ञातं विजिज्ञास्यमविज्ञातमेत एव यत्किञ्च-

---

भा० तेषामेव प्राजापत्यानामन्नानामाधिभौतिको विस्तारोऽभिधीयते। त्रयो लोकाः भूर्भुवः स्वरित्याख्या। एत एव वाङ्मनःप्राणास्तत्र विशेषो वागेवायं लोको मनोऽन्तरिक्षलोकः प्राणोऽसौ लोकः ॥ ४ ॥ तथा त्रयो वेदा इत्यादीनि वाक्यानि स्वज्वर्थानि ॥ ५ ॥ ६ ॥ ७ ॥ विज्ञातं विजिज्ञास्यमविज्ञातमेत एव तत्र विशेषो यत्किञ्च विज्ञानं विस्पष्टं ज्ञातं वाचस्तद्रूपं तत्र स्वयमेव हेतुमाह। वाग्घि विज्ञाता प्रकाशात्मकत्वात्कथमविज्ञाता भवेद्या-

---

आ० वागादीनामाध्यात्मिकविभूतिप्रदर्शनार्थमुत्तरग्रन्थमवतारयति। तेषामेवेति ॥ ४ ॥ तत्रैवोक्तं सामान्यं परामृशति। त्रिलोकीवाक्यवदुत्तरं वाक्यं विज्ञातादिवाक्यात् प्राक्तनं नेतव्यमित्याह। तथेति ॥ ५ ॥ ६ ॥ ७ ॥ विज्ञातादि वाक्यमादाय तद्गतं विशेषं दर्शयति। विज्ञातमिति ॥ विज्ञातं सर्वं वाचो रूपमिति प्रतिज्ञातोऽर्थः समर्थ्यः। प्रकाशकत्वेऽपि कथं वाचो विज्ञातत्वमित्याशङ्क्याह। कथमिति ॥ प्रकाशात्मकत्वमेव कुतो वाचः सिद्धमित्याह। वाचेति ॥ वाग्विशेषस्तद्विभूतिः सन्दिह्यमाना-

उ॰ विज्ञातं वाचस्तद्रूपं वाग्घि विज्ञाता वागेनं तद्भूत्वाऽवति ॥ ८ ॥ यत्किञ्च विजिज्ञास्यं मनसस्तद्रूपं मनो हि विजिज्ञास्यं मन एनं तद्भूत्वाऽ

भा॰ न्यानपि विज्ञापयति वाचैव सम्राट् बन्धुः प्रज्ञायत इति हि वक्ष्यति वाग्विशेषविद इदं फलमुच्यते वागेवेनं यथोक्तवाग्विभूतिविदं तद्विज्ञातं भूत्वाऽवति पालयति। विज्ञातरूपेणैवास्यान्नं भोज्यतां प्रतिपद्यत इत्यर्थः ॥ ८ ॥ तथा यत्किञ्चाविस्पष्टं विस्पष्टं ज्ञातुमिष्टं विजिज्ञास्यं तत्सर्व्वं मनसो रूपं मनो हि यस्मात्सन्दिह्यमानाकारत्वाद्विजिज्ञास्यं। पूर्व्ववन्मनो विभूतिविदः फलं मन एनं तद्विजिज्ञास्यं भूत्वाऽवति विजिज्ञास्य स्वरूपेणैवान्नलमापद्यते ॥ ९ ॥ तथा यत्किञ्चाविज्ञातं विज्ञानागोचरं न च सन्दिह्यमानं प्राणस्य तद्रूपं प्राणो ह्यविज्ञात अविज्ञातरूपो हि यस्मात्प्राणोऽनिरुक्तश्रुतेर्विज्ञातविजिज्ञा-

---

व्या॰ कारत्वात्सङ्कल्पविकल्पात्मकत्वादिति यावत् । तस्मात्सर्व्वं विजिज्ञास्यं मनोरूपमिति योजना। विज्ञातादिरूपमिति सम्बन्धः। पूर्व्ववद्वाग्विभूतिविदो यथा फलमुक्तं तद्वदिति यावत् ॥ अनिरुक्तश्रुतेरविज्ञातरूपो यस्मात्प्राणस्तस्मादविज्ञातं सर्व्वं प्राणस्य रूपमिति योजना। विज्ञातादिरूपातिरेकेण लोकवेदाद्यभावाद्विज्ञातादिरूपत्वाभिधानेनैव वागादीनां लोकाद्यात्मत्वे सिद्धे किमर्थं त्रयो लोका इत्यादिवाक्यमित्याशङ्क्य तथैव ध्यानार्थमित्याह। विज्ञातेति। भूरादिष्वेकैकत्र विज्ञातादित्रयदृष्टेर्वागादेश्च व्यवस्थितत्वात्कुतो विज्ञातादेर्वागाद्यात्मकत्वं नियन्तुं शक्यमित्याशङ्क्याह। सर्व्वत्रेति ॥ प्राणादिभूतिविदः सम्प्रति फलं कथयति।

उ० वति । ९ । यत्किञ्चाविज्ञातं प्राणस्य तद्रूपं प्राणो ह्यविज्ञातः प्राण एनं तद्भूत्वाऽवति ।१०।
तस्यैव वाचः पृथिवी शरीरं ज्योतीरूपमय

भा०ख्याविज्ञातभेदेन वाङ्मनःप्राणविभागे स्थिते त्रयो लोका इत्यादयो वाचनिका एव। सर्व्वत्र विज्ञातादिरूपदर्शनादवचनादेव तस्य नियमः स्मर्त्तव्यः। प्राण एनं तद्भूत्वाऽवत्यविज्ञातरूपेणैवास्य प्राणोऽन्नं भवतीत्यर्थः। शिष्यपुत्त्रादिभिः सन्दिह्यमाना अविज्ञातोपकारा आचार्य्यपित्त्रादयो दृश्यन्ते। तथा मनःप्राणयोरपि सन्दिह्यमानाविज्ञातयोरन्नत्वोपपत्तिः॥ १० ॥

व्याख्यातो वाङ्मनःप्राणानामाधिभौतिको विस्तारोऽथायमाधिदैविकार्थ आरम्भस्तस्यैतस्या वाचः प्रजापतेरन्नत्वेन प्रस्तुतायाः पृथिवी शरीरं बाह्य आधारो ज्योतीरूपं प्रकाशात्मकं करणं पृथिव्या आधेयभूतं अयं

आ० प्राण इति॥ लोके विज्ञातस्यैव भोज्यत्वोपपत्तिरित्याशङ्क्याह। शिष्येति॥ शिष्यैरविवेकिभिः सन्दिह्यमानोपकारा अपि गुरवस्तेषां भोज्यतामापद्यमाना दृश्यन्ते पुत्त्रादिभिश्चातिबालैरविज्ञातोपकाराः पित्त्रादयस्तेषां भोज्यत्वमुपपद्यते तथा प्रकृतेऽपि सम्भवतीत्यर्थः॥ ८ ॥ ९ ॥ १० ॥

वृत्तमनूद्य तस्यैव वाचः पृथिवीत्याद्यवतारयति। व्याख्यात इति॥ आधिदैविकार्थस्तद्विभूतिप्रदर्शनार्थ इति यावत्। समनन्तरसन्दर्भस्य तात्पर्य्यमुक्त्वा वाक्याक्षराणि योजयति। तस्या इति॥ कथमाधाराधेयभावो वाचो निर्दिश्यते तत्राह। द्विरूपा हीति॥ उक्तमर्थं सङ्क्षिप्य निगमयति। तदुभयमिति।

उ॰ मग्निस्तद्यावत्येव वाक्तावती पृथिवी तावानयमग्निः ॥ ११ ॥

अथैतस्य मनसो द्यौः शरीरं ज्योतीरूपमसावादित्यस्तद्यावदेव मनस्तावती द्यौस्तावान-

---

भा॰ पार्थिवोऽग्निर्द्विरूपो हि प्रजापतेर्वाक्कार्य्यमाधारोऽप्रकाशः करणञ्चाधेयं प्रकाशस्तदुभयं पृथिव्यग्नी वागेव प्रजापतेस्तत्र यावत्परिमाणैवाध्यात्माधिभूतभेदभिन्ना सती वाग्भवति तत्र सर्व्वत्राधारत्वेन पृथिवी व्यवस्थिता तावत्येव भवति कार्य्यभूता तावानयमग्निराधेयः करणरूपो ज्योतीरूपेण पृथिवीमनुप्रविष्टः तावानेव भवति समानमुत्तरं ॥ ११ ॥

अथैतस्य प्राजापत्यान्नोक्तस्यैव मनसो द्यौर्द्युलोकः शरीरं कार्य्यमाधारो ज्योतीरूपं करणमाधेयोऽसावादित्यस्तत्र यावत्परिमाणमेवाध्यात्ममधिभूतं वा मन-

---

व्या॰ अध्यात्ममधिभूतस्य या वाक् परिच्छिन्ना तस्यास्तुल्यपरिमाणत्वमाधिदैविकवागंशत्वादंशांशिनोश्च तादात्म्यात्तथा सह दर्शयति। तत्तत्रेति॥ तावानयमग्निरिति प्रतीकमादाय व्याकरोति। आधेय इति॥ समानमुत्तरमित्यस्यायमर्थोऽध्यात्ममधिभूतं च मनःप्राणयोरधिदैविकमनःप्राणांशत्वात्तादात्म्याभिप्रायेण तुल्यपरिमाणत्वमुच्यते। तथाच वाचा समानं प्राणादावुत्तरवाक्ये कथ्यमानसमानपरिमाणत्वमिति॥ ११॥

आधिदैविकवाग्विभूतिव्याख्यानानन्तर्य्यमथशब्दार्थः॥ मनसो दैवरूपमुक्ता व्याप्तिमभिधत्ते। तत्रेति। मन एवास्यात्मा वाग्जाया प्राणः प्रजेत्यध्यात्मं मन एव पिता वाङ्माता प्राणः प्रजेत्य-

उ० सावादित्यस्तौ मिथुनꣳ समैतां ततः प्राणोऽजायत स इन्द्रः स एषोऽसपत्नो द्वितीयो वै सपत्नो नास्य सपत्नो भवति य एवं वेद ॥ १२ ॥

भा० स्तावती तावद्विस्तारा तावत्परिमाणा मनसो ज्योतीरूपस्य करणस्याधारत्वेन व्यवस्थिता द्यौस्तावानसावादित्यो ज्योतीरूपं करणमाधेयं तावग्न्यादित्यौ वाङ्मनसे आधिदैविके मातापितरौ मिथुनं मैथुन्यमितरेतरसंसर्गं समैतां सङ्गच्छेतां । मनसादित्येन प्रसूतं पित्रा वाचाग्निना मात्रा प्रकाशितं कर्म्म करिष्यामीत्यन्तरा रोदस्योस्ततस्तयोरेव सङ्गमनात्प्राणो वायुरजायत परिस्पन्दाय कर्म्मणे । यो जातः स इन्द्रः परमेश्वरो न केवलमिन्द्र एवासपत्नोऽविद्यमानः सपत्नो यस्य कः पुनः सपत्नो नाम द्वितीयो वै प्रतिपक्षत्वेनोपगतो द्वितीयः सपत्न इत्युच्यते तेन द्वितीयत्वेऽपि सति वाङ्मनसे न सपत्नत्वं भजेते

आ० धिभूतञ्च वाङ्मनसयोः प्राणस्य प्रजात्वमुक्तं तथाऽधिदैवेऽपि तस्य तत्प्रजात्वं वाच्यमित्यभिप्रेत्याह । ताविति । कथमादित्यस्य मनसः प्राणं प्रति पितृत्वं वाचो वाग्नेर्मातृत्वं तत्राह ॥ मनसेति । सावित्रं पाकमाग्नेयं च प्रकाशमृते कार्य्यसिद्ध्यदर्शनात्तयोः सिद्धं जनकत्वमित्यर्थः । कर्म्मशब्देन कार्य्यमुच्यते तत्करिष्यामीति प्रत्येकमभिसन्धिपूर्व्वकमादित्याग्न्योर्द्यावापृथिव्योरन्तराले सङ्गतिरासीदित्याह । कर्म्मेति । सङ्गतिकार्य्यमभिप्रायानुसारि दर्शयति । तत इति । वायोरिन्द्रत्वासपत्नत्वगुणविशिष्टस्योपासनमभिप्रेत्याह । यो जात इति । द्वितीयस्य सपत्नत्वे वागादेरपि तथात्वं स्यादित्याशङ्क्याह । प्रतिपक्षत्वेनेति ।

उ० अथैतस्य प्राणस्यापः शरीरं ज्योतीरूपमसौ चन्द्रस्तद्यावानेव प्राणस्तावत्य आपस्तावानसौ

भा० प्राणं प्रति गुणभावोपगते एव हि ते अध्यात्ममिव तत्र प्रासङ्गिकासपत्नविज्ञानफलमिदं नास्य विदुषः सपत्नः प्रतिपक्षो भवति य एवं यथोक्तं प्राणमसपत्नं वेद ॥ १२ ॥

अथैतस्य प्रकृतस्य प्राजापत्यान्नस्य प्राणस्य न प्रजोक्तस्यानन्तरनिर्दिष्टस्यापः शरीरं कार्य्यं कारणाधारः पूर्व्ववज्ज्योतीरूपमसौ चन्द्रस्तत्र यावानेव प्राणो याव-त्परिमाणोऽध्यात्मादिभेदेषु तावद्व्याप्तिमत्य आपस्तावत्प-रिमाणास्तावानसौ चन्द्र आधेयस्तास्वप्स्वनुप्रविष्टः करण-भूतोऽध्यात्ममधिभूतञ्च तावद्व्याप्तिमानेव तान्येतानि पिता पाङ्क्तेन कर्म्मणा सृष्टानि त्रीण्यन्नानि वाङ्मनःप्राणाख्यानि अध्यात्ममधिभूतञ्च जगत्समस्तमेतैर्व्याप्तं नैतेभ्योऽन्यदस्ति

व्या० यथोक्तसपत्नव्याख्यानफलमाह । तेनेति । सपत्नगुणकप्राणोपासने फलवाक्यं प्रमाणयति । तत्रेति । प्राणस्यासपत्नत्वे सिद्धे सतीति यावत् ॥ प्रासङ्गिकत्वं प्रजोत्पत्तिप्रसङ्गादागतत्वं ॥ १२ ॥

आधिदैविकयोर्वाङ्मनसयोर्विभूतिनिर्देशानन्तर्य्यमथेत्युक्तं ॥ नन्वेतस्येतच्छब्देन प्रजात्वेनोक्तस्य प्राणस्य किमिति न ग्रहणं तत्राह । न प्रजेति ॥ अन्नत्रयस्य समप्रधानत्वेन प्रकृतत्वादेत-च्छब्देन प्रधानपरामर्शोपपत्तौ नाप्रधानं परामृश्यतेत्यर्थः । पूर्व्व-वद्वाचो मनसश्च पृथिवी द्यौश्च शरीरं यथा तथेत्यर्थः ॥ देहरूपे प्राणस्योक्ते व्याप्तिमवशिष्टां व्याचष्टे । तत्रेति ॥ तावानित्यादि प्रतीकमादाय व्याचष्टे । चन्द्र इति ॥ वाङ्मनःप्राणानामाधिदै-विकरूपेणोपासनं विधातुं वृत्तं कीर्त्तयति । तानीति ॥ एतेभ्यो

उ० चन्द्रस्त एते सर्व्व एव समाः सर्व्वेऽनन्ताः स यो हैतानन्तवत उपास्तेऽन्तवन्तꣳ स लोकं जयत्यथ यो हैताननन्तानुपास्तेऽनन्तꣳ स लोकं जयति ॥१३॥

भा० कार्य्यात्मकं कारणात्मकं वा। समस्तानि त्वेतानि प्रजापतिस्त एते वाङ्मनःप्राणाः सर्व्व एव समास्तुल्या व्याप्तिमन्तो यावत्प्राणिगोचरं साध्यात्माधिभूतं व्याप्य व्यवस्थिता अत एवानन्ता यावत्संसारभाविनो हि ते। न हि कार्य्यकरणप्रत्याख्यानेन संसारोऽवगम्यते। कार्य्यकरणात्मका हि त इत्युक्तं। स यः कश्चित् ह एतान् प्रजापतेरात्मभूतानन्तवतः परिच्छिन्नानधिभूतरूपेणाध्यात्मरूपेण वोपास्ते स च तदुपासनानुरूपमेव फलमन्तवन्तं लोकं जयति परिच्छिन्न एव जायते नैतेषामात्मभूतो भवतीत्यर्थः। अथ पुनर्ये हैताननन्तान् सर्व्वात्मकान् सर्व्वप्राणात्मभूतानपरिच्छिन्नानुपास्ते सोऽनन्तमेव लोकं जयति ॥ १३ ॥

आ० ऽतिरिक्तमधिष्ठानमस्तीत्याशङ्क्य विशिनष्टि। कार्य्यात्मकमिति॥ प्रजापतिरेतेभ्योऽतिरिक्तोऽस्तीत्याशङ्क्याह। समस्तानीति॥ सोपस्कारं वृत्तमनूद्य वाक्यमादाय व्याचष्टे। त एत इति॥ तुल्यां व्याप्तिमेव व्यनक्ति। यावदिति॥ तावदशेषं जगत्व्याप्येति योजना। तुल्यव्याप्तिमत्त्वमुपजीव्याह। अत एवेति॥ तेषां यावत्संसारभावित्वमभिव्यनक्ति। न हीति॥ कार्य्यकरणयोर्यावत्संसारभावित्वेऽपि प्राणानां किमायातमत आह। कार्य्येति॥ तेषु परिच्छिन्नत्वेन ध्याने दोषमाह। स य इति॥ एवं पातनिकां कृत्वा विवक्षितमुपासनमुपदिशति। अथेति॥ १३॥

उ० स एष संवत्सरः प्रजापतिः षोडशकलस्तस्य रात्रय एव पञ्चदश कला ध्रुवैवास्य षोडशी कला स रात्रिभिरेवा च पूर्य्यतेऽप च क्षीयते सोऽमा-

---

भा० पिता पाङ्क्तेन कर्मणा सप्तान्नानि सृष्ट्वा त्रीण्यन्नान्यात्मार्थमकरोदित्युक्तं । तान्येतानि पाङ्क्तकर्मफलभूतानि व्याख्यातानि । तत्र कथं पुनः पाङ्क्तस्य कर्मणः फलमेतानीत्युच्यते । यस्मात्तेष्वपि त्रिष्वन्नेषु पाङ्क्ततावगम्यते । वित्तकर्मणोरपि तत्र सम्भवात् । तत्र पृथिव्यग्नी माता । दिवादित्यौ पिता । योऽयमनयोरन्तरा प्राणः स प्रजेति व्याख्यातं । तत्र वित्तकर्मणी सम्भावयितव्य इत्यारम्भः । स एष संवत्सरो योऽयं त्र्यन्नात्मा प्रजापतिः प्रकृतः स एष संवत्सरात्मना विशेषतो निर्दिश्यते षोडशकलः षोडशकला अवयवा अस्य सोऽयं षोडशकलः संवत्सरः संवत्सरात्मा कालरूपः । तस्य च कालात्मनः प्रजापते रात्रय एवाहोरात्राणि तिथय इत्यर्थः । पञ्चदशकलाः ध्रुवा एव नित्या

व्या० अन्नत्रये फलवज्ज्ञानविषये व्याख्याते वक्तव्याभावात्किमुत्तरग्रन्थेनेत्याशङ्क्य वृत्तं कीर्त्तयति । पितेति ॥ तेषां तत्फलत्वे प्रमाणाभावमादाय शङ्कते । तत्रेति ॥ प्रकृतं व्याख्याने सप्तम्यर्थः । कार्य्यलिङ्गकमनुमानं प्रमाणमुत्तरमाह । उच्यत इति ॥ अनुमानमेव स्फुटयितुमन्नेषु पाङ्क्तत्वावगतिं दर्शयति । यस्मादिति । तस्मात्तत्कारणमपि तादृशमिति शेषः ॥ कथं पुनस्तत्र पाङ्क्तत्वधीरित्याशङ्क्याह । वित्तेति ॥ आत्मा जाया प्रजेति त्रयं सङ्ग्रहीतुमपि शब्दः ॥ उक्तं हेतुं व्यक्तीकर्त्तुमुक्तं स्मारयति । तत्रेति ॥ अन्नत्रयं सप्तम्यर्थः । तथापि कथं पाङ्क्तत्वमित्याशङ्क्यानन्तरग्रन्थ-

उ० वास्याꣳ रात्रिमेतया षोडश्या कलया सर्व्वमिदं
प्राणभृदनुप्रविश्य ततः प्रातर्जायते तस्मादेताꣳ

भा० व्यवस्थिता अस्य प्रजापतेः षोडशी षोडशानां पूरणी
कला स रात्रिभिरेव तिथिभिः कलोक्ताभिरापूर्य्यते
चापक्षीयते च । प्रतिपदाद्याभिर्हि चन्द्रमाः प्रजापतिः
शुक्लपक्षे आपूर्य्यते। कलाभिरुपचीयमानाभिर्वर्द्धते यावत्स-
म्पूर्णमण्डलः पौर्णमास्यां। ताभिरेवापचीयमानाभिः कला-
भिरपक्षीयते कृष्णपक्षे यावद्ध्रुवैका कला व्यवस्थिता
ऽमावास्यायां। सः प्रजापतिः कालात्मामावास्याममावा-
स्यायां रात्रिं रात्रौ या व्यवस्थिता ध्रुवा कलोक्तैतया
षोडश्या कलया सर्व्वमिदं प्राणभृत्प्राणिजातमनुप्रविश्य
यदपः पिबति यच्चौषधीरश्नाति तत्सर्व्वमेवौषध्यात्मना
सर्व्वं व्याप्यामावास्यां रात्रिमवस्थाय ततोऽपरेद्युः प्रात-
र्जायते द्वितीयया कलया संयुक्तः । एवं पाङ्क्तात्मको

आ० मवतारयति । तत्र वित्तेति । सप्तमी पूर्व्ववत् ॥ अवतारितग्रन्थं
व्याचष्टे । योऽयमित्यादिना ॥ कथं प्रजापतेस्तिथिभिरापूर्य्य-
माणत्वमपक्षीयमाणत्वञ्च तत्राह । प्रतिपदाद्यादिभिरिति ॥
वृद्धेर्मर्य्यादां दर्शयति । यावदिति ॥ अपक्षयस्य मर्य्यादामाह ।
यावद्ध्रुवेति ॥ अवशिष्टाममावास्यां निविष्टां कलां प्रपञ्चयन्
द्वितीयकलोत्पत्तिं शुक्लप्रतिपदि दर्शयति । स प्रजापतिरिति ॥
प्राणिजातमेव विशिनष्टि । यदिति ॥ स्थावरं जङ्गमञ्चेत्यर्थः ।
ओषध्यात्मनेत्युपलक्षणं जलात्मनेत्यपि द्रष्टव्यं । फलभूते प्रजापतौ
पाङ्क्तत्वं वक्तुमुपक्रान्तं तदद्यापि नोक्तमित्याशङ्क्याह । एवमिति ॥
तदेव पाङ्क्तत्वं व्यनक्ति । दिवेति ॥ कलानां वित्तवद्वित्तत्वे हेतु-

रात्रिं प्राणभृतः प्राणं न विच्छिन्द्यादपि कृकलासस्यैतस्या एव देवताया अपचित्यै ॥ १४ ॥

० ऽसौ प्रजापतिः । दिवादित्यो मनः पिता । पृथिव्यग्नी वाग्जाया माता तयोश्च प्राणः प्रजाः । चान्द्रमस्यस्तिथयः कलाः । वित्तमुपचयापचयधर्मित्वाद्वित्तवत्तासां च कलानां कालावयवानां जगत्परिणामहेतुत्वं कर्म । एवमेष कृत्स्नः प्रजापतिर्जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेत्येषणानुरूप एव पाङ्क्तस्य कर्मणः फलभूतः संवृत्तः । कारणानुविधायि हि कार्य्यमिति लोकेऽपि स्थितिर्यस्मादेष चन्द्र एतां रात्रिं सर्व्वप्राणिजातमनुप्रविष्टो ध्रुवया कलया वर्त्तते । तस्माद्धेतोरेताममावास्यां रात्रिं प्राणभृतः प्राणिनः प्राणन्न विच्छिन्द्यात्प्राणिनं न प्रमापयेदित्येतदपि कृकलासस्य । कृकलासो हि पापात्मा स्वभावेनैव हिंस्यते प्राणिभिर्दृष्टोऽप्यमङ्गल इति कृत्वा । ननु प्रतिषिद्धैव प्राणिहिंसा अहिंसन्सर्व्वभूतान्यन्यत्र तीर्थेभ्य इति । बाढं प्रतिषिद्धा तथापि नामावास्याया

व्या० माह । उपचयेति ॥ पाङ्क्तत्वनिर्द्देशेन लब्धमर्थमाह । एवमेष इति ॥ सम्प्रति कृत्स्नस्य प्रजापतेरुपक्रमानुसारित्वं दर्शयति । जायेति ॥ भवतु प्रजापतेरुक्तनीत्या पाङ्क्तत्वं तथापि कथं पाङ्क्तकर्म्मफलत्वं तत्राह । कारणेति ॥ पाङ्क्तकर्म्मफलत्वं प्रजापतेरुक्त्वा प्रासङ्गिकमर्थमाह । यस्मादिति ॥ अपि कृकलासस्येति कुतो विशेषोक्तिरित्याशङ्क्याह । कृकलासो हीति ॥ कुतस्तस्य पापात्मत्वं तत्राह । दृष्टोऽपीति ॥ विशेषनिषेधस्य शेषानुज्ञापरत्वाद्विरोधः सामान्यशास्त्रेण स्यादिति शङ्कते । नन्विति ॥

उ० योवै स संवत्सरः प्रजापतिः षोडशकलोऽयमेव स योऽयमेवंवित्पुरुषस्तस्य वित्तमेव पञ्चदशकला आत्मैवास्य षोडशी कला स वित्तेनै-.

भा० अन्यत्र प्रतिप्रसवार्थं वचनं हिंसायाः कृकलासविषये वा किन्तर्ह्येतस्याः सोमदेवताया अपचित्यै पूजार्थं॥ १४ ॥

यो वै स परोक्षाभिहितः संवत्सरः प्रजापतिः षोडशकलः स नैवात्यन्तं परोक्षो मन्तव्यो यस्मादयमेव सः प्रत्यक्ष उपलभ्यते। कोऽसावयं यो यथोक्तं अन्नात्मकं प्रजापतिमात्मभूतं स एवंवित्पुरुषः केन सामान्येन प्रजापतिरिति तदुच्यते तस्यैवंविदः पुरुषस्य गवादिवित्तमेव पञ्चदशकला उपचयापचयधर्म्मित्वात्तद्वित्तसाध्यञ्च कर्म्म। तस्य कृत्स्नतायै आत्मैव पिण्ड एवास्य विदुषः

व्या० तीर्थशब्दः शास्त्रविदितप्रदेशविषयः। साधारण्येन सर्व्वत्र निषिद्धापि हिंसा विशेषतोऽमावास्यायां निषिध्यमाना सोमदेवतापूजार्था। ततः शेषानुज्ञाभावान्न सामान्योक्तिविरोधोऽस्तीति परिहरति। बाढमिति॥ १४॥

यत्पूर्व्वमाधिदैविकान्यन्नात्मकप्रजापत्युपासनमुक्तं तदहमस्मि प्रजापतिरित्यहंग्रहेण कर्त्तव्यमित्याह। यो वा इति॥ प्रत्यक्षमुपलभ्यमानं प्रजापतिं प्रश्नद्वारा प्रकटयति। कोऽसाविति॥ तस्य प्रजापतित्वमप्रसिद्धमित्याशङ्क्य परिहरति। केनेत्यादिना। कलानां जगद्विपरिणामहेतुत्वे कर्म्मेत्युक्तं॥ वित्तेऽपि कर्म्महेतुत्वमस्ति तेन तत्र कलाशब्दप्रवृत्तिरुचितेत्याह। वित्तेति॥ यथा चन्द्रमाः कलाभिः शुक्लकृष्णपक्षयोरापूर्य्यते ऽपक्षीयते च तथा स विद्वान्वित्तेनोपचीयमानेनापूर्य्यतेऽपचीयमानेन चापक्षीयते। एतच्च लोकप्रसिद्धत्वान्नप्रतिपादनसापेक्षमि-

उ० वा च पूर्य्यतेऽप च क्षीयते तदेतन्नभ्यं यदयमात्मा प्रधिर्वित्तं तस्माद्यद्यपि सर्व्वज्यानिं जीयत आत्मना चेज्जीवति प्रधिनागादित्येवाहुः ॥ १५ ॥

अथ त्रयो वावलोका मनुष्यलोकः पितृलोको

भा० षोडशी कला ध्रुवस्थानीया स चन्द्रवद्वित्तेनापूर्य्यते चापक्षीयते च। तदेतल्लोके प्रसिद्धं। तदेतन्नभ्यं नाभ्यै हितं नभ्यं नाभिं वार्हतीति किं तद्यदयं योऽयमात्मा पिण्डः प्रधिर्व्वित्तं परिवारस्थानीयं वाह्यं चक्रस्येवारनेम्यादि। तस्माद्यद्यपि सर्व्वज्यानिं सर्व्वस्वापहरणं जीयते हीयते ग्लानिं प्राप्नोतीत्यात्मना चक्रनाभिस्थानीयेन चेद्यदि जीवति प्रधिना वाह्येन परिवारेणायमगात् क्षीणोऽयं यथा चक्रमरनेमिविमुक्तमेवमाऊर्जीवश्चेदरनेमिस्थानीयेन वित्तेन पुनरुपचीयत इत्यभिप्रायः ॥ १५ ॥

एवं पाङ्क्तेन दैववित्तविद्यासंयुक्तेन कर्म्मणा त्र्यन्नात्मकः प्रजापतिर्भवतीति व्याख्यातमनन्तरञ्च जायादि-

---

व्या० त्याह। स चन्द्रवदिति॥ आत्मैव ध्रुवा कलेत्युक्तं तदेव रथचक्रदृष्टान्तेन स्पष्टयति। तदेतदिति॥ नाभिश्चक्रपिण्डिका तत्स्थानीयं वा नभ्यं तदेव प्रश्नद्वारा स्फोरयति। किन्तदिति॥ शरीरस्य चक्रपिण्डिकास्थानीयत्वमयुक्तं परिवारादर्शनादित्याशङ्क्याह प्रधिरिति॥ शरीरस्य रथचक्रपिण्डिकास्थानीयत्वे फलितमाह। तस्मादिति। पदार्थमुक्त्वा वाक्यार्थमाह। जीवश्चेति॥ १५॥

अन्नत्रयात्मनि प्रजापतावहङ्ग्रहोपासनस्य फलस्योक्तत्वादन्यथाभावादुत्तरग्रन्थवैयर्थ्यमित्याशङ्क्य तद्विषयं वक्तुं वृत्तमनुवदति।

उ० देवलोक इति सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्म्मणा कर्म्मणा पितृलोको विद्यया देवलोको देवलोको वै लोकानाᳫं श्रेष्ठस्तस्माद्विद्यां प्रशᳫंसन्ति ॥ १६ ॥

भा० वित्तं परिवारस्थानीयमित्युक्तं । तत्र पुत्रकर्म्मापर विद्यानां लोकप्राप्तिसाधनत्वमात्रे सामान्येनावगतं न पुत्रादीनां लोकप्राप्तिफलं प्रति विशेषसम्बन्धनियमः । सोऽयं पुत्रादीनां साधनानां साध्यविशेषसम्बन्धो वक्तव्य इत्युत्तरकण्डिका प्रणीयते । अथेति वाक्योपन्यासार्थस्त्रयो वा वेत्यवधारणार्थस्त्रय एव शास्त्रोक्तसाधनार्हा लोका न्यूनानधिका वा । के त इत्युच्यते । मनुष्यलोकः पितृलोको देवलोक इति । तेषां सोऽयं मनुष्यलोकः पुत्रेणैव साधनेन जय्यो जेतव्यः साध्यो यथा च पुत्रेण जेतव्यस्तथोत्तरत्र वक्ष्यामो नान्येन कर्म्मणा विद्यया वेति वाक्यशेषः । कर्म्मणा

आ० एविमति । साधनोक्त्यैव फलमुक्तं ॥ तयोर्मिथो वद्धत्वात्प्राजापत्यश्च फलं प्रागेव दर्शितं तत्किमुत्तरग्रन्थेनेत्याशङ्क्य सामान्येन तत्प्रतीतावपीदमस्येति विशेषो नोक्तास्तदुक्त्यर्थमुत्तरा श्रुतिरित्याह । तत्रेति । पूर्व्वग्रन्थः सप्तम्यर्थः । नियमो नावगत इति सम्बन्धः । उपन्यासः प्रारम्भः । वा चवशब्दस्यावधारणरूपमर्थं विवृणोति । त्रय एवेति ॥ तदेव लोकत्रयं प्रश्नद्वारा स्फोरयति । के त इत्यादिना ॥ जयो नाम पुत्रेण मनुष्यलोकातिक्रम इति केचित्तान् प्रत्याह । साध्य इति ॥ पुत्रेणास्य सिद्धत्वमसिद्धत्वमित्याशङ्क्याह । यथा चेति । द्विविधो हि मनुष्यलोकज्जो यः कर्त्तव्यशेषानुष्ठानं भोगश्च । तत्राद्यमाश्रित्यान्ययोगव्यवच्छेदमेवकारार्थं

उ॰ अथातः सम्प्रत्तिर्यदा प्रैष्यन्मन्यतेऽथ पुत्रमाह त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति स पुत्रः प्रत्या-

---

भा॰ अग्निहोत्रादिलक्षणेन केवलेन पितृलोको जेतव्यो न पुत्रेण नापि विद्यया। विद्यया देवलोको न पुत्रेण नापि कर्म्मणा। देवलोको वै लोकानां त्रयाणां श्रेष्ठः प्रशस्यतमः। तस्मात्तत्साधनत्वाद्विद्यां प्रशंसन्ति॥ १६॥

एवं साध्यलोकत्रयफलभेदेन विनियुक्तानि पुत्रकर्म्मविद्याख्यानि त्रीणि साधनानि। जाया तु पुत्रकर्म्मार्थत्वान्न पृथक्साधनमिति पृथङ्नाभिहिता। वित्तं च कर्म्मसाधनत्वान्न पृथक्साधनं। विद्याकर्म्मणोर्लोकजयहेतुत्वं स्वात्मप्रतिलाभेनैव भवतीति प्रसिद्धं। पुत्रस्य त्वक्रियात्मकत्वात्केन प्रकारेण लोकजयहेतुत्वमिति न ज्ञायतेऽतस्तद्वक्तव्यमित्यथानन्तरमारभ्यते। सम्प्रत्तिः सम्प्रदानं। सम्प्रत्तिरिति वक्ष्यमाणस्य कर्म्मणो नामधेयं। पुत्रे हि

धा॰ दर्शयति। नान्येनेति। द्वितीये त्वयोगव्यवच्छेदार्थः। ज्योतिषेमं लोकं जयतीति साधनान्तरेणापि मनुष्यलोकजयश्रुतेरिति भावः। पूर्व्ववाक्यस्थमेवकारमुत्तरवाक्ययोरनुषक्तमुपेत्य वाक्यद्वयं व्याचष्टे। कर्म्मणेत्यादिना॥ साधनद्वयापेक्षया फलद्वारकमुत्कर्षं विद्यायां दर्शयति। विद्यया देवलोक इति॥ १६॥

वृत्तमनुवदति। एवमिति॥ पुत्रादिवज्जायावित्तयोरपि प्रधानत्वात्फलविशेषे विनियोगो वक्तव्य इत्याशङ्क्याह। जायात्विति। न पृथक् पुत्रकर्म्मभ्यामिति शेषः। न पृथक् साधनं कर्म्मणः सकाशादिति द्रष्टव्यं॥ भवत्येवं साधनत्रयनियमस्तथापि विद्याकर्म्मणी हित्वा समनन्तरग्रन्थे किमिति पुत्रनिरूपणमित्या-

उ० हाहं ब्रह्माहं यज्ञोऽहं लोक इति यद्वै किञ्चानूक्तं तस्य सर्व्वस्य ब्रह्मेत्येकता ।

भा० स्वात्मव्यापारसम्प्रदानं करोत्यनेन प्रकारेण पिता तेन सम्प्रत्तिसञ्ज्ञकमिदं कर्म्म तत्कस्मिन्काले कर्त्तव्यमित्याह । स पिता यदा यस्मिन्काले प्रैष्यन्मरिष्यन्मरिष्यामीत्यरिष्टादिदर्शनेन मन्यतेऽथ तदा पुत्रमाहूयाह त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति स एवमुक्तः प्रत्याह स तु पूर्व्वमेवानुशिष्टो जानाति ममैतत्कर्त्तव्यमिति तेनाह अहं ब्रह्माहं यज्ञोऽहं लोक इति । एतद्वाक्यत्रयमेतस्यार्थस्तिरोहित इति मन्वाना श्रुतिर्व्याख्यानाय प्रवर्त्तते । यद्वै किञ्च यत्किञ्च शिष्टमनूक्तमधीतमनधीतञ्च तस्य सर्व्वस्यैव ब्रह्मेत्येतस्मिन् पद एकतैकत्वं योऽध्ययनव्यापारो मम कर्त्तव्य आसीदेतावन्तं कालं वेदविषयः । स इत ऊर्द्ध्वं त्वं ब्रह्म त्वत्कर्त्तकोऽस्त्वित्यर्थः ॥

व्या० शङ्क्याह । विद्याकर्म्मणोरिति ॥ यथोक्ते चोद्ये पुत्रस्य लोकहेतुत्वज्ञापनार्थं सम्प्रत्तिवाक्यमित्याह । अत इति ॥ अथात इति पदद्वयं व्याख्याय सम्प्रत्तिपदं व्याचष्टे । सम्प्रत्तिरिति ॥ किमिदं सम्प्रदानं नाम तदाह । सम्प्रत्तिरितीति ॥ तदेव कर्म्म विशदयति । पुत्रे हीति । अनेन प्रकारेणेति वक्ष्यमाणप्रकारोक्तिः । अरिष्टादीत्यादिपदेन दुःस्वप्नादिसङ्ग्रहः । प्रत्याह वाक्यत्रयमिति सम्बन्धः ॥ पुत्रस्याहं ब्रह्मेत्यादि प्रतिवचने हेतुमाह । स त्विति । मया कार्य्यं यदध्ययनादि तदेवावशिष्टं त्वया कार्य्यमिति । पुत्रस्य प्रागनुशिष्टताभावे प्रतिवचनानुपपत्तिरित्यर्थः ॥ यद्वै किञ्चेत्यादि वाक्यानां पुत्रानुमन्त्रणवाक्यैरर्थभेदाभावात्पुनरुक्तिरित्याशङ्क्याह । एतस्येति ॥ यद्वै किञ्चेत्यादिवाक्ये वाक्यार्थमाह । योऽध्ययनेति ॥

उ॰ ये वै के च यज्ञास्तेषाꣳ सर्व्वेषां यज्ञ इत्येकता ये वै के च लोकास्तेषाꣳ सर्व्वेषां लोक इत्येकते-

---

भा॰ तथा ये वै के च यज्ञा अनुष्ठेयाः सन्तो मयानुष्ठितास्चानुष्ठिताश्च तेषां सर्व्वेषां यज्ञ इत्येतस्मिन् पद एकत्वं मत्कर्त्तृका यज्ञा य आसन्। त इत ऊर्द्ध्वं यज्ञस्त्वत्कर्त्तृका भवन्त्वित्यर्थः। ये वै के च लोका मया तेजव्याः सन्तो जिता अजिताश्च तेषां सर्व्वेषां लोक इत्येतस्मिन्पदे एकता इत ऊर्द्ध्व त्वं लोकस्त्वया जेतव्यास्ते इत ऊर्द्ध्वं मयाध्ययनयज्ञलोकजयकर्त्तव्यक्रतुस्त्वयि समर्पितोऽहन्तु मुक्तोऽस्मि कर्त्तव्यताबन्धनविषयात्क्रतोः। स च सर्व्वं तथैव प्रतिपन्नवान्पुत्रोऽनुशिष्टत्वात्। तत्रेमं पितुरभिप्रायं मन्वानाऽऽचष्टे श्रुतिरेतावद्वेतत्परिमाणं वै इदं सर्व्वं यद्गृहिणा कर्त्तव्यं यदुत वेदा अध्येतव्या यज्ञा यष्टव्या लोकाश्च जेतव्या एतन्मा सर्व्वं सन्नयं सर्व्वं हीमं भारं मदधीनं

व्या॰ त्वं ब्रह्मेति वाक्यवत् यज्ञ इति वाक्यमपि शक्यं व्याख्यातुमित्याह। तथेति॥ ब्राह्मणार्थं सङ्गृह्णाति। मत्कर्त्तृका इति॥ त्वं लोक इत्यस्य व्याख्यानं ये वै केचिदित्यादि। तत्र पदार्थानुक्त्वा वाक्यार्थमाह। इत इति। किमिति त्वत्कर्त्तृकमध्ययनादिकमपि समर्थ्यते त्वयैव किं नानुष्ठीयते तत्राह॥ इत ऊर्द्ध्वमिति। कर्त्तव्यतैव बन्धनं तद्विषयः। क्रतुः सङ्कल्पस्तस्मादिति यावत्। स पुत्र इत्यादेस्तात्पर्य्यमाह। स चेति। तत्रेत्यथोक्तानुशासनोक्तिः) एतत्सर्व्वमित्यादि प्रतीकमादाय व्याचष्टे। सर्व्वं हीति। अनद्यतने भूतेऽर्थे विहितस्य लङो भविष्यदर्थत्वं कथमित्याशङ्क्याह। छन्दसीति॥ पुत्रानुशासनस्य फलवत्त्वमाह। यस्मादित्यादिना॥

उ० तावद्वा इद॑ सर्व्वमेतन्मा सर्व्व॑ सन्नयमितोऽभुन-
जदिति तस्मात् पुत्रमनुशिष्टं लोक्यमाहुस्तस्मा-

भा० मत्तोऽपच्छिद्यात्मनि निधायेतोऽस्माल्लोकान्मा मामभुन-
जत् पालयिष्यतीति लडर्थे लङ् छन्दसि कालनियमा-
भावाद्यस्मादेवं सम्पन्नः पुत्रः पितरमस्माल्लोकात्कर्त्तव्य-
तावन्धनतो मोचयिष्यति तस्मात्पुत्रमनुशिष्टं लोक्यं
लोकहितं पितुराहुर्ब्राह्मणाः । अत एव ह्येनं पुत्रमनु-
शासति लोक्योऽयं नः स्यादिति पितरः स पिता यदा
यस्मिन्काले एवंवित्पुत्रसमर्पितकर्त्तव्यताक्रतुरस्माल्लोका-
त्प्रैति म्रियतेऽथ तदा एभिरेव प्रकृतैर्वाङ्मनःप्राणैः
पुत्रमाविशति पुत्रं व्याप्नोति अध्यात्मपरिच्छेदहेत्वपग-
मात्पितुर्वाङ्मनःप्राणाः स्वेनाधिदैविकेन रूपेण पृथिव्य-
ग्न्यर्काद्यात्मनाभिन्नघटप्रदीपप्रकाशवत्सर्व्वमाविशन्ति तैः
प्राणैः सह पिताप्याविशति वाङ्मनःप्राणात्मभावितत्वा-
त्पितुरहमस्म्यनन्ता वाङ्मनःप्राणा अध्यात्मादिभेदवि-

आ० कृतसम्प्रत्तिकः सन् पिता किं करोतीत्यपेक्षायामाह । स पितेति ॥
कोऽयं प्रवेशो न हि विशिष्टस्य केवलस्य वा विले सर्पवत्प्रवेशः
सम्भवत्यत आह । अध्यात्मेति ॥ हेतुर्मिथ्याज्ञानादिः । वागा-
दिष्वाविष्टेष्वपि कुतोऽर्थान्तरस्य पितुरावेशधीरित्याशङ्क्याह ।
वागिति ॥ तद्भावित्वमेव स्फोरयति । अहमिति ॥ भावना-
फलमाह । तस्मादिति ॥ पुत्रविशेषणात्परिच्छिन्नत्वं पितुस्त-
दवस्थमित्याशङ्क्याह । सर्व्वेषां हीति । मृतस्य पितुरितो लोका-
द्व्यावृत्तस्य कथं यथोक्तरूपत्वमित्याशङ्क्याह । एतदुक्तमिति ॥

उ॰ देनमनुशासति स यदैवंविदस्माल्लोकात्प्रैत्यथैभि
रेव प्राणैः सह पुत्रमाविशति १ स यद्यनेन
किञ्चिदक्ष्णया कृतं भवति तस्मादेनꣳ सर्व्व-

भा॰ त्मारा इत्येवं भावितो हि पिता। तस्मात्तत्प्राणानुवृत्तिलं
पितुर्भवतीति युक्तमुक्तमेभिरेव प्राणैः सह पुत्रमाविशतीति।
सर्व्वेषां ह्यभावात्मा भवति पुत्रस्य चैतदुक्तं भवति। यस्य
पितुरेवमनुशिष्टः पुत्रो भवति सोऽस्मिन्नेव लोके वर्त्तते
पुत्ररूपेण नैव मृतो मन्तव्य इत्यर्थः। तथा च श्रुत्यन्तरे
सोऽस्यायमितर आत्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयत इति॥
अथेदानीं पुत्रनिर्व्वचनमाह। स पुत्रो यदि कदाचि-
दनेन पित्रा अक्ष्णया कोणच्छिद्रतोऽन्तराऽकृतं भवति
कर्त्तव्यं। तस्मात्कर्त्तव्यतारूपात्पित्राऽकृतात्सर्व्वस्माल्लोकप्रा-
प्तिप्रतिबन्धरूपात्पुत्रो मुञ्चति मोचयति तत्सर्व्वं स्वयम-
तिष्ठन् पूरयित्वा। तस्मात्पूरणेण त्रायति पितरं। यस्मात्त-

व्या॰ पुत्ररूपेणात्र स्थितिमेव विभजते। नैवेति॥ मृतः पिताऽनु-
शिष्टपुत्रात्मनात्र वर्त्तते नास्मदत्यन्तं व्यावृत्तः फलरूपेण च पर-
त्रेति भावः। उक्तेऽर्थे ऐतरेयश्रुतिं संवादयति। तथा चेति॥
षष्ठीप्रथमाभ्यां पितापुत्रावुच्येते।

सयदीत्यादिवाक्यमवतार्य्य व्याकरोति। अथेत्यादिना॥ अकृत-
मकृतादिति च्छेदः। तस्मादिति प्रतीकमादाय व्याकरोति।
पूरणेनेति। तदेव प्रपञ्चयति। इदं तदिति॥ पुत्रवैशिष्ट्यं
निगमयति। स पितेति॥ पुत्रेणैतल्लोकजयमुपसंहरति। एव-
मिति॥ यथोक्तात्पुत्रादिद्याकर्म्मणोर्विशेषमाह। न तथेति॥
कथं तर्हि ताभ्यां पिता तौ जयति तत्राह। स्वरूपेति॥ तदेव

उ० स्मात्पुत्रो मुञ्चति तस्मात्पुत्रो नाम स पुत्रेणै-

भा० स्मात्पुत्रो नामेदं तत्पुत्रस्य पुत्रत्वं यत्पितुश्छिद्रं पूरयित्वा त्रायति स पितैवंविधेन पुत्रेण मृतोऽपि सन्नमृतोऽस्मिन्नेव लोके प्रतितिष्ठत्येवममौ पिता पुत्रेणेमं मनुष्यलोकं जयति। न तथा विद्याकर्मभ्यां देवलोकपितृलोकौ स्वरूपलाभसत्तामात्रेण। न हि विद्याकर्मणी स्वरूपलाभव्यतिरेकेण पुत्रवद्व्यापारान्तरापेक्षया लोकजयहेतुत्वं प्रतिपद्येते। अथ कृतसम्प्रत्तिकं पितरमेनमेते वागादयः प्राणा दैवा हिरण्यगर्भा अमृता अमरणधर्माण आविशन्ति कथमिति वक्ष्यति पृथिव्यै चैनमित्यादि। एवं पुत्रकर्मापरविद्यानां मनुष्यलोकपितृलोकदेवलोकसाध्यार्थता प्रदर्शिता श्रुत्या स्वयमेवात्र केचिद्वावदूकाः

व्या० स्पष्टयति। न हीति॥ अनुशिष्टपुत्रेणैतल्लोकजयिनं पितरमधिकृत्य अथैनमित्यादि वाक्यं तद्व्याकरोति। अथेति॥ पुत्रप्रकरणविच्छेदार्थोऽथशब्दः। आवेशप्रकारबुभुत्सायामुत्तरवाक्यप्रवृत्तिं प्रतिजानीते। कथमित्यादिना। पृथिव्यै चेत्यादिवाक्यस्य व्यावर्त्यं पक्षं वृत्तानुवादपूर्वकमुत्थापयति। एवमिति॥ अत्रेति वैदिकान्निर्धारयितुं सप्तमी। बहुवदनशीलत्वे हेतुः श्रुत्युक्त्येति। मोक्षार्थतां न्यायाकरणश्रुतिस्मृतिभ्यां वदन्तीति शेषः॥ मीमांसकपक्षं प्रकृतश्रुतिविरोधेन दूषयति। तेषामिति॥ कथमित्याशङ्क्य श्रुतेरादिमध्यावसानालोचनया पुत्रादेः संसारफलत्वावगमान्न मुक्तिफलतेत्याह। जायेत्यादिना॥ पुत्रादीनाञ्चेति चकारादेतावान्वै काम इति मध्ये सङ्ग्रहः। यदुक्तं न्यायाकरणश्रुतिस्मृतिभ्यां पुत्रादेर्मुक्तिफलतेति तत्राह। तस्मादिति॥ पुत्रादेः श्रुतं संसारफलत्वं परामृष्टुं तच्छब्दः। श्रुतिशब्दः

उ॰ वास्मिँल्लोके प्रतितिष्ठत्यथैनमेते देवाः प्राणा अमृता आविशन्ति ॥ १७ ॥

भा॰ श्रुत्युक्तविशेषार्थानभिज्ञाः सन्तः पुत्रादिसाधनानां मोक्षार्थतां वदन्ति। तेषां मुखापिधानं श्रुत्येदं कृतं जाया मे स्यादित्यादि पाङ्क्तं काम्यं कर्मेत्युपक्रमेण पुत्रादीनां च साध्यविशेषविनियोगोपसंहारेण च। तस्मादृणश्रुतिरविद्वद्विषया न परमात्मविद्याविषयेति सिद्धं। वक्ष्यति च किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक इति। केचित्तु पितृलोकदेवलोकजयोऽपि पितृलोकदेवलोकाभ्यां व्यावृत्तिरेव। तस्मात्पुत्रकर्मापरविद्याभिः समुच्चित्यानुष्ठिताभिस्त्रिभ्य एतेभ्यो लोकेभ्यो व्यावृत्तः परमात्मविज्ञानेन मोक्षमधिगच्छतीति परम्परया मोक्षार्थान्येव पुत्रादि-

---

व्या॰ स्मृतेरुपलक्षणार्थः। श्रुतिस्मृत्योरविरक्तविषयत्वे वाक्यशेषमनुकूलयति। वक्ष्यति चेति॥ मीमांसकपक्षं निराकृत्य भर्तृप्रपञ्चपक्षमुत्थापयति। केचित्त्विति। मनुष्यलोकजयस्ततो व्यावृत्तिर्येत्यपरार्थः। पुत्रादिसाधनाधीनतया लोकत्रयव्यावृत्तावपि कथं मोक्षः संपद्यते। न हि पुत्रादीन्येव मुक्तिसाधनानि विरक्तत्वविरोधादित्याशङ्क्याह। तस्मादिति॥ एवमेवैं चेत्याद्योत्तरा श्रुतिरेव मीमांसकमतवद्भर्तृप्रपञ्चमतमपि निराकरोतीति दूषयति। तेषामिति। कथं सा तन्मतं निराकरोतीत्याशङ्क्य श्रुतिं विभिनष्टि। कृतेति॥ अनात्मोपासितुस्तदात्मवचनविरुद्धं परमतमित्ययुक्तं। तदात्मैव मुक्तित्वादित्याशङ्क्याह। न चेति॥ तथापि कथं यथोक्तं फलं मोक्षो न भवति तत्राह। सेयेति॥ अनात्मनो ज्ञानकर्मजन्यत्वे हेतुमाह। पुनः पुनरिति। सूत्रात्मेरमुक्तित्वे हेत्वन्तरमाह। यदेति॥ कार्यकारणवत्त्वश्रुतेरपि

उ॰ पृथिव्यै चैनमग्नेश्च दैवी वागाविशति सा वै दैवी वाग्यया यद्यदेव वदति तत्तद्भवति ॥१८॥

भा॰ साधनानीच्छन्ति। तेषामपि सुखापिधानायेयमेव श्रुतिरुत्तराकृतसम्प्रत्तिकस्य पुत्रिणः कर्म्मिणस्त्वनात्मविद्याविदः फलप्रदर्शनाय प्रवृत्ता। न चेदमेव फलं मोक्षफलमिति शक्यं वक्तुं। अन्नसम्बन्धान्मेधातपः*कर्मत्वाच्चान्नानां पुनः पुनर्जनयत इति दर्शनात्। यद्धैतन्न कुर्य्यात्क्षीयेत हेति च क्षयश्रवणाच्छरीरं ज्योतीरूपमिति च कार्य्यकरणत्वोपपत्तेस्त्रयं वा इदमिति च नामरूपकर्म्मात्मत्वेनोपसंहारात्। न चेदमेव साधनत्रयं संहतं सत्कस्यचिन्मोक्षार्थं कस्यचित् अनात्मफलमित्यस्मादेव वाक्यादवगन्तुं शक्यं। पुत्रादिसाधनानां अनात्मफलदर्शनेनैवोपक्षीणत्वाद्वाक्यस्य॥ १७॥

पृथिव्यै पृथिव्याश्च एनमग्नेश्च दैवी अधिदैवात्मिका वागेनं कृतसम्प्रत्तिकमाविशति सर्व्वेषां हि वाच उपा-

आ॰ सूत्रभावो न मुक्तिरित्याह। शरीरमिति। अविद्यातदुत्थद्वैतस्यात्मकत्वेनोपसंहारात्तदात्मसूत्रभावो बन्धान्तर्भूतो न मुक्तिरिति युक्त्यन्तरमाह। त्रयमिति॥ नन्वविरक्तस्याज्ञस्य सूत्राप्तिफलमपि कर्म्मादिविरक्तस्य विदुषो मुक्तिफलमिति व्यवस्थितिर्नेत्याह। न चेदमिति॥ न हि पृथिव्यै चेत्यादिवाक्यस्यैकस्य सकृच्छ्रुतस्यानेकार्थत्वं। भिद्यते हि तथा वाक्यमिति न्यायादित्यर्थः॥ १७॥

पृथिव्यै चेत्यादिवाक्यावष्टम्भेन पक्षद्वयं प्रतिक्षिप्य तदक्षराणि व्याचष्टे। पृथिव्या इति। एनमित्युक्तमनूद्य व्याकरोति। एन-

* कार्य्येतिपाठान्तरः।

उ० दिवश्चैनमादित्याच्च दैवं मन आविशति तद्वै दैवं मनो येनानन्द्येव भवत्यथो न शोचति ॥ १९ ॥

भा० दानभूता दैवी वाक् पृथिव्यग्निलक्षणा। सा ह्याध्यात्मिकासङ्गादिदोषैर्निरुद्धा। विदुषस्तद्दोषापगमे आवरणभङ्ग इवोदकं प्रदीपप्रकाशवच्च व्याप्नोति। तदेतदुच्यते पृथिव्या अग्नेश्चैनं दैवी वागाविशतीति। सा च दैवी वागनृतादिदोषरहिता शुद्धा। यया वाचा दैव्या यद्यदेव आत्मने परस्मै वा वदति तत्तद्भवत्यमोघाऽप्रतिबद्धास्य वाग्भवतीत्यर्थः ॥ १८ ॥

तथा दिवश्चैनं आदित्याच्च दैवं मन आविशति। तच्च दैवं मनः स्वभावनिर्म्मलत्वाद्येन मनसाऽसावानन्द्येव भवति सुख्येव भवत्यथो ऽपि न शोचति शोकादिनिमित्तासंयोगात् ॥ १९ ॥

व्या० मिति ॥ कथं पुनः सूत्रात्मभूता वागुपासकमाविशति तत्राह। सर्व्वेषां हीति। तर्हि तयोरभेदादविदुषोऽपि व्याप्त्यैव वागिति विदुषि विशेषो नास्तीत्याशङ्क्याह। सा हीति। दैव्या वाचि दोषविगममुत्तरवाक्येन साधयति। सा चेति। विद्वद्वाचः स्वरूपं सङ्क्षिपति। अमोघेति ॥ १८ ॥

वाचि दर्शितन्यायं मनस्यतिदिशति। तथेति। यन्मनः स्वभावनिर्म्मलत्वेन दैवमित्युक्तं तदेव विशिनष्टि। मन इति। असाविति विद्वदुक्तिः। येन मनसा विद्वान्न शोचत्यपि तद्धेत्वभावात्तद्दैवमिति पूर्व्वेण सम्बन्धः ॥ १९ ॥

उ० अद्भ्यश्चैनं चन्द्रमसश्च दैवः प्राण आविशति स वै दैवः प्राणो यः सञ्चरꣳश्चासञ्चरꣳश्च न व्यथतेऽथो न रिष्यति स एवंवित्सर्वेषां भूतानामात्मा भवति यथैषा देवतैवꣳ स यथैतां देवताꣳ सर्वाणि भूतान्यवन्त्येवꣳ हैवंविदꣳ सर्वाणि भूतान्यवन्ति ।

भा० तथाद्भ्यश्चैनं चन्द्रमसश्च दैवः प्राण आविशति । स वै दैवः प्राणः किं लक्षण इत्युच्यते । यः सञ्चरन् प्राणिभेदेष्वसञ्चरन् समष्टिव्यष्टिरूपेणाथ वा सञ्चरन् जङ्गमेष्वसञ्चरन् स्थावरेषु न व्यथते न दुःखनिमित्तेन भयेन युज्यते । अथो ऽपि न रिष्यति न विनश्यति न हिंसामापद्यते । स यो यथोक्तमेवं वेत्ति अन्नात्मदर्शनं स सर्वेषां भूतानामात्मा भवति सर्वेषां भूतानां प्राणो भवति सर्वेषां भूतानां मनो भवति वाग्भवतीत्येवं सर्वभूतात्मतया सर्वज्ञो भवतीत्यर्थः । सर्वकृच्च यथैषा पूर्वसिद्धा हिरण्यगर्भदेवता । एवमेव नास्य सर्वज्ञत्वे सर्वकृत्त्वे वा कश्चित्प्रतिघातः । किञ्च स इति दृष्टान्तनिर्देशो यथैतां हिरण्यगर्भदेवतामिज्यादिभिः सर्वाणि भूतान्यवन्ति पालयन्ति

आ० मनस्युक्तं न्यायं प्राणे अतिदिशति । तथेति ॥ तमेव दैवं प्राणं प्रश्नपूर्वकं प्रकटयति । स वा इति । स एवंविदित्यादि व्याचष्टे । स य इति । विदिरत्र लाभार्थः । न केवलं यथोक्तमेव विद्याफलं

उ॰ यदु किञ्चेमाः प्रजाः शोचन्त्यमैवासां तद्भवति

भा॰ पूजयन्त्येवं हैवंविदं सर्व्वाणि भूतान्यवन्ति इज्यादिलक्षणां पूजां सततं प्रयुञ्जत इत्यर्थः ।

अथेदमाशङ्क्यते सर्व्वप्राणिनामात्मा भवतीत्युक्तं। तस्य च सर्व्वप्राणिकार्य्यकरणात्मकत्वे सर्व्वप्राणिसुखदुःखैः सम्बध्यत इति। तन्न। अपरिच्छिन्नबुद्धित्वात्परिच्छिन्नात्मबुद्धीनां ह्याक्रोशादौ दुःखसम्बन्धो दृष्टोऽनेनाहमाक्रुष्ट इत्यस्य तु सर्व्वात्मना य आक्रुश्यते यश्चाक्रोशति तयोरात्मत्व-बुद्धिविशेषाभावान्न तन्निमित्तं दुःखमुपपद्यते मरणदुःख-वच्च निमित्ताभावात्। यथा हि कस्मिंश्चिन्मृते कस्यचिद्दुःख-मुत्पद्यते ममासौ पुत्रो भ्राता चेति पुत्रादिनिमित्तं। तन्नि-मित्ताभावे तन्मरणदर्शिनोऽपि नैव दुःखमुपजायते। तथे-श्वरस्यापरिच्छिन्नात्मनो ममतादिदुःखनिमित्तमिथ्या-

व्या॰ किन्तु फलान्तरमप्यस्तीत्याह। किञ्चेति॥ सर्व्वभूतात्मत्वे तद्दोष-योगात्प्राजापत्यं पदमनादेयमित्युत्तरवाक्यव्यावर्त्त्यामाशङ्कामाह। अथेति। सर्व्वप्राणिसुखदुःखैरित्यस्मादूर्द्ध्वं सम्बन्धोऽध्याहर्त्तव्यः॥ सर्व्वात्मके विदुष्यैकैकभूतनिष्ठदोषयोगो नास्तीत्युत्तरमाह। तन्नेति॥ तदेव प्रपञ्चयति। परिच्छिन्नेति॥ अपरिच्छिन्नधीत्वेऽपि सूत्रात्मके विदुषि सर्व्वभूतान्तर्भावात्तद्दुःखादियोगः स्यादेवे-त्याशङ्क्य जठरकुहरविपरिवर्त्तिक्रिमिदोषैरस्माकमसंसर्गवत्त्र-कृतेऽपि सम्भवान्नैवमित्यभिप्रेत्याह। मरणेति। नोपपद्यते विदुषो दुःखमिति पूर्व्वेण सम्बन्धः॥ दृष्टान्तं विवृणोति। यथेति॥ मैत्रस्य स्वहस्ताद्यभिमानवतस्तद्दुःखादियोगवद्विदुषः सूत्रात्मनः स्वांशभूतसर्व्वभूताभिमानिनस्तद्दुःखादिसंसर्गः स्यादि-

उ० पुण्यमेवामुं गच्छति न ह वै देवान्पापं गच्छति ॥ २० ॥

अथातो व्रतमीमाꣳसा प्रजापतिर्ह कर्म्माणि ससृजे तानि सृष्टान्यन्योन्येनास्पर्द्धन्त वदिष्याम्ये-

भा० ज्ञानादिदोषाभावान्नैव दुःखमुपजायते। तदेतदुच्यते। यत् उ किञ्च यत्किञ्चेमाः प्रजाः शोचन्ति अमैव सहैव प्रजाभिस्तच्छोकादिनिमित्तं दुःखं संयुक्तं भवत्यासां प्रजानां परिच्छिन्नबुद्धिजनितत्वात्सर्व्वात्मनस्तु। केन सह किं संयुक्तं भवेदित्युक्तं वा। अमुन्तु प्राजापत्ये पदे वर्त्तमानं पुण्यमेव शुभमेव फलमभिप्रेतं पुण्यमिति। निरतिशयं हि तेन पुण्यं कृतं तेन तत्फलमेव गच्छति। न ह वै देवान्पापं गच्छति पापफलस्यावसराभावात्पापं फलं दुःखं न गच्छतीत्यर्थः ॥ २० ॥

त एते सर्व्व एव समाः सर्व्वेऽनन्ता इत्यविशेषेण वाङ्मनःप्राणानामुपासनमुक्तं नान्यतमगतो विशेष उक्तः। किमे-

आ० त्याशङ्क्य दार्ष्टान्तिकमाह। तथेति॥ मम तावदित्यादिपदेनाहन्ताग्रहणं। तदेव दुःखनिमित्तं मिथ्याज्ञानं। आदिशब्देन रागादिरुक्तः। उक्तेऽर्थे श्रुतिमवतार्य्य व्याचष्टे। तदेतदिति। सुखमेव गच्छतीति सम्बन्धः॥ फलरूपेण वर्त्तमानस्य कथं कर्म्मसम्बन्धः स्यादित्याशङ्क्याह। फलमिति॥ उक्तमेव व्यनक्ति। निरतिशयमिति॥ २०॥

अथेत्यादिवाक्यस्य वक्तव्यशेषाभावादानर्थक्यमाशङ्क्य व्यवहितोपासनानुवादेन तदङ्गव्रतविधानार्थमुत्तरं वाक्यमित्यानर्थक्यं

उ० वाहमिति वाग्दध्रे द्रक्ष्याम्यहमिति चक्षुः श्रोष्या-
म्यहमिति श्रोत्रमेवमन्यानि कर्म्माणि यथा कर्म्म
तानि मृत्युः श्रमो भूत्वोपयेमे तान्याप्नोत्तान्याप्त्वा

भा० वमेव प्रतिपत्तव्यं किंवा विचार्य्यमाणे कश्चिद्विशेषो व्रत-
मुपासनं प्रति प्रतिपत्तुं शक्यत इत्युच्यते। अथातोऽनन्तरं
व्रतस्य उपासनस्य मीमांसा उपासनकर्म्मविचारणेत्यर्थः।
एषां प्राणानां कस्य कर्म्मव्रतत्वेन धारयितव्यमिति
मीमांसा प्रवर्त्तते। तत्र प्रजापतिर्हशब्दः किलार्थे प्रजा-
पतिः किल प्रजाः सृष्ट्वा कर्म्माणि करणानि वागादीनि
कर्म्मार्थानि हितानीति कर्म्माणीत्युच्यन्ते ससृजे सृष्ट-
वान्वागादीनि करणानीत्यर्थः। तानि पुनः सृष्टान्यन्यो
ऽन्येनेतरेतरमस्पर्द्धन्त स्पर्द्धां सङ्घर्षं चक्रुः। कथं वदिष्या-
म्येव स्वव्यापाराद्वदनादनुपरतैवाहं स्यामिति वाग्व्रतं दध्रे
धृतवती। यद्यन्योऽपि मत्समोऽस्ति स्वव्यापारादनुपरन्तुं
शक्तः सोऽपि दर्शयत्वात्मनो वीर्य्यमिति। तथा द्रक्ष्या-

व्या० परिहरति। तत्र इत्यादिना। व्रतमित्यवश्यानुष्ठेयं कर्म्मोच्यते।
जिज्ञासायाः सत्त्वमतः शब्दार्थः॥ उपासनोत्क्रमानन्तर्य्यमथश-
ब्दार्थं कथयति। अनन्तरमिति॥ विचारणामेव स्फोरयति।
एषामिति॥ प्रवृत्ताया मीमांसाया प्राणव्रतमभग्नत्वेन धारणी-
यमिति निर्धारणार्थमाख्यायिकां प्रणयति॥ तत्रेत्यादिना।
कथं वागादिकरणेषु कर्म्मशब्दप्रवृत्तिरित्याशङ्क्याह। कर्म्मार्था-
नीति॥ तदीयस्पर्द्धोपयोगमुपदर्शयितुं भूमिकां करोति।
तानीति॥ स्पर्द्धाप्रकारं प्रश्नपूर्व्वकं प्रकटयति। कथमित्यादिना॥

उ० मृत्युरवारुन्धत्तस्माच्छ्राम्यत्येव वाक् श्राम्यति चक्षुः श्राम्यति श्रोत्रमथेममेव नाप्नोद्योऽयं मध्यमः प्राणस्तानि ज्ञातुं दध्रिरे ।

भा० स्वद्दमिति चचुः । श्रोव्यास्यद्दमिति श्रोत्रसेवमन्यान्यपि कर्म्माणि करणानि यथा कर्म्म यद्यस्य कर्म्म यथा कर्म्म तानि करणानि मृत्युर्मारकः श्रमः श्रमरूपी भूत्वा उपयेमे सञ्जग्राह । कथं तानि करणानि स्वव्यापारे प्रवृत्तान्याश्रोच्छ्रमरूपेणात्मानं दर्शितवानात्मा च तान्यवारुन्धद्वरोधं कृतवान् मृत्युः स्वकर्म्मभ्यः प्रच्यावितवानित्यर्थः । तस्माद्द्यत्वेऽपि वदने स्वकर्म्मणि प्रवृत्ता वाक् श्राम्यत्येव श्रमरूपिणा मृत्युना संयुक्ता स्वकर्म्मतः प्रच्याव्यते । तथा श्राम्यति चचुः । श्राम्यति श्रोत्रं । अथेममेव मुख्यं प्राणं नाप्नोन्न प्राप्तवान्मृत्युः श्रमरूपी । योऽयं मध्यमः प्राणः तं तेनाद्यत्वेऽपि अश्रान्त एव कर्म्मणि प्रवर्त्तते तानीतराणि करणानि तं ज्ञातुं दध्रिरे धृतवन्ति मनः ॥

आ० यथा कर्म्म स्वीयं स्वीयं व्यापारमनुसृत्य व्रतं दध्रिरे त्वगादीनि करणानीत्यर्थः ॥ प्रजापतेर्वागादिषु श्रमद्वारा स्वकर्म्मप्रच्युतिरासीदित्यत्र कार्य्यलिङ्गकमनुमानं प्रमाणयति । तस्मादिति । वागादीनां श्रमव्रतत्वनिर्धारणानन्तर्य्यमथशब्दार्थः ॥ प्रजापतेः प्राणे मृत्युग्रस्तत्वाभावे कार्य्यलिङ्गकमनुमानं सूचयति । तेनेति ॥ प्रवर्त्तते प्राण इति सम्बन्धः । तथापि कथं प्राणस्यैव व्रतं धार्य्यमित्यपेक्षायामाह । तानीति ॥

उ॰ अयं वै नः श्रेष्ठो यः सञ्चरꣳश्चासञ्चरꣳश्च न व्यथते न रिष्यति हन्तास्यैव सर्वे रूपमसामेति त एतस्यैव सर्वे रूपमभवꣳस्तस्मादेत एतेनाख्या-

भा॰ अयं वै नोऽस्माकं मध्ये श्रेष्ठः प्रशस्यतमोऽभ्यधिको यस्माद्यः सञ्चरंश्चासञ्चरंश्च न व्यथतेऽथो न रिष्यति हन्तेदानीं अस्यैव प्राणस्य सर्व्वे वयं रूपमसाम प्राणमात्मत्वेन प्रतिपद्येम हि। एवं विनिश्चित्य त एतस्यैव सर्व्वे रूपमभवन् प्राणरूपमेवात्मत्वेन प्रतिपन्नाः प्राणव्रतमेव दध्रिरेऽस्मद्व्रतानि न मृत्योर्वारणाय पर्य्याप्तानीति। यस्मात्प्राणेन रूपेण रूपवन्तीतराणि चलनात्मना स्वेन च प्रकाशात्मना। न हि प्राणादन्यत्र चलनात्मकत्वोपपत्तिश्चलनव्यापारपूर्व्वकाण्येव हि सर्व्वदा स्वव्यापारेषु लभ्यन्ते। तस्मादेते वागादयः एतेन प्राणाभिधानेनाख्यायन्तेऽभिधीयन्ते प्राणा इति। एवं य एवं प्राणात्मतां सर्व्वकरणानां वेत्ति प्राणशब्दाभिधेयत्वं च तेन ह वाव तेनैव विदुषा

व्या॰ ध्यानार्थमनुसन्धानप्रकारमेव दर्शयति। अयमिति॥ तस्य श्रेष्ठत्वे फलितमाह। हन्तेति॥ इतिशब्दं व्याकरोति। एवं विनिश्चित्येति॥ अस्माकं वागादीनां व्रतानि मृत्योर्वारणाय न पर्य्याप्तानीति विनिश्चित्य दध्रिरे प्राणव्रतमेवेति सम्बन्धः। प्राणरूपत्वमुक्त्वा करणानां तन्नामत्वमाह। यस्मादिति॥ यस्मादित्यस्य तस्मादिति व्यवहितेन सम्बन्धः। प्राणरूपं चलनात्मत्वमिति कुतो निश्चीयते तत्राह। न हीति॥ तर्हि करणेषु प्रकाशात्मकत्वमेव न चलनात्मत्वमित्याशङ्क्याह। चलनेति॥ सम्प्रति विद्याफलमाह। य एवमिति॥ तदेव स्पष्टयति। यस्मिन्निति।

उ० यन्ते प्राणा इति तेन हवाव तत्कुलमाचक्षते यस्मिन्कुले भवति य एवं वेद य उ हैवंविदा स्पर्द्धते ऽनुशुष्य हैवान्ततो म्रियत इत्यध्यात्मं ॥ २१ ॥
अथाधिदैवतं ज्वलिष्याम्येवाहमित्यग्निर्दध्रे

भा० तत्कुलमाख्यातमाचक्षते लौकिकाः। यस्मिन्कुले स विद्वाञ्जातो भवति तत्कुलं विद्वन्नाम्नैव प्रथितं भवति अमुष्येदं कुलमिति। यथा तापत्य इति। य एवं यथोक्तं वेद वागादीनां प्राणस्वरूपतां प्राणाख्यत्वं च तस्यैतत्फलं। किञ्च यः कश्चित् उ ह एवंविदा प्राणात्मदर्शिना स्पर्द्धते तत्प्रतिपक्षी सन् सोऽस्मिन्नेव शरीरेऽनुशुष्यति शोषमुपगच्छति अनुशुष्य हैव शोषं गत्वैवान्ततोऽन्ते म्रियते न सहसोपद्रुतो म्रियते इत्येवमुक्तमध्यात्मं प्राणात्मदर्शनमित्युक्तोपसंहारोऽधिदैवतप्रदर्शनार्थः॥ २१॥

अथानन्तरमधिदैवतं देवताविषयं दर्शनमुच्यते। कस्य देवताविशेषस्य व्रतधारणं श्रेय इति मीमांस्यते अध्यात्मवत्सर्व्वे ज्वलिष्याम्येवाहमित्यग्निर्दध्रे। तप्स्याम्यहमित्या-

---

व्या० तपती सूर्य्यसुता तस्या वंशस्तापत्यः। कस्येदं फलमित्युक्तं पूर्व्वोक्तमेव स्फुटयति। य एवमित्यादिना॥ न केवलं विद्याया यथोक्तमेव फलं किन्तु फलान्तरमप्यस्तीत्याह। किञ्चेति। प्राणविदा सह स्पर्द्धा न कर्त्तव्येति भावः॥ इत्यध्यात्ममित्यस्यानर्थक्यमाशङ्क्याह। इत्येवमिति॥ २१॥

अध्यात्मदर्शनमुक्त्वाऽधिदैवतदर्शनं वक्तुमनन्तरवाक्यमवतारयति। अथेति॥ तर्हि ज्वलिष्यामीत्यादि किमर्थमित्याशङ्क्याह।

उ॰ तप्स्याम्यहमित्यादित्यो भास्याम्यहमिति चन्द्रमा एवमन्या देवता यथादेवतꣳ स यथैषां प्राणानां मध्यमः प्राण एवमेतासां देवतानां वायुर्म्लोचन्ति ह्यन्या देवता न वायुःसैषा नस्तमिताऽ देवता यद्वायुः ॥ २२ ॥

भा॰ दित्यः। भास्याम्यहमिति चन्द्रमाः। एवमन्या देवताः। यथा दैवतं स दृष्टान्तोऽध्यात्मं वागादीनामेषां प्राणानां मध्ये मध्यमः प्राणो मृत्युना नाप्तः स्वकर्मणो न प्रच्यावितः स्वेन प्राणव्रतेनाभग्नव्रतो यथा एवमेतासामग्न्यादीनां देवतानां वायुरपि म्लोचन्त्यस्तं यन्ति स्वकर्मभ्य उपरमन्ते यथाध्यात्मं वागादयोऽन्या देवता अग्न्याद्या न वायुरस्तं याति यथा मध्यमः प्राणोऽतः सैषाऽनस्तमिता देवता यद्वायुर्योऽयं वायुरेवमध्यात्ममधिदैवं च मीमांसित्वा निर्द्धारितं वाय्वात्मनो व्रतमभग्नमिति ॥ २२ ॥

व्या॰ कस्येति ॥ वदिष्यामीत्यादावुक्तं व्याख्यानमिहापि द्रष्टव्यमित्याह। अध्यात्मवदिति। यथादैवतं स्वं स्वं देवताव्यापारमनतिक्रम्यान्या देवता विद्युदाद्या दधिरे व्रतमित्यर्थः॥ स यथेत्यादि व्याचष्टे। अध्यात्ममिति। वायुरपि मृत्युना नाप्तः स्वकर्मणो न प्रच्यावित इति। स्वेन वायुव्रतेनाभग्नव्रत इति शेषः। तदेव साधयति। म्लोचन्तीति॥ आह्मणोक्तमर्थमुपसंहरति। एवमिति ॥ २२ ॥

उ० अथैष श्लोको भवति यतश्चोदेति सूर्य्योऽस्तं यत्र च गच्छतीति प्राणाद्वा एष उदेति प्राणेऽस्तमेति तन्देवाश्चक्रिरे धर्म्मं स एवाद्य स उ श्व इति यद्वा एतेऽमुर्ह्यध्रियन्त तदेवाप्यद्य कुर्व्वन्ति ।

भा० अथैतस्यैवार्थस्य प्रकाशक एष श्लोको मन्त्रो भवति । यतश्च यस्माद्वायोरुदेत्युद्गच्छति सूर्य्योऽध्यात्मं च चक्षुरात्मना प्राणादस्तञ्च यत्र वायौ प्राणे च गच्छत्यपरसन्ध्यासमये स्वापसमये च पुरुषस्य तं देवास्तं धर्म्मं देवाश्चक्रिरे धृतवन्तो वागादयोऽग्न्यादयश्च प्राणव्रतं वायुव्रतं च पुरा विचार्य्य स एवाद्येदानीं श्वोऽपि भविष्यत्यपि कालेऽनुवर्त्त्यतेऽनुवर्त्तिष्यते च देवैरित्यभिप्रायः । तत्रेमं मन्त्रं सङ्क्षेपतो व्याचष्टे ब्राह्मणं । प्राणाद्वा एष सूर्य्य उदेति प्राणेऽस्तमेति तं देवाश्चक्रिरे धर्म्मं स एवाद्य । स उ श्व इत्यस्य कोऽर्थ इत्युच्यते । यद्वै एते व्रतममुर्ह्यि अमुष्मिन्काले वागादयोऽग्न्यादयश्च प्राणव्रतं वायुव्रतं चाध्रियन्त

आ० ब्राह्मणार्थदार्ढ्यार्थं मन्त्रमवतार्य्य व्याकरोति । अथेत्यादिना । सूर्य्योऽधिदैवमुदयकाले वायोरुद्गच्छति तत्र वायरसन्ध्यासमयेऽस्तं । गच्छति । स एवाध्यात्मं प्रबोधसमये चक्षुरात्मना प्राणादुदेति पुरुषस्य स्वापसमयेच तस्मिन्नेवास्तं गच्छतीति यतश्चेत्यादौ विभागः॥ श्लोकस्योत्तरार्द्धं प्राणादित्यादि ब्राह्मणव्यवहितं श्लोकपूर्णताज्ञापनार्थं प्रथमं व्याचष्टे । ते देवा इति ॥ धारणस्य प्रकृतत्वात्सामान्येन च विशेषं लक्षयित्वाह । धृतवन्त इति ॥ स एवेति धर्म्मपरामर्शः । तत्रेति सप्तमी सम्पूर्णमन्त्रमधिकरोति । इमं

उ॰ तस्मादेकमेव व्रतं चरेत्प्राण्याच्चैवापान्याच्च नेन्मा पाप्मा मृत्युराप्नुवदिति यद्यु चरेत्समा-

---

भा॰ तदेवाद्यापि कुर्व्वन्त्यनुवर्त्तन्तेऽनुवर्त्तिष्यन्ते व्रतं तयोरभग्नमेव। यत्तु वागादिव्रतं च तद्भग्नमेव। तेषामस्तमनकाले च वायौ प्राणे च निर्म्लुक्तिदर्शनात्॥

अथैतदन्यत्रोक्तं। यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येति प्राणं मनः प्राणं चक्षुः प्राणं श्रोत्रं यदा प्रबुध्यते प्राणादेवाधि पुनर्जायन्त इत्यध्यात्मं। अथाधिदैवतं। यदा वा अग्निरनुगच्छति वायुं तर्ह्यनूद्वाति। तस्मादेनमुदवासीदित्याहुर्वायुं ह्यनूद्वाति यदादित्योऽस्तमेति वायुं तर्हि प्रविशति वायुं चन्द्रमा वायौ दिशः प्रतिष्ठिताः वायोरेवाधि पुनर्जायन्त इति। यस्मादेव व्रतं वागादिष्वग्न्यादिषु चानुगतं यदेतद्वायोश्च प्राणस्य च परिस्पन्दात्मकत्वं सर्व्वैर्देवैरनुवर्त्यमानं व्रतं। तस्मादन्योऽप्येकमेव व्रतं

व्या॰ मन्त्रमिति। पूर्व्वार्द्धोक्तिः॥ उत्तरार्द्धस्य ब्राह्मणमाकाङ्क्षापूर्व्वकमुत्थाप्य व्याचष्टे। तमित्यादिना॥ तैरभग्नं देवैरभग्नत्वेन मीमांसितं तेऽनुगच्छन्तीत्यर्थः॥ विशेषणस्यार्थवत्त्वं साधयति। यत्त्विति॥ उक्तहेतुमभिरहस्यमाश्रित्य विशदयति। अथेति॥

यथाग्नेत्युपमार्थोऽथशब्दार्थः। अनुगच्छति शाम्यतीत्येतत्। वायुमनु तदधीन एव तस्मिन्काल उद्वात्यस्तमेति उदवासीदस्तं गत इत्यर्थः। इतिशब्दोऽभिरहस्यविषयवाक्यसमाप्त्यर्थः। अध्यात्मप्राणव्रतमधिदैवतस्य वायुव्रतमित्येकमेव व्रतं धार्य्यमिति मन्त्रब्राह्मणाभ्यां प्रतिपाद्य तस्मादिति व्याचष्टे। यस्मादिति॥ न हि वागादयोऽग्न्यादयो वा परिस्पन्दविरहिणः स्थातुमर्हन्ति। तेन प्राणा-

उ॰ पिपयिषेत्तेनो एतस्यै देवतायै सायुज्यꣳ सलो-
कतां जयति ॥२३॥ पञ्चमं ब्राह्मणं ॥

भा॰ चरेत्। किन्तत्प्राणात्प्राणनव्यापारं कुर्य्यादपान्यादपानन-
व्यापारञ्च। न हि प्राणव्यापारस्य प्राणनापाननलक्षणस्य
उपरमोऽस्ति। तस्मात्तदेवैकं व्रतं चरेद्धित्वेन्द्रियान्तरव्या-
पारं नेन्मा मां पाप्मा मृत्युः श्रमरूपी आप्नुवन्नाप्नुयात्।
नेच्छब्दः परिभये। यद्यहमस्माद्व्रतात्प्रच्युतः स्यां ग्रस्त
एवाहं मृत्युनेत्येवं त्रस्तो धारयेत्प्राणव्रतमित्यभिप्रायः।
यदि कदाचिदु चरेत्प्रारभेत प्राणव्रतं समापिपयिषेत्समा-
पयितुमिच्छेद्यदि ह्यस्माद्व्रतादुपरमेत्प्राणः परिभूतः
स्याद्देवास्य। तस्मात्समापयेदेव। तेन उ तेनानेन व्रतेन प्राणा-
त्मप्रतिपत्त्या सर्व्वभूतेषु वागादयोऽग्न्यादयश्च मदात्मका
एवायं प्राण आत्मा सर्व्वपरिस्पन्दकृदेवं तेनानेन व्रत-
धारणेनैवास्या एव प्राणदेवतायाः सायुज्यं सयुग्भावमेका-

आ॰ दिव्रतं तैरनुवर्त्त्यत एवेत्यर्थः। एक एकमेवेति नियमे प्राणव्यापार-
स्याभग्नत्वं हेतुमाह। न हीति॥ तदनुपरमे फलितमाह। तस्मा-
दिति॥ ननु प्राणनाद्यभावे जीवनासम्भवात्तस्यार्थिकत्वात्तदनुष्ठा-
नमविधेयमित्याशङ्क्यैवकारलभ्यं नियमं दर्शयति। हित्वेति॥
नेदित्यादि वाक्यस्याक्षरार्थमुक्त्वा तात्पर्य्यार्थमाह। यद्यहमिति॥
प्राणव्रतस्य सकृदनुष्ठानमाशङ्क्य सर्व्वेन्द्रियव्यापारनिवृत्तिरूपं
सन्न्यासमामरणमनुवर्त्तयेदित्याह। यदीति॥ विपक्षे दोषमाह।
यदि हीति॥ प्राणादिपरिभवपरिहारार्थं नियमं निगमयति।
तस्मादिति॥ विद्याफलं वक्तुं भूमिकां करोति। तेनेति॥ व्रतमेव
विशिनष्टि। प्राणेति॥ प्रतिपत्तिमेव प्रकटयति। सर्व्वभूतेष्विति॥

उ॰ त्रयं वा इदं नामरूपं कर्म्म तेषां नाम्नां वागित्ये-

भा॰ त्मलं सलोकतां समानलोकतां वैकस्थानत्वं विज्ञानमात्रापेक्ष्यमेतज्जयति प्राप्नोतीति ॥ २३ ॥ इति श्रीमद्बृहदारण्यके शाङ्करीयभाष्ये तृतीयप्रपाठके पञ्चमं ब्राह्मणं ॥

यदेतदविद्याविषयत्वेन प्रस्तुतं साध्यसाधनलक्षणं व्याकृतं जगत्प्राणात्मप्राप्त्यन्तोत्कर्षवदपि फलं। या चैतस्य व्याकरणात्प्रागवस्थाव्याकृतशब्दवाच्या वृक्षबीजवत्सर्व्वमेतत्त्रयं। किं तत्त्रयं इत्युच्यते। नामरूपं कर्म्म चेत्यनात्मैव नात्मा यत्साक्षादपरोक्षाद्ब्रह्म। तस्मादस्माद्विरज्येतेत्येवमर्थस्त्रयं वा इत्याद्यारम्भः। न ह्यस्मादनात्मनोऽव्यावृत्तचित्तस्यात्मानमेव लोकमहं ब्रह्मास्मीत्युपासितुं बुद्धिः प्रवर्त्तते बाह्यप्रत्यगात्मप्रवृत्त्योर्विरोधात्। तथा काठके। पराञ्चि खानि व्यतृणत्स्वयम्भूस्तस्मात्पराङ् पश्यति नान्तरात्मन्।

व्या॰ सम्प्रति विद्याफलं कथयति। एवमिति ॥ कथमेकस्मिन्नेव विज्ञाने फलविकल्पः स्यादित्याशङ्क्य विज्ञानप्रकर्षापेक्षं सायुज्यं तन्निकर्षापेक्षञ्च सालोक्यमित्याह। विज्ञानेति ॥ २३ ॥ तृतीयाध्यायस्य पञ्चमं ब्राह्मणं ॥

प्रपञ्चितस्याविद्याकार्य्यस्य सङ्क्षेपेणोपसंहारार्थं ब्राह्मणान्तरमवतारयति। यदेतदिति ॥ फलमपि ज्ञानकर्म्मणोरुक्तविशेषणवद्यदेतत्प्रस्तुतमिति सम्बन्धः। अव्याकृतप्रक्रियायामुक्तं स्मारयति। या चेति ॥ व्याकृताव्याकृतस्य जगतः सङ्गृहीतं रूपमाह। सर्व्वमिति। वाङ्मनःप्राणाख्यं त्रयमिति शङ्कां प्रत्याह। किन्तदित्यादिना ॥ किमर्थः पुनरयमुपसंहार इत्याशङ्क्याह। अनात्मैवेति ॥ आत्मशब्दार्थमाह। यत्साक्षादिति ॥ आत्मत्वेन

उ॰ तदेषामुक्थमतो हि सर्वाणि नामान्युत्तिष्ठन्ति ।

भा॰ कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्नित्यादि । कथं पुनरस्य व्याकृताव्याकृतस्य क्रियाकारणफलात्मनः संसारस्य नामरूपकर्मात्मतैव । न पुनरात्मत्वमित्येतत्सम्भावयितुं शक्यत इत्यत्रोच्यते। तेषां नाम्नां यथोपन्यस्तानां वागिति शब्दसामान्यमुच्यते । यः कश्च शब्दो वागेव सेत्युक्तत्वाद्वागित्येतस्य शब्दस्य योऽर्थः शब्दसामान्यमात्रमेतदेषां नामविशेषाणामुक्थकारणमुपादानं सैन्धवलवणकणानामिव सैन्धवाचलस्तदाह्यतो ह्यस्मान्नामसामान्यात् सर्वाणि नामानि यज्ञदत्तो देवदत्त इत्येवमादिप्रविभागान्युत्तिष्ठन्ति उत्पद्यन्ते प्रविभज्यन्ते

व्या॰ जगतो हेयत्वं तच्छब्देन परामृश्यते । वैराग्यमपि किमर्थमित्याशङ्क्याह । न हीति ॥ अविरक्तोऽपि कुतूहलितया तत्राधिकारी स्यादित्याशङ्क्याह । वाह्येति ॥ अनात्मप्रमाणमप्यात्मानं प्रत्याययिष्यत्यात्मनः सर्व्वात्मत्वात्कुतो विरोध इत्याशङ्क्याह । तथेति ॥ कथं तर्हि प्रत्यगात्मधीस्तत्राह । कश्चिदिति ॥ उपसंहारस्यैत्यफलत्वेऽपि सर्व्वस्य जगतो नामादिमात्रत्वे प्रमाणाभावादयुक्तमिति शङ्कते । कथमिति ॥ अनुमानैः सम्भावनां दर्शयति । अत्रेति ॥ तत्र तत्कार्य्यत्वहेतुकमनुमानमाह । तेषामिति । वागित्येतदुक्थमिति सम्बन्धः ॥ इन्द्रियव्यावृत्त्यर्थं वाक्पदार्थमाह । शब्देति ॥ सङ्गृहीतमर्थं विवृणोति । यः कश्चेत्यादिना ॥ उक्तमुपपादयितुमुत्तरं वाक्यमित्याह । तदाहेति ॥ कार्य्यकारणभावे किमायातमत आह । कार्य्यञ्चेति ॥ सर्व्वे नामविशेषास्तन्मात्रास्ततो न भिद्यन्ते। तत्कार्य्यत्वाद्यत्कार्य्यं तत्ततो न भिद्यते । यथा मृदो घट इत्यर्थः । सर्व्वे नामविशेषास्तत्मा-

उ॰ एतदेषाꣳ सामैतद्धि सर्वैर्नामभिः सममेतदेषां ब्रह्मैतद्धि सर्वाणि नामानि बिभर्ति ॥ १ ॥

भा॰ लवणाचलादिव लवणकणाः कार्यञ्च कारणेनाव्यतिरिक्तं। तथा विशेषाणाञ्च सामान्येऽन्तर्भावात्कथं सामान्यविशेषभाव इति। एतच्छब्दंसामान्यमेषां नामविशेषाणां साम समत्वात्साम सामान्यमित्यर्थः। एतद्धि यस्मात्सर्वैर्नामभिरात्मविशेषैः समं। किञ्च आत्मलाभाविशेषाच्च नामविशेषाणां। यस्य च यस्मादात्मलाभो भवति स तेनाविभक्तो दृष्टो यथा घटादीनां मृदा कथं नामविशेषाणां आत्मलाभो वाच्य इत्युच्यते। यत एतदेषां वाक्छब्दवाच्यं वस्तु ब्रह्मात्मा ततो ह्यात्मलाभो नाम्नां। शब्दव्यतिरिक्तस्वरूपानुपपत्तेस्तत्प्रतिपादयत्येतच्छब्दसामान्यं हि यस्माच्छब्दविशेषान् सर्वाणि नामानि बिभर्त्ति धारयति स्वरूपप्रदानेन। एवं

आ॰ मान्ये कल्पिताः प्रत्येकं तदनुविद्धत्वादन्विदमंशानुविद्धसर्पादिवदित्यनुमानान्तरमाह। तथेति॥ कार्य्याणां कारणेऽन्तर्भाववदिति यावत्॥ उक्तमेव प्रश्नपूर्व्वकं प्रपञ्चयति। कथमित्यादिना॥ सामत्वं साधयति। एतद्धीति। इतश्च नामविशेषा नामसामान्येऽन्तर्भवन्तीत्याह। किञ्चेति। नामविशेषाणां नाममात्रादात्मलाभात्तस्मादविशेषात्तत्रैवान्तर्भाव इत्यर्थः। सर्व्वे नामविशेषास्तत्सामान्यान्न पृथक् वस्तुतः सन्ति। तेनात्मवत्त्वाद्येष्वात्मवन्तस्ते ततोऽन्ये वस्तुतो न सन्ति। यथा मृदात्मवन्तो घटादयो वस्तुतस्ततोऽन्ये न सन्तीत्युक्तेऽनुमाने व्याप्तिं साधयति। यस्य चेति॥ हेतुसमर्थमुत्तरवाक्यमुत्थापयति। कथमित्यादिना॥ यतः

उ० अथ रूपाणां चक्षुरित्येतदेषामुक्थमतो हि सर्वाणि रूपाण्युत्तिष्ठन्त्येतदेषाᳬं सामैतद्धि सर्वै रूपैः सममेतदेषां ब्रह्मैतद्धि सर्वाणि रूपाणि बिभर्त्ति ॥ २ ॥

भा० कार्य्यकारणत्वोपपत्तेः सामान्यविशेषोपपत्तेरात्मप्रदानोपपत्तेश्च नामविशेषाणां शब्दमात्रता सिद्धा । एवमुत्तरयोरपि सर्व्वं योज्यं यथोक्तं ॥ १ ॥

अथेदानीं रूपाणां सितासितप्रभृतीनां चक्षुरिति चक्षुर्विषयसामान्यं चक्षुःशब्दाभिधेयं रूपसामान्यमात्रं प्रकाश्यमात्रमभिधीयते । अतो हि सर्व्वाणि रूपाण्युत्तिष्ठन्त्येतदेषां सामैतद्धि सर्व्वैरूपैः सममेतदेषां ब्रह्मैतद्धि सर्व्वाणि रूपाणि बिभर्त्ति ॥ २ ॥

व्या० शब्दमात्रात्तद्विशेषाणामात्मलाभो भवतीति शेषः । तत्रैव युक्तिमाह । ततो हीति ॥ तत्रैव वाक्यमवतार्य्य व्याचष्टे । तदित्यादिना ॥ तस्मात्तन्मात्रात्तद्विशेषाणामात्मलाभ इति वाक्यशेषः ॥ प्रथमकण्डिकायां सिद्धमर्थमुपसंहरति । एवमिति ॥ उपपत्तित्रयमुत्तरवाक्यद्वयेऽपि तुल्यमित्यादिशति । एवमुत्तरयोरिति ॥ १ ॥

तत्र व्याख्यानसापेक्षाणि पदानि व्याकरोति । अथेत्यादिना ॥ नामव्याख्यानानन्तर्य्यमथशब्दार्थः । चक्षुरुक्थमिति सम्बन्धः । चक्षुरिति चक्षुःशब्दाभिधेयं चक्षुर्विषयसामान्यमभिधीयते तच्चक्षुरूपसामान्यं तदपि प्रकाश्यमात्रमिति योजना ॥ २ ॥

उ॰ अथ कर्म्मणामात्मेत्येतदेषामुक्थमतो हि सर्व्वाणि कर्म्माण्युत्तिष्ठन्त्येतदेषाꣳ सामैतद्धि सर्व्वैः कर्म्मभिः सममेतदेषां ब्रह्मैतद्धि सर्व्वाणि कर्म्माणि

भा॰ अथेदानीं सर्व्वकर्म्मविशेषाणां मननदर्शनात्मकानां चलनात्मकानां च क्रियासामान्यमात्रेऽन्तर्भाव उच्यते। कथं सर्व्वेषां कर्म्मविशेषाणामात्मा शरीरं सामान्यमात्मात्मनः कर्म्मात्मेत्युच्यते। आत्मना हि शरीरेण कर्म्म करोतीत्युक्तं। शरीरे च सर्व्वं कर्म्माभिव्यज्यते। अतस्तात्स्थ्यात्तच्छब्दं कर्म्म कर्म्मसामान्यमात्रं सर्व्वेषामेषामुक्थमित्यादि, पूर्व्ववत्तदेतद्यथोक्तं नामरूपं कर्म्मत्रयं इतरेतराश्रयमितरेतराभिव्यक्तिकारणमितरेतरप्रलयं संहतं त्रिदण्डविष्टम्भवत्सदेकं। केनात्मनैकत्वमित्युच्यते अयमा-

---

आ॰ रूपप्रकरणानन्तर्य्यमथेत्युच्यते॥ क्रियाविशेषाणां क्रियामात्रेऽन्तर्भावं प्रश्नद्वारा स्फोरयति। कथमित्यादिना। आत्मशब्देनात्र शरीरनिर्व्वर्त्त्यकर्म्मग्रहणे पुरुषविधब्राह्मणशेषमनुकूलयति। आत्मना हीति॥ तत्रैवोपपत्तिमाह। शरीरे चेति। तथापि कथमात्मशब्दः शरीरनिर्व्वर्त्त्यं कर्म्म ब्रूयादित्याशङ्क्य लक्षणयेत्याह। अत इति। सङ्क्षेपस्यापि सङ्क्षेपान्तरमाह। तदेतदिति॥ तदेतत्त्रयं त्रिदण्डविष्टम्भवत्संहतं सदेकमिति सम्बन्धः॥ कथं संहतत्वमत आह। इतरेतराश्रयमिति॥ रूपं विषयमाश्रित्य नामकर्म्मणी सिध्यतः स्वातन्त्र्येण निर्विषययोस्तयोः सिद्ध्यदर्शनान्नामकर्म्मणी चाश्रित्य रूपं सिद्ध्यति। न हि ते हित्वा किञ्चिदुत्पद्यत इत्यर्थः। वाचकेन वाच्यस्य तेनेतरस्य ताभ्याञ्च क्रियायास्तया तयोरपेक्षादर्शनादन्योऽन्यमभिव्यञ्जकत्वमाह। इतरेतरेति॥

उ० बिभर्त्ति तदेतत्त्रयं सदेकमयमात्मात्मो एकः सन्ने-
तत्त्रयं तदेतदमृतꣳ सत्येन छन्नं प्राणो वा अमृतं

भा० त्मायं पिण्डः कार्य्यकारणात्मसङ्घातस्तथान्नत्रये व्याख्यात एतन्मयो वा अयमात्मेत्यादिना एतावद्धीदं सर्व्वं व्याकृतमव्याकृतं च। यदुत नामरूपं कर्म्मेत्यात्मा उ एकोऽयं कार्य्यकरणसङ्घातः सन्नध्यात्माधिभूताधिदैवभावेन व्यवस्थितमेतदेव त्रयन्नामरूपं कर्म्मेति। तदेतद्वक्ष्यमाणममृतं सत्येन छन्नमित्येतस्य वाक्यस्यार्थमाह। प्राणो वाऽमृतं करणात्मकोऽन्तरुपष्टम्भनकर्म्मा आत्मभूतोऽमृतोऽविनाशी। नामरूपे सत्यं कार्य्यात्मके शरीरावस्थे

आ० सति नाम्नि रूपसंहारदर्शनाद्रूपे च सति नामसंहारदृष्टेः सतोश्च तयोः कर्म्मणस्तस्मिंश्च सति, तयोरूपसंहारोपलम्भादितरेतरप्रलयमित्याह। इतरेतरप्रलयमिति॥ त्रयाणामेकत्वं विरुद्धमिति शङ्कित्वा परिहरति। केनेत्यादिना॥ कथं कार्य्यकरणसङ्घातात्मना त्रयाणामेकत्वं तत्राह। तथेति॥ नामरूपकर्म्मणां कार्य्यकरणसङ्घातमात्रत्वेऽपि ततो व्यतिरिक्तं सङ्घातादन्यत्स्यादित्याशङ्क्याह। एतावदिति॥ नामादित्रयस्य सङ्घातमात्रत्वे कथं व्यवहारासाङ्कर्य्यमित्याशङ्क्याह। आत्मेति। सङ्घातोऽयमात्मशब्दितः स्वयमेकोऽपि सन्नध्यात्मादिभेदेन स्थितं त्रयमेव भवतीति व्यवहारसाङ्कर्य्यमित्यर्थः॥ एकस्मिन्नपि सङ्घाते कार्य्यकरणरूपेणावान्तरविभागमाह। तदेतदिति॥ आत्मभूतस्तस्योपाधित्वेन स्थित इति यावत्। अविनाशी स्थूलदेहे गच्छत्यपि यावन्मोक्षं न गच्छतीत्यर्थः। सच्च त्यच्च सत्यं भूतपञ्चकं तदात्मे नामरूपे इत्याह। नामेति॥ करणयाथात्म्यं कथयति। क्रियात्मकस्त्विति॥ पञ्चीकृतपञ्चमहाभूतात्मकं तत्कार्य्यं सर्व्वं सच्च त्यच्चेति व्युत्पत्तेः

ॐ नामरूपे सत्यं ताभ्यामयं प्राणश्छन्नः ॥ ३ ॥ इति बृहदारण्यके तृतीयोऽध्यायः ॥

भा० क्रियात्मकस्तु प्राणस्तयोरुपष्टम्भको वाह्याभ्यां शरीरात्मकाभ्यामुपजनापायधर्म्मिभ्यां मर्त्याभ्यां छन्नोऽप्रकाशीकृतः। एतदेव संसारमत्त्वमविद्याविषयं प्रदर्शितं। अत ऊर्द्धं विद्याविषय आत्माधिगन्तव्य इति चतुर्थ आरभ्यते ॥ ३ ॥ इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्य्यस्य श्रीशङ्करभगवतः कृतौ बृहदारण्यकभाष्ये तृतीयोऽध्यायः समाप्तः ॥

व्या० सत्यं वैराजं शरीरं कार्य्यमपञ्चीकृतपञ्चमहाभूतकार्य्यात्मककरणरूपसप्तदशकलिङ्गस्य सूत्राख्यस्यायतनं तस्यैवाच्छादकं तत्स्वरूपात्मापि स्थूलदेहच्छन्नत्वाद्दुर्विज्ञातं तेनापि छन्नं प्रत्यग्वस्तु सुतरामिति तज्ज्ञानेऽवहितैर्भाव्यमिति भावः ॥ इदानीमविद्याकार्य्यप्रपञ्चमुपसंहरति। एतदिति ॥ अविद्याविषयविवरणस्य वक्ष्यमाणोपयोगमुपसंहरति। अत इति ॥ प्रपञ्चितं सत्यविद्याविषये ततो विरक्तस्यात्मानं विविदुषस्तज्ज्ञापनार्थं चतुर्थप्रमुखः सन्दर्भो भविष्यति। तस्मादविद्याया विषयविवरणमुपयोगीति भावः ॥ ३ ॥ षष्ठं ब्राह्मणं ॥ इति श्रीपरमहंसपरिव्राजकाचार्य्यश्रीमच्छुद्धानन्दपूज्यपादशिष्येण श्रीमद्भगवदानन्दज्ञानेन कृतायां बृहदारण्यकभाष्यटीकायां षष्ठं ब्राह्मणं ॥ तृतीयोऽध्यायः समाप्तः ॥

ॐ तत् सत् ॥

भा० श्रीगणेशाय नमः ॥ आत्मेत्येवोपासीत तदन्वेषणे च सर्व्वमन्विष्टं स्यात्तदेव चात्मतत्त्वं सर्व्वस्मात्प्रेयस्मादन्वेष्टव्यं। आत्मानमेवावेदहं ब्रह्मास्मीत्यात्मतत्त्वमेकं विद्याविषयं। यस्तु भेददृष्टिविषयः सोऽन्योऽसावन्योऽहमस्मीति न स वेदेत्यविद्याविषयः एकधैवानुद्रष्टव्यं मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीत्येवमादिभिः प्रविभक्तौ विद्याविद्याविषयौ सर्व्वोपनिषत्सु। तत्र च योऽविद्याविषयः स सर्व्व एव साध्यसाधनादिभेदविशेषविनियोगेन व्याख्यात आतृतीयाध्यायपरिसमाप्तेः। स च व्याख्यातो

आ० तृतीयाध्याये सूचितविद्याविद्ययोरविद्या प्रपञ्चिता सम्प्रति विद्यां प्रपञ्चयितुं चतुर्थमध्यायमारभमाणो वृत्तं सङ्कीर्त्तयति। आत्मेति ॥ किमित्यर्थान्तरेषु सत्स्वात्मतत्त्वमेवानुसन्धातव्यं तत्राह। तदन्वषणे चेति ॥ तस्यैवान्वेष्टव्यत्वे परप्रेमास्पदत्वेन परमानन्दत्वं हेत्वन्तरमाह। तदेवेति ॥ आत्मतत्त्वज्ञानस्य सर्व्वाप्तिफलत्वाच्च तदेवान्वेष्टव्यमित्याह। आत्मानमिति॥ उक्तया परिपाट्या प्रसिद्धमर्थं सङ्गृह्णाति। आत्मतत्त्वमिति ॥ उक्तमर्थान्तरमनुवदति। यस्त्विति ॥ सोऽविद्याविषय इति सम्बन्धः। कथं भेददृष्टिविषयस्याविद्याविषयत्वं तत्राह। अन्योऽसाविति। यो भेददृष्टिपरः सन् वेदेत्यविद्या तद्दृष्टिमूलं सूचिता तेन तद्विषयो भेददृष्टिविषय इत्यर्थः। कथं यथोक्तौ विद्याविद्याविषयावसङ्कीर्णाववमन्तुं शक्येते तत्राह। एकधेति ॥ समाप्तब्राह्मणे वृत्तमर्थं कथयति। तत्र चेति। विद्याविद्याविषययोरिति यावत्। आदिपदं साध्यसाधनावान्तरभेदसङ्ग्रहार्थं यथोक्तो भेद एव विशेषः। तस्मिन्विनियोगो व्यवस्थापनं तेनेत्यर्थः। उपसंहारब्राह्मणान्ते वृत्तमनुभाषते। स चेति ॥ अथ योक्तौ विद्याविद्याविषयौ कथमसङ्कीर्णौ मन्तव्यावित्याशङ्क्याह। एकधेति ॥ तत्रोत्तरग्रन्थस्य विषयपरिशेषार्थं पुरुषविधब्राह्मणशेषमारभ्योक्तं दर्शयति।

भा॰ ऽविद्याविषयः । सर्व्व एव द्विप्रकारोऽन्तःप्राण उपष्टम्भको गृहस्येव स्तम्भादिलक्षणः प्रकाशकोऽमृतो बाह्यश्च कार्य्यलक्षणोऽप्रकाशक उपजनापायधर्म्मकस्तृणकुशमृत्तिकासमो गृहस्येव सत्यशब्दवाच्यो मर्त्त्यस्तेनामृतशब्दवाच्यः प्राणश्छन्न इति चोपसंहृतः । स एव च प्राणो बाह्याधारभेदेष्वनेकधा विस्तृतः । प्राण एको देव इत्युच्यते । तस्यैव बाह्यः पिण्ड एकः साधारणो विराड्वैश्वानर आत्मा पुरुषविधः प्रजापतिः । को हिरण्यगर्भ

व्या॰ तत्र चेति । तर्हि समाप्तत्वादविद्याविषयस्य कथमविदुषो गार्ग्यस्य प्रवृत्तिरित्याशङ्क्य तदर्थमवान्तरविभागमनुवदति । स चेति ॥ तावेव प्रकारौ दर्शयन्नादौ सूक्ष्मशरीरमुपन्यस्यति । अन्तरिति ॥ तस्य बाह्यकरणद्वारा स्थूलेषु विषयेषु प्रकाशकत्वममृतत्वं च व्युत्पादितं द्वितीयं प्रकारमाचक्षाणः स्थूलं दर्शयति । बाह्यश्चेति ॥ तस्य कयापि विधया सूक्ष्मदेहं सत्यप्रकाशकत्वादप्रकाशकत्वं चागमापायित्वेनावच्छेद्यत्वं सूचयति । उपजनेति ॥ यथा गृहस्य तृणादि बहिरङ्गं तथा सूक्ष्मस्य देहस्य स्थूलो देहस्तथापि तृणादिना विना गृहस्य व्यवहारायोग्यत्ववत्तस्यापि स्थूलदेहं विना न तद्योग्यत्वमिति मत्वाह । तृणेति ॥ तस्य पूर्व्वप्रकरणान्ते नामरूपे सत्यमित्यत्र प्रस्तुतत्वमस्तीत्याह । सत्येति ॥ सर्व्वथा बाधवैधुर्य्यंसत्यत्वमिति शङ्कां निरसितुं विशिनष्टि । मर्त्त्य इति ॥ तस्य कार्य्यं दर्शयति । तेनेति ॥ वृत्तमनूद्याजातशत्रुब्राह्मणमवतारयति । स एवेति । आदित्यचन्द्रादयो बाह्याधारभेदा अनेकधात्वमतिष्ठा मूर्द्धेत्यादिवक्ष्यमाणगुणवशादृष्टव्यं । कथं तर्हि तस्यैकत्वं तत्राह । प्राण इति ॥ प्राणस्य नानात्वमेकत्वञ्चोक्तं तत्रैकत्वं विवृणोति । तस्यैवेति ॥ प्राणस्यैव स्वभावभूतोऽनात्मलक्षणः पिण्डः समष्टिरूपो हिरण्यगर्भादिशब्दैरुपाधिविषयैस्तत्र तत्र श्रुतिस्मृत्योरुच्यते । स चाग्निर्मूर्द्धा चक्षुषी

भा० श्रीगणेशाय नमः ॥ आत्मेत्येवोपासीत तदन्वेषणे च सर्व्वमन्विष्टं स्यात्तदेव चात्मतत्त्वं सर्व्वस्मात्प्रेयस्मादन्वेष्टव्यं। आत्मानमेवावेदहं ब्रह्मास्मीत्यात्मतत्त्वमेकं विद्याविषयं। यस्तु भेददृष्टिविषयः सोऽन्योऽसावन्योऽहमस्मीति न स वेदेत्यविद्याविषयः एकधैवानुद्रष्टव्यं मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीत्येवमादिभिः प्रविभक्तौ विद्याविद्याविषयौ सर्व्वोपनिषत्सु। तत्र च योऽविद्याविषयः स सर्व्व एव साध्यसाधनादिभेदविशेषविनियोगेन व्याख्यात आतृतीयाध्यायपरिसमाप्तेः। स च व्याख्यातो

आ० तृतीयाध्याये सूचितविद्याविद्ययोरविद्या प्रपञ्चिता सम्प्रति विद्यां प्रपञ्चयितुं चतुर्थमध्यायमारभमाणो वृत्तं सङ्कीर्त्तयति। आत्मेति ॥ किमित्यर्थान्तरेषु सत्स्वात्मतत्त्वमेवानुसन्धातव्यं तत्राह। तदन्वयणे चेति ॥ तस्यैवान्वेष्टव्यत्वे परप्रेमास्पदत्वेन परमानन्दत्वं हेत्वन्तरमाह। तदेवेति ॥ आत्मतत्त्वज्ञानस्य सर्व्वाप्तिफलत्वाच्च तदेवान्वेष्टव्यमित्याह। आत्मानमिति॥ उक्तया परिपाट्या प्रसिद्धमर्थं सङ्गृह्णाति। आत्मतत्त्वमिति ॥ उक्तमर्थान्तरमनुवदति। यस्त्विति ॥ सोऽविद्याविषय इति सम्बन्धः। कथं भेददृष्टिविषयस्याविद्याविषयत्वं तत्राह। अन्योऽसाविति। यो भेददृष्टिपरः सन् वेदेत्यविद्या तद्दृष्टिमूलं सूचिता तेन तद्विषयो भेददृष्टिविषय इत्यर्थः। कथं यथोक्तौ विद्याविद्याविषयावसङ्कीर्णाववमन्तुं शक्येते तत्राह। एकधेति ॥ सप्तान्नब्राह्मणे वृत्तमर्थं कथयति। तत्र चेति। विद्याविद्याविषययोरिति यावत्। आदिपदं साध्यसाधनावान्तरभेदसङ्ग्रहार्थं यथोक्तो भेद एव विशेषः। तस्मिन्विनियोगो व्यवस्थापनं तेनेत्यर्थः। उपसंहारब्राह्मणान्ते वृत्तमनुभाषते। स चेति ॥ अथ वोक्तौ विद्याविद्याविषयौ कथमसङ्कीर्णौ मन्तव्यावित्याशङ्क्याह। एकधेति ॥ तत्रोत्तरग्रन्थस्य विषयपरिशेषार्थं पुरुषविधब्राह्मणशेषमारभ्योक्तं दर्शयति।

भा० ऽविद्याविषयः। सर्व्व एव द्विप्रकारोऽन्तःप्राण उपष्टम्भको गृहस्येव स्तम्भादिलक्षणः प्रकाशकोऽमृतो बाह्यश्च कार्य्यलक्षणोऽप्रकाशक उपजनापायधर्म्मकस्तृणकुशमृत्तिकासमो गृहस्येव सत्यशब्दवाच्यो मर्त्त्यस्तेनामृतशब्दवाच्यः प्राणश्छन्न इति चोपसंहृतः। स एव च प्राणो बाह्याधारभेदेष्वनेकधा विसृतः। प्राण एको देव इत्युच्यते। तस्यैव बाह्यः पिण्ड एकः साधारणो विराड्वैश्वानर आत्मा पुरुषविधः प्रजापतिः। को हिरण्यगर्भ

व्या० तत्र चेति। तर्हि समाप्तत्वादविद्याविषयस्य कथमविदुषो गार्ग्यस्य प्रवृत्तिरित्याशङ्क्य तदर्थमवान्तरविभागमनुवदति। स चेति॥ तावेव प्रकारौ दर्शयन्नादौ सूक्ष्मशरीरमुपन्यस्यति। अन्तरिति॥ तस्य बाह्यकरणद्वारा स्थूलेषु विषयेषु प्रकाशकत्वममृतत्वं च व्युत्पादितं द्वितीयं प्रकारमाचक्षाणः स्थूलं दर्शयति। बाह्यश्चेति॥ तस्य कयापि विधया सूक्ष्मदेहं सत्यप्रकाशकत्वादप्रकाशकत्वं चागमापायित्वेनावच्छेद्यत्वं सूचयति। उपजनेति॥ यथा गृहस्य तृणादि बहिरङ्गं तथा सूक्ष्मस्य देहस्य स्थूलो देहस्तथापि तृणादिना विना गृहस्य व्यवहारायोग्यत्ववत्तस्यापि स्थूलदेहं विना न तद्योग्यत्वमिति मत्वाह। तृणेति॥ तस्य पूर्व्वप्रकरणान्ते नामरूपे सत्यमित्यत्र प्रस्तुतत्वमस्तीत्याह। सत्येति॥ सर्व्वथा बाधवैधुर्य्यं सत्यत्वमिति शङ्कां निरसितुं विशिनष्टि। मर्त्त्य इति॥ तस्य कार्य्यं दर्शयति। तेनेति॥ वृत्तमनूद्याजातशत्रुब्राह्मणमवतारयति। स एवेति। आदित्यचन्द्रादयो बाह्याधारभेदा अनेकधात्वमतिष्ठा मूर्द्धत्वादिवक्ष्यमाणगुणवशादृथ्वं। कथं तर्हि तस्यैकत्वं तत्राह। प्राण इति॥ प्राणस्य नानात्वमेकत्वञ्चोक्तं तत्रैकत्वं विवृणोति। तस्यैवेति॥ प्राणस्यैव स्वभावभूतोऽनात्मलक्षणः पिण्डः समष्टिरूपो हिरण्यगर्भादिशब्दैरुपाधिविषयैस्तत्र तत्र श्रुतिस्मृत्योरुच्यते। स चाग्निर्मूर्द्धा चक्षुषी

भा० इत्यादिभिः पिण्डप्रधानैः शब्दैराख्यायते सूर्य्यादिप्रविभक्तकरणः ॥

एकञ्चानेकञ्च ब्रह्मैतावदेव नातः परमस्ति प्रत्येकञ्च शरीरभेदेषु परिसमाप्तं चेतनावत्कर्तृ भोक्तृ चेत्यविद्याविषयमेवात्मत्वेनोपगतो गार्ग्यो ब्राह्मणो वक्तोपस्थाप्यते। तद्विपरीतात्मदृगजातशत्रुः श्रोता। एवं हि यतः पूर्व्वपक्षसिद्धान्ताख्यायिकारूपेण समर्प्यमाणोऽर्थः श्रोतुश्चित्तस्य वशमेति। विपर्य्यये हि तर्कशास्त्रवत्केवलार्थानुगमवाक्यैः समर्प्यमाणो दुर्ज्ञेयः स्यादत्यन्तसूक्ष्मत्वाद्वस्तुनः। तथा च काठके। श्रवणायापि बहुभिर्यो न लभ्य इत्यादिवाक्यैः सुसंस्कृतदेवबुद्धिगम्यत्वं सामान्यमात्रबुद्ध्यवुद्धि-

---

व्या० चन्द्रसूर्य्यावित्यादि श्रुतेः सूर्य्यादिभिः प्रविभक्तैः करणैरुपेतो भवतीत्यर्थः।

यद्ब्रह्म समस्तं व्यस्तं च तदिदं हिरण्यगर्भमात्रमेव न तस्मादधिकमस्तीति हिरण्यगर्भं स्तौति। एकञ्चेति॥ एकत्वं विशदीकृत्य प्राणस्य नानात्वं विशदयति। प्रत्येकञ्चेति। गोत्वादिसामान्य तुल्यत्वं व्यावर्त्तयति। चेतनावदिति॥ केवलभोक्तृत्वपक्षं वारयति। कर्तृ इति। वक्ता पूर्व्वपक्षवादीति यावत्॥ तस्मादमुख्याद्ब्रह्मणो विपरीतं मुख्यं ब्रह्म तस्मिन्नात्मदृष्टो राजा श्रोता सिद्धान्तवादीत्यर्थः। किमिति वक्तृश्रोतृरूपाख्यायिका प्रणीयते तत्राह। एवं हीति॥ एवं शब्दार्थमेव स्फुटयति। पूर्व्वपक्षेति। अतो भवितव्यमाख्यायिकयेति शेषः॥ आख्यायिकानङ्गीकारे दोषमाह। विपर्य्यये हीति। यथा तर्कशास्त्रेण समर्थ्यमानोऽर्थो ज्ञातुं न शक्यते तौत्प्रेक्षिकतर्काणां निरङ्कुशत्वात्। यथा केवलमर्थोऽनुगम्यते। प्रश्नप्रतिवचनभावरहितैर्वाक्यैस्तैः समर्थ्यमानोऽपि दुर्विज्ञेयोऽर्थः स्यात्। यद्याख्यायिका नानुश्रीयते। तेन सा सुखप्रतिपत्त्यर्थमनुसर्त्तव्येत्यर्थः॥

भा० गम्यत्वं च सप्रपञ्चन्दर्शितं। आचार्य्यवान्पुरुषो वेद। आचार्य्याद्धैव विद्येति च छान्दोग्ये। उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिन इति च गीतासु। इहापि च शाकल्ययाज्ञवल्क्यसंवादेनातिगह्वरत्वं महता संरम्भेण ब्रह्मणो वक्ष्यति। तस्माच्छिष्ट एवाख्यायिकारूपेण पूर्व्वपक्षसिद्धान्तरूपमापाद्य एवं वस्तुसमर्पणार्थमस्यारम्भः। आचारविध्युपदेशार्थश्च। एवमाचारवतोर्वक्तृश्रोत्रोराख्यायिकानुगतोऽर्थो ऽवगम्यते। केवलतर्कबुद्धिनिषेधार्था चाख्यायिका। नैषा तर्केण मतिरपनेया। न तर्कशास्त्रदग्धायेति श्रुतिस्मृतिभ्यां श्रद्धा च ब्रह्मविज्ञाने परमं साधनमित्याख्यायिकार्थः।

व्या० कुतो दुर्विज्ञेयत्वन्तत्राह। अत्यन्तेति॥ यथोक्तस्य वस्तुनो दुर्विज्ञेयत्वे श्रुतिस्मृतिसंवादं दर्शयति। तथा चेति। सुसंस्कृता परिशुद्धा देवबुद्धिः सात्त्विकी बुद्धिः। सामान्यमात्रबुद्धिस्तामसी राजसी च बुद्धिः। अतिगह्वरत्वमत्यन्तगम्भीरत्वं संरम्भस्तात्पर्य्यं॥ ब्रह्मणो दुर्विज्ञयत्वे फलितमाह। तस्मादिति॥ आख्यायिकायाः सुखप्रतिपत्त्यर्थमुक्त्वाऽर्थान्तरमाह। आचारेति॥ उत्तमादधमेन प्रणिपातोपसदनादि द्वारा विद्या ग्राह्या। अधमात्तूत्तमेन तद्व्यतिरेकेण श्रद्धादिमात्रेण सा लभ्यत इत्याचारप्रकारज्ञापनार्थश्चायमारम्भ इत्यर्थः॥ आख्यायिकाया यथोक्तेऽर्थे नित्यत्वं कथयति। एवमिति। वक्तृश्रोत्रोर्मध्ये यथोक्ताचारवता श्रोत्रा विद्या लब्धव्या। वक्त्रा च तादृशेन सोपदेष्टव्येत्येषोऽर्थोऽस्यामाख्यायिकायामनुगतो गम्यते। तस्मादाचारविशेषन्दर्शयितुमेषाऽऽख्यायिका युक्तेत्यर्थः॥ आगमानुसारिगुरुसम्प्रदायादेव तत्त्वधीर्लभ्यते। यस्तु केवलस्तर्कस्तदृशान्नैषा बुद्धिः सिद्ध्यति। तथा च केवलतर्कप्रयुक्ता तत्त्वबुद्धिरिति सम्भावना निषेधार्थाऽऽख्यायिकेति पक्षान्तरमाह। केवलेति॥ केवलेन तर्केण तत्त्वबुद्धिर्न सिद्ध्यतीत्यत्र श्रुतिस्मृती दर्शयति। नैषेति। मतिर्दद्यादिति शेषः॥ प्रकारान्तरेणाख्यायिकामवतार्य्य तत्रा-

उ० ॥ ॐ ॥ दृप्तबालाकिर्हानूचानो गार्ग्य आस स होवाचाजातशत्रुं काश्यं ब्रह्म ते ब्रवाणीति स

भा० तथा हि गार्ग्याजातशत्रोरतीव श्रद्धालुता दृश्यते आख्यायिकायां। श्रद्धावान्लभते ज्ञानमिति च स्मृतिः॥

तत्र पूर्व्वपक्षवाद्यविद्याविषयब्रह्मविद्दृप्तबालाकिर्दृप्तो गर्व्वितोऽसम्यग्ब्रह्मविज्ञत्वादेव बलाकाया अपत्यं बालाकिर्दृप्तश्चासौ बालाकिश्च दृप्तबालाकिर्हशब्द ऐतिह्यार्थ आख्यायिकायामनूचानोऽनुवचनसमर्थो वक्ता वाग्मी गार्ग्यगोत्रत आस बभूव। क्वचित्कालविशेषे स ह उवाचाजातशत्रुनामानं काश्यं काशिराजमभिगम्य ब्रह्म ते ब्रवाणीति ते तुभ्यं ब्रह्म ब्रवाणि कथयानि। स एवमुक्तोऽजातशत्रुरुवाच सहस्रं गवां दद्मः। एतस्यां वाचि यो मां प्रत्यवोचो ब्रह्म ते ब्रवाणीति तावन्मात्रमेव गोसहस्रप्रदाने निमित्तमित्यभिप्रायः। साक्षाद्ब्रह्मकथनमेव निमित्तं कस्मान्नापेक्षते सहस्रदाने ब्रह्म ते ब्रवाणीति। इयमेव तु वाक् निमित्तमपेक्षत इत्युच्यते। यतः श्रुतिरेव राज्ञोऽभिप्राय-

आ० ख्यायिकानुगुण्यन्दर्शयति। तथा हीति॥ श्रद्धा ब्रह्मज्ञाने परमसाधनमित्यत्र भगवतोऽपि सम्मतिमाह। श्रद्धावानिति॥

आख्यायिकार्थे बहुधा स्थिते तदक्षराणि व्याचष्टे। तत्रेत्यादिना॥ पूर्व्वपक्षवादित्वे हेतुमाह। अविद्याविषयेति॥ गर्वितत्वे हेतुमाह। असम्यगिति॥ इयमेव तु वाक् निमित्तमित्यत्रापि कस्मादित्यनुषज्यते॥ अतो ब्रह्म ते ब्रवाणीति वागेव सहस्रदाने निमित्तमिति शेषः॥ श्रुतिं व्याचष्टे। जनक इति। प्रसिद्धं जन-

उ० होवाचाजातशत्रुः सहस्रमेतस्यां वाचि दद्मो जनको जनक इति वै जना धावन्तीति ॥ १ ॥

स होवाच गार्ग्यो य एवासावादित्ये पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मामै-

भा० माह। जनको दाता जनकः श्रोतेति वै तस्मिन्वाक्यद्वये पदद्वयमभ्यस्यते जनको जनक इति। वैशब्दः प्रसिद्धावद्योतनार्थः। जनको दित्सुर्जनकः शुश्रूषुरिति। ब्रह्मशुश्रूषवो विवक्षवः प्रतिजिघृक्षवश्च जना धावन्तीत्यभिगच्छन्ति। तस्मात्तत्सर्वं मय्यपि सम्भावितवानसीति ॥ १ ॥

एवं राजानं शुश्रूषुमभिमुखीभूतं स ह उवाच गार्ग्यः। य एवासावादित्ये चक्षुषि चैकोऽभिमानी चक्षुर्द्वारेणेह हृदि प्रविष्टोऽहं भोक्ता कर्त्ता चेत्यवस्थितः। एतमेवाहं ब्रह्म पश्याम्यस्मिन्कार्यकरणसङ्घात उपासे। तस्मात्तमहं

व्या० कस्य दातृत्वादि तदवद्योतको वै निपात इति यावत् ॥ वाक्यार्थमाह। जनको दित्सुरित्यादिना। सम्भावितवानसीति प्रागुक्तं वाङ्मात्रं सहस्रदाने निमित्तमिति शेषः ॥ तस्मान्मुक्तप्रसिद्धातिक्रमणादिति यावत्। तत्सर्वं दातृत्वादिकमित्यर्थः। इति शब्दोऽभिप्रायसमाप्त्यर्थः ॥ १ ॥

हृदि प्रविष्टो भोक्ताहमित्यादि प्रत्यक्षं प्रमाणयति। अहमिति ॥ दृष्टिफलं नैरन्तर्याभ्यासं दर्शयति। उपास इति ॥ तावता मम किमायातं तदाह। तस्मादिति ॥ मामेति प्रतीकमादायाभ्यासस्यार्थमाह। मामेति ॥ विनिवारयन्प्रत्युवाचेति सम्बन्धः। एकस्य माङो निवारकत्वमपरस्य संवादेन सङ्गतिरिति विभागे सम्भवति कुतो द्विर्वचनमित्याशङ्क्याह। मामे-

उ० तस्मिन्संवदिष्ठा अतिष्ठाः सर्व्वेषां भूतानां मूर्द्धा राजेति वा अहमेतमुपास इति स य एतमेवमुपास्तेऽतिष्ठाः सर्व्वेषां भूतानां मूर्द्धा राजा भवति ॥ २ ॥

भा० पुरुषं ब्रह्म तुभ्यं ब्रवीम्युपास्वेति । स एवमुक्तः प्रत्युवाचाजातशत्रुर्मामा मैतेति हस्तेन विनिवारयन्नेतस्मिन्ब्रह्मणि विज्ञेये मा संवदिष्ठा मामेत्याबाधनार्थं द्विर्वचनं । एवं समाने विज्ञानविषय एव आवयोरस्मानज्ञानवत इव दर्शयता बाधिताः स्यामोऽतो मा संवदिष्ठा मा संवादं कार्षीरस्मिन्ब्रह्मणि । अन्यच्चेज्जानासि तद्ब्रह्म वक्तुमर्हसि । न तु यन्मया ज्ञायत एवाद्य चेन्मन्यसे जानीषे त्वं ब्रह्मसात्रं न तु तद्विशेषणोपासनफलानीति तन्न मन्तव्यं यतः सर्व्वमेतदहं जाने । यद्ब्रवीषि कथमतिष्ठा अतीत्य सर्व्वाणि भूतानि तिष्ठतीति । अतिष्ठाः सर्व्वेषां च भूतानां मूर्द्धा शिरो राजेति । वैराजादीन्त्रिगुणोपेतत्वादेतैर्विशेषणैर्विशिष्टमेतद्ब्रह्मास्मिन्कार्य्यकरणसंघाते कर्त्तृ भोक्तृ चेत्यहमेतमुपास इति फलमप्येवं विशिष्टोपासकस्य । स य एत-

---

व्या० त्याबाधनार्थमिति ॥ तदेव स्फुटयति । एवमिति ॥ त्वदुक्तेन प्रकारेण यो विज्ञानविषयोऽर्थस्तस्मिन्नावयोर्विज्ञानसाम्यादेव समानेऽपि विज्ञानवत्त्वे सत्यस्मान् विज्ञानवत इव स्वीकृत्य तमेवार्थमस्मान् प्रत्युपदेशेन ज्ञापयता भवता वयं बाधिताः स्याम इति योजना । तथापि गार्ग्यस्य कथमीषद्बाधनं तत्राह । अत इति ॥ अतिष्ठाः सर्व्वेषामित्यादि वाक्यं शङ्काद्वारा अव-

उ० स होवाच गार्ग्यो य एवासौ चन्द्रे पुरुष एत-
मेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैत-
स्मिन्संवदिष्ठा बृहन्पाण्डरवासाः सोमो राजेति

भा० मेवमुपास्तेऽतिष्ठाः सर्व्वेषां भूतानां मूर्द्धा राजा भवति यथा गुणोपासनमेव हि च फलत्वं यथा यथोपासते तदेव भवतीति श्रुतेः ॥ २ ॥

संवादेनादित्यब्रह्मणि प्रत्याख्यातेऽजातशत्रुणा चन्द्रमसि ब्रह्मान्तरं प्रतिपेदे गार्ग्यः। य एवासौ चन्द्रे मनसि चैकः पुरुषो भोक्ता कर्त्ता चेति पूर्व्ववद्विशेषणं। बृहन्महत्पाण्डरं शुक्लं वासो यस्य सोऽयं पाण्डरवासा अप्शरी-

---

व्या० तार्थं व्याकरोति। अथेत्यादिना ॥ एतं पुरुषमिति शेषः। इतिशब्दो गुणोपास्तिसमाप्त्यर्थः। पूर्वोक्तरीत्या त्रिभिर्गुणैर्विशिष्टं ब्रह्म तदुपासकस्य फलमपि जानामीत्युक्त्वा फलवाक्यमुपादत्ते। स य इति ॥ किमिति यथोक्तं फलमुच्यते तत्राह। यथेति ॥ २ ॥

मनसि चेति चकाराद्बुद्धौ चेत्यर्थः। एकः पुरुषस्तमेवाहं ब्रह्मोपास इत्युपास्त इत्युक्ते मा मैत्यादिना प्रत्युवाचेत्याह। इति पूर्व्ववदिति ॥ भानुमण्डलतो द्विगुणश्चन्द्रमण्डलमिति प्रसिद्धिमाश्रित्याह। महानिति ॥ कथं पाण्डरं वासश्चन्द्राभिमानिनः प्राणस्य सम्भवतीत्याशङ्क्याह। अप्शरीरत्वादिति ॥ पुरुषो हि शरीरेण वाससेव वेष्टितो भवति पाण्डरत्वञ्चापां प्रसिद्धं आपो वासः प्राणस्येति च श्रुतिरतो युक्तं प्राणस्य पाण्डरवासस्त्वमित्यर्थः। न केवलं सोमशब्देन चन्द्रमा गृह्यते। किन्तु लतापि समानधर्म्मत्वादित्याह। यथेति ॥ चन्द्रमसं लतात्मकं बुद्धिनिष्ठञ्च पुरुषमेकीकृत्याहंग्रहेणोपास्तिरित्यर्थः ॥ समस्तोपास्तिफलमाह। यथोक्तेति ॥ यज्ञशब्देन प्रकृतिरुक्ता ॥ विकार-

उ० वा अहमेतमुपास इति स य एतमेवमुपास्तेऽहर-
हर्ह सुतः प्रसुतो भवति नास्यान्नं क्षीयते ॥ ३ ॥
स होवाच गार्ग्यो य एवासौ विद्युति पुरुष
एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा
मैतस्मिन्संवदिष्ठास्तेजस्वीति वा अहमेतमु-
पास इति स य एतमेवमुपास्ते तेजस्वी ह भवति
तेजस्विनी हास्य प्रजा भवति ॥ ४ ॥

भा० रुत्वात्प्राणस्य। यस्मादन्नभूतोऽभिषूयते लतात्मको यज्ञे तमे-
कीकृत्यैतमेवाहं ब्रह्मोपासे यथोक्तगुणं च उपास्ते तस्या-
हरहः सोमोऽभिषुतो यज्ञे प्रसुतश्च विकारेष्वन्नञ्चास्य न
क्षीयतेऽन्नात्मकोपासकस्य ॥ ३ ॥
तथा विद्युति त्वचि हृदये चैका देवता तेजस्वीति
विशेषणं तस्यास्तत्फलं तेजस्वीह भवति तेजस्विनी हास्य
प्रजा भवति। विद्युतां बहुत्वस्याङ्गीकरणादात्मनि प्रजा-
याञ्च फलबाहुल्यं ॥ ४ ॥

आ० शब्देन विकृतयो गृह्यन्ते। यथोक्तोपासकस्य प्रकृतिविकृत्यनु-
ष्ठानसामर्थ्यं लीलया लभ्यमित्यर्थः। अन्नात्मयस्योपासनानुसारि-
त्वादुपपन्नत्वमभिप्रेत्योपासकं विशिनष्टि। अन्नात्मेति। ३ ॥
संवाददोषेण चन्द्रे ब्रह्मण्यपि प्रत्याख्याते ब्रह्मान्तरमाह।
तथेति॥ कथमेकमुपासनमनेकफलमित्याशङ्क्याह। विद्युतामिति॥
अप्रवर्त्तित्वमप्रवर्त्तकत्वमक्रियावत्त्वं वा॥ कथमेकस्मिन्नायाव-
पराजिता सेनेति गुणः सम्भवति तत्राह। मरुतामिति॥

उ० स होवाच गार्ग्यो य एवायमाकाशे पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठाः पूर्णमप्रवर्तीति वा अहमेतमुपास इति स य एतमेवमुपास्ते पूर्यते प्रजया पशुभिर्नास्यास्माल्लोकात्प्रजोद्वर्तते ॥ ५ ॥

स होवाच गार्ग्यो य एवायं वायौ पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा इन्द्रो वैकुण्ठो पराजिता सेनेति वा अहमेतमुपास इति स य एतमेवमुपास्ते जिष्णुर्हापराजिष्णुर्भवत्यन्यतस्त्यजायी ॥ ६ ॥

भा० तथाऽऽकाशे हृद्याकाशे चैका पूर्णमप्रवर्त्ति चेति विशेषणद्वयं पूर्णत्वविशेषणफलमिदं पूर्यते ह प्रजया पशुभिरप्रवर्त्तिविशेषणफलं नास्यास्माल्लोकात्प्रजोद्वर्त्तत इति प्रजा सन्तानाविच्छित्तिः ॥ ५ ॥

तथा वायौ प्राणे हृदि चैका विशेषणमिन्द्रः परमेश्वरो वैकुण्ठोऽप्रसह्यो नरैर्जितपूर्वो पराजिता सेना मरुतां गणत्वप्रसिद्धेरुपासनफलमपि । जिष्णुर्हं जयनशीलोऽपराजिष्णुर्न च परैर्जितस्वभावो भवति । अन्यतस्त्यजायी अन्यतस्त्यानां सपत्नानां जयनशीलो भवति ॥ ६ ॥

व्या० विशेषणत्रयस्य फलत्रयं क्रमेण व्युत्पादयति । जिष्णुरित्यादिना ॥ अन्यतस्त्यानामन्यतो मार्गतो जातानां । यद्वविर्विध्यते छिप्यते

उ० स होवाच गार्ग्यो य एवायमग्नौ पुरुष एत-
मेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा
मैतस्मिन्संवदिष्ठा विषासहिरिति वा अहमेत-
मुपास इति स य एतमेवमुपास्ते विषासहिर्ह
भवति विषासहिर्हास्य प्रजा भवति ॥ ७ ॥

स होवाच गार्ग्यो य एवायमप्सु पुरुष एतमेवाहं
ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्सं-
वदिष्ठाः प्रतिरूप इति वा अहमेतमुपास इति
स य एतमेवमुपास्ते प्रतिरूपꣳ हैवैनमुपगच्छति
नाप्रतिरूपमथो प्रतिरूपोऽस्माज्जायते ॥ ८ ॥

भा० अग्नौ वा चिद्धृदि चैका विशेषणं विषासहिर्मर्षयिता
परेषां अग्निवाजल्यात्फलवाजल्यं पूर्ववत् ॥ ७ ॥

अप्सु रेतसि हृदि चैका विशेषणं प्रतिरूपोऽनुरूपः
श्रुतिस्मृत्यप्रतिकूल इत्यर्थः। फलं प्रतिरूपं श्रुतिस्मृति-
शासनानुरूपमेव। एनमुपगच्छति प्राप्नोति न विपरीत-
मन्यच्चास्मात्तथाविध एवोपजायते ॥ ८ ॥

आ० तत्सर्वं भस्मीकरणेन सहते तेनाग्निर्विषासहिः। यथा पूर्वं
विद्युतां बाहुल्यादात्मनि प्रजायां च फलबाहुल्यमुक्तं तथा चात्रा-
प्यग्नीनां बहुत्वादुपासकस्यात्मनि प्रजायां च दीप्ताग्नित्वं सिध्य-
तीत्याह। अग्नीति ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

प्रतिरूपत्वं प्रतिकूलत्वमित्येतद्व्यावर्त्तयति। अनुरूप इति ॥
अन्यच्च फलमिति सम्बन्धः। अस्मादुपासितुरित्यर्थः। तथाविध-
श्रुतिस्मृत्यनुकूल इति यावत्। हार्दं चेत्येतदेव स्पष्टयति। खल्वेति॥

उ॰ स होवाच गार्ग्यो य एवायमादर्शे पुरुष एतमे-
वाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैत-
स्मिन्संवदिष्ठा रोचिष्णुरिति वा अहमेतमुपास
इति स य एतमेवमुपास्ते रोचिष्णुर्ह भवति
रोचिष्णुर्हास्य प्रजा भवत्यथो यैः सन्निगच्छति
सर्वाᳪंस्तानतिरोचते ॥ ९ ॥

स होवाच गार्ग्यो य एवायं यं तं पश्चाच्छब्दोऽ
नूदेत्येतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रु-
र्मा मैतस्मिन्संवदिष्ठा असुरिति वा अहमेतमुपास
इति स य एतमेवमुपास्ते सर्वᳪं हैव वास्मिँल्लोक
आयुरेति नैनं पुरा कालात्प्राणो जहाति ॥ १० ॥

भा॰ आदर्शे प्रसादस्वभावे चान्यत्र खड्गादौ हार्दे च स्वच्छ-
बुद्धिस्वाभाव्ये चेका विशेषणं रोचिष्णुर्दीप्तिस्वभावः फलञ्च
तदेव रोचनाधारबाहुल्यात्फलबाहुल्यं ॥ ९ ॥

यं तं गच्छन्तं य एवायं शब्दः पृष्ठतोऽनूदेत्यध्यात्मञ्च
जीवनहेतुः प्राणस्तमेकीकृत्याहासुः प्राणो जीवनहेतुरिति।
गुणस्तस्य फलं सर्व्वमायुरस्मिन् लोके एतीति। यथोपात्तं
कर्म्मणायुः कर्म्मफलपरिच्छिन्नकालात्पुरा पूर्व्वं रोगा-
दिभिः पीड्यमानमप्येनं प्राणो न जहाति ॥ १० ॥

व्या॰ सर्व्वेनैकेति विशेषणस्य देवतेति विशेष्यतया सम्बध्यते। तदेव रो-
चिष्णुत्वमित्यर्थः॥ व्याहैतमेवाहमित्यादीति शेषः। तस्य गुणवदुपा-
सनस्येत्यर्थः। सर्व्वमायुरित्येतद्याचष्टे। यथोपात्तमिति। ८।९।१०।

उ० स होवाच गार्ग्यो य एवायं दिक्षु पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा द्वितीयोऽनपग इति वा अहमेतमुपास इति स य एतमेवमुपास्ते द्वितीयवान् ह भवति नास्माद्गणश्छिद्यते ॥ ११ ॥

स होवाच गार्ग्यो य एवायं छायामयः पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा मृत्युरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते सर्वꣳ हैवास्मिँल्लोक आयुरेति नैनं पुरा कालान्मृत्युरागच्छति ॥ १२ ॥

भा० दिक्षु कर्णयोर्हृदि चैकाश्विनौ देवाववियुक्तस्वभावौ गुणस्तस्य द्वितीयवत्त्वमनपगत्वमवियुक्तता चान्योऽन्यं दिशामश्विनोश्चैवंधर्म्मित्वात्तदेव च फलमुपासकस्य गणाविच्छेदो द्वितीयवत्त्वञ्च ॥ ११ ॥

छायायां बाह्ये तमस्यध्यात्मे चावरणात्मकेऽज्ञाने हृदि चैका देवता विशेषणं मृत्युः फलं सर्व्वं पूर्व्ववन्मृत्योरनागमे रोगादिपीडाभावो विशेषः ॥ १२ ॥

आ० का पुनरसावेका देवता तत्राह । अश्विनाविति । तस्य देवस्येति यावत् ॥ यथोक्तं गुणद्वयमुपपादयति । दिशामिति । द्वितीयवत्त्वं साधुभृत्यपरिवृतत्वं ॥ शब्दब्रह्मोपासकस्येव तमो

उ० स होवाच गार्ग्यो य एवायमात्मनि पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा आत्मन्वीति वा अहमेतमुपास इति स य एतमेवमुपास्ते आत्मन्वीह भवत्यात्मन्विनीहास्य प्रजा भवति स ह तूष्णीमास गार्ग्यः ॥ १३ ॥

स होवाचाजातशत्रुरेतावन्नू३ इत्येतावद्धीति

भा० आत्मनि प्रजापतौ बुद्धौ च हृदि चैकात्मन्वीह भवत्यात्मवान्भवति आत्मन्विनी हास्य प्रजा भवति बुद्धिवशत्वात्प्रजायां सम्पादनमिति विशेषः। स्वयं परिज्ञातत्वेनैवंक्रमेण प्रत्याख्यातेषु ब्रह्मसु स गार्ग्यो ऽक्षीणब्रह्मविज्ञानो ऽप्रतिभासमानोत्तरस्तूष्णीमवाक्शिरा आस ॥ १३ ॥

तं तथाभूतमालक्ष्य गार्ग्यं स होवाचाजातशत्रुरेतावन्नु इति। किमेतावद्ब्रह्म निर्ज्ञातमाहोस्विदधिकमप्यस्तीतर आह एतावद्धीति। नैतावता विदितेन ब्रह्म विदितं

व्या० ब्रह्मोपासकस्यापि फलमित्याह। फलमिति। फलभेदे* च कथमुपासनभेदः स्यादित्याशङ्क्याह। मत्योरिति॥ व्यस्तानि ब्रह्माण्यपन्यस्य समस्तं ब्रह्मोपदिशति। प्रजापताविति॥ आत्मवत्त्वं वश्यात्मकत्वं। फलस्यात्मगामित्वान्न प्रजायां तदभिधानमुचितमित्याशङ्क्याह। बुद्धीति॥ ११॥ १२॥ १३॥

विचारार्था स्तुतिरिति कथयति। किमेतावदिति॥ वाक्यार्थबोधसमाधिभ्यां स्फुटयति। किमित्यादिना॥ आदित्यादेर-

---

* फलभेदाभाव इति पाठान्तरः।

उ० स होवाच गार्ग्यो य एवायं दिक्षु पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा द्वितीयोऽनपग इति वा अहमेतमुपास इति स य एतमेवमुपास्ते द्वितीयवान् ह भवति नास्माद्गणश्छिद्यते ॥ ११ ॥

स होवाच गार्ग्यो य एवायं छायामयः पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा मृत्युरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते सर्वं हैवास्मिंल्लोक आयुरेति नैनं पुरा कालान्मृत्युरागच्छति ॥ १२ ॥

भा० दिक्षु कर्णयोर्हृदि चैकाश्विनौ देवाववियुक्तस्वभावौ गुणस्तस्य द्वितीयवत्त्वमनपगत्वमवियुक्तता चान्योऽन्यं दिशामश्विनोश्चैवंधर्मित्वात्तदेव च फलमुपासकस्य गणाविच्छेदो द्वितीयवत्त्वञ्च ॥ ११ ॥

छायायां बाह्ये तमस्यध्यात्मे चावरणात्मकेऽज्ञाने हृदि चैका देवता विशेषणं मृत्युः फलं सर्व्वं पूर्व्ववन्मृत्योरनागमे रोगादिपीडाभावो विशेषः ॥ १२ ॥

आ० का पुनरसावेका देवता तत्राह । अश्विनाविति । तस्य देवस्येति यावत् ॥ यथोक्तं गुणद्वयमुपपादयति । दिशामिति । द्वितीयवत्त्वं साधुभृत्यपरिवृतत्वं ॥ शब्दब्रह्मोपासकस्येव तमो

उ० स होवाच गार्ग्यो य एवायमात्मनि पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा आत्मन्वीति वा अहमेतमुपास इति स य एतमेवमुपास्ते आत्मन्वीह भवत्यात्मन्विनीहास्य प्रजा भवति स ह तूष्णीमास गार्ग्यः ॥ १३ ॥

स होवाचाजातशत्रुरेतावन्नू इत्येतावद्धीति

भा० आत्मनि प्रजापतौ बुद्धौ च हृदि चैकात्मन्वीह भवत्यात्मवान्भवति आत्मन्विनी ह्यस्य प्रजा भवति बुद्धिवकुशलात्प्रजायां सम्पादनमिति विशेषः। स्वयं परिज्ञातत्वेनैवंक्रमेण प्रत्याख्यातेषु ब्रह्मसु स गार्ग्यः क्षीणब्रह्मविज्ञानोऽप्रतिभासमानोत्तरस्तूष्णीमवाक्शिरा आस ॥ १३ ॥

तं तथाभूतमालक्ष्य गार्ग्यं स होवाचाजातशत्रुरेतावन्नु इति। किमेतावद्ब्रह्म निर्ज्ञातमाहोस्विदधिकमप्यस्तीतर आह एतावद्धीति। नैतावता विदितेन ब्रह्म विदितं

व्या० ब्रह्मोपासकस्यापि फलमित्याह। फलमिति। फलभेदे* च कथमुपासनभेदः स्यादित्याशङ्क्याह। मत्योरिति ॥ व्यस्तानि ब्रह्माण्युपन्यस्य समस्तं ब्रह्मोपदिशति। प्रजापताविति ॥ आत्मवत्त्वं वश्यात्मकत्वं। फलस्यात्मगामित्वान्न प्रजायां तदभिधानमुचितमित्याशङ्क्याह। बुद्धीति ॥ ११ ॥ १२ ॥ १३ ॥

विचारार्था श्रुतिरिति कथयति। किमेतावदिति ॥ वाक्यार्थं चोद्यसमाधिभ्यां स्फुटयति। किमित्यादिना ॥ आदित्यादेर-

---

* फलभेदाभाव इति पाठान्तरः।

उ॰ नैतावता विदितं भवतीति स होवाच गार्ग्य उपत्वायानीति ॥ १४ ॥

भा॰ भवतीत्याहाजातशत्रुः किमर्थं गर्वितोऽसि ब्रह्म ते ब्रवाणीति किमेतावद्विदितं विदितमेव न भवतीत्युच्यते न फलवद्विज्ञानश्रवणान्न चार्थवादत्वमेव वाक्यानामवगन्तुं शक्यमपूर्व्वविधानपराणि हि वाक्यानि प्रत्युपासनोपदेशं लक्ष्यन्तेऽतिष्ठाः सर्व्वेषां भूतानामित्यादीनि तदनुरूपाणि च फलानि सर्व्वत्र श्रूयन्ते। विभक्तान्यर्थवादत्वे एतदसमञ्जसं। कथं तर्हि नैतावता विदितं भवतीति। नैष दोषोऽधिकृतापेक्षत्वात्। ब्रह्मोपदेशार्थं हि शुश्रूषवेऽजातशत्रवे अमुख्यब्रह्मविद्गार्ग्यः प्रवृत्तः स युक्त एव मुख्यब्रह्मविदाऽजातशत्रुणाऽमुख्यब्रह्मविद्गार्ग्यो वक्तुं यन्मुख्यं ब्रह्म वक्तुं प्रवृत्तस्त्वं तन्न जानीष इति। यद्यमुख्यब्रह्मविज्ञानमपि प्रत्याख्यायेत तदेतावतेति न ब्रूयान्न किञ्चिज्ज्ञातं त्वयेत्येवं ब्रूयात्तस्माद्भवन्त्येतावन्त्यविद्याविषये ब्रह्माण्येता-

आ॰ विदितत्वनिषेधं प्रतिज्ञाय हेतुमाह। न फलवदिति ॥ नैतानि वाक्यानि फलवद्विज्ञानपराणि ॥ अर्थवादत्वादित्याशङ्क्याह। न चेति। फलवत्त्वाच्चापूर्व्वविधिपराण्येतानि वाक्यानीत्याह। तदनुरूपाणीति ॥ अर्थवादत्वेऽपि तेषामपूर्व्वार्थत्वं किं न स्यादित्याशङ्क्याह। अर्थवादत्व इति ॥ वाक्यानां फलवद्विज्ञानपरत्वमुपेत्य निषेधवाक्यस्य गतिं पृच्छति। कथं तर्हीति ॥ तस्यानर्थक्यं परिहरति। नैष दोष इति ॥ अधिकृतापेक्षत्वादेदनप्रतिषेधस्येत्युक्तं स्फुटयति। ब्रह्मेति ॥ नैतावतेत्यविशेषेणामुख्यब्रह्मज्ञानमपि निषिद्धमिति चेन्नेत्याह। यदीति। किञ्च निष्कामेन चेदेतान्यु-

उ० स होवाचाजातशत्रुः प्रतिलोमं वै तद्यद्ब्राह्मणः क्षत्रियमुपेयाद्ब्रह्म मे वक्ष्यतीति व्येव त्वा ज्ञपयिष्यामीति तं पाणावादायोत्तस्थौ तौ ह पुरुषꣳ सुप्तमाजग्मतुस्तमेतैर्नामभिरामन्त्रयाञ्चक्रे बृहन्पा-

भा० वद्विज्ञानद्वारत्वाच्च परब्रह्मविज्ञानस्य युक्तमेव वक्तुं नैतावता विदितं भवतीति । अविद्याविषये विज्ञेयत्वं नामरूपकर्मात्मकत्वञ्चैषां तृतीयेऽध्याये प्रदर्शितं । तस्मान्नैतावता विदितं भवतीति ब्रुवता अधिकं ब्रह्म ज्ञातव्यमस्तीति दर्शितं भवति । तच्चानुपसन्नाय न वक्तव्यमित्याचारविधिज्ञो गार्ग्यः स्वयमेवाहोपत्वायानीत्युपगच्छानीति त्वां । यथाऽन्यः शिष्यो गुरुं ॥ १४ ॥

स होवाचाजातशत्रुः प्रतिलोमं विपरीतञ्चैतत्किं तद्यद्ब्राह्मण उत्तमवर्ण आचार्यत्वेऽधिकृतः सन् क्षत्रियमनाचार्यस्वभावमुपेयादुपगच्छेच्छिष्यवृत्त्या ब्रह्म मे वक्ष्यतीत्येतदाचारविधिशास्त्रेषु निषिद्धं । तस्मात्तिष्ठ त्वमा-

व्या० पासनान्यनुष्ठीयन्ते तदेतेषां ब्रह्मज्ञानार्थत्वादमुख्यब्रह्मज्ञाननिषेधमन्तरेण निषेधोपपत्तिरित्याह । एतावद्विद्यानेति ॥ आदित्यादिकमेव मुख्यं ब्रह्मेति निषेधानर्थक्यं तदवस्थमित्याशङ्क्याह । अविद्येति ॥ आदित्यादेर्मुख्यब्रह्मत्वासम्भवान्निषेधस्योपपन्नत्वात्तत्सामर्थ्यसिद्धमर्थमुपन्यस्यति । तस्मादिति ॥ उपगमनवाक्यमुत्थाप्य व्याचष्टे । तच्चेति ॥ १४ ॥

अब्राह्मणादध्ययनमापत्काले विधीयते । अनुव्रज्या च शुश्रूषा यावदध्ययनं गुरोः । नाब्राह्मणे गुरौ शिष्यो वासमात्यन्तिकं वसेदित्यादीन्याचारविधिशास्त्राणि । आदित्यादिब्रह्मभ्यो विशेष-

उ० पाण्डरवासः सोम राजन्निति स नोत्तस्थौ तं पाणिना पेषं बोधयाञ्चकार स होत्तस्थौ ॥ १५ ॥

भा० चार्य एव सन्। विज्ञापयिष्याम्येव त्वामहं। यस्मिन्विदिते ब्रह्म विदितं भवति। यत्तन्मुख्यं ब्रह्म वेद्यं तं गार्ग्यं सलज्जमालक्ष्य विश्रम्भजननाय पाणौ हस्त आदाय गृहीत्वोत्तस्थावुत्थितवान्। तौ ह गार्ग्याजातशत्रू पुरुषं सुप्तं राजगृहप्रदेशे क्वचिदाजग्मतुरागतौ। तं च पुरुषं सुप्तं प्राप्यैतैर्नामभिर्बृहन् पाण्डरवासः सोम राजन्नित्येतैरामन्त्रयाञ्चक्रे। एवमामन्त्र्यमाणोऽपि स सुप्तो नोत्तस्थौ। तमप्रतिबुध्यमानं पाणिना पेषं आपिष्यापिष्य बोधयाञ्चकार प्रतिबोधितवान्। तेन स होत्तस्थौ। तस्माद्यो गार्ग्येणाभिप्रेतो नासावस्मिञ्छरीरे कर्त्ता भोक्ता ब्रह्मेति ॥१५॥

कथं पुनरिदमवगम्यते सुषुप्तपुरुषगमनतत्सम्बोधनानुत्थानैर्गार्ग्याऽभिमतस्य ब्रह्मणोऽब्रह्मत्वं ज्ञापितमिति। जागरितकाले यो गार्ग्याभिप्रेतः पुरुषः कर्त्ता भोक्ता ब्रह्म स सन्निहितः करणेषु यथा तथा अजातशत्र्वभिप्रेतोऽपि

आ० माह। यस्मिन्निति॥ प्राणस्य व्याप्रियमाणस्यैव सम्बोधनार्थं पृथगुक्तनामाश्रवणादापेषणाच्चोत्थानात्तस्याभोक्तृत्वं सिध्यतीति फलितमाह। तस्मादिति॥ १५॥

तौ ह सुप्तमित्यादि सुप्तपुरुषगत्युक्तिमाक्षिपति। कथमिति॥ गार्ग्यकाश्याभिमतयोरुभयोरपि जागरिते करणेषु सन्निधानाविशेषात्तत्रैव किमिति विवेको न दर्शित इत्यर्थः। जागरितेषु करणेषु द्वयोः सन्निधानेऽपि साङ्कर्याद्दुष्करं विवेचनमिति

भा॰ तत्स्वामी भृत्येष्विव राजसन्निहित एव। किन्तु भृत्यस्वामिनोर्गार्ग्याजातशत्रुभ्यामभिप्रेतयोर्यद्विवेकावधारणकारणं तत्सङ्कीर्णत्वादनवधारितविशेषं यद्द्रष्टृत्वमेव भोक्तुर्न दृश्यत्वं यच्चाभोक्तुर्दृश्यत्वमेव। न तु द्रष्टृत्वं तच्चोभयमिह सङ्कीर्णत्वाद्विविच्य दर्शयितुमशक्यमिति सुप्तपुरुषगमनं॥ ननु सुप्तेऽपि पुरुषे विशिष्टैर्नामभिरामन्त्रितो भोक्तैव प्रतिपत्स्यते नाभोक्तेति नैव निर्णयः स्यादिति। न निर्द्धारितविशेषत्वाद्गार्ग्याभिप्रेतस्य। यो हि सत्येन छन्नः प्राणात्मा ऽमृतो वागादिष्वनस्तमितो निम्लोचत्सु यस्यापः शरीरं पाण्डरवासा यश्चाऽसपत्नवान् यश्च बृहन् यश्च सोमो राजा षोडशकलः स स्वव्यापारारूढो यथा निर्ज्ञात एवाऽनस्तमितस्वभाव आस्ते। न चाऽन्यस्य कस्यचिद्व्यापारस्तस्मिन् काले गार्ग्येणाभिप्रेयते तद्विरोधिनः। तस्मात्स्वनामभिरामन्त्रितेन प्रतिबोद्धव्यं न च प्रत्यबुध्यत।

व्या॰ परिहरति। जागरितेति॥ ब्रह्मशब्दादूर्द्ध्वं सशब्दमध्याहृत्य योजना। तर्हि स्वामिभृत्यन्यायेन तयोर्विवेकोऽपि सुकरः स्यादित्याशङ्क्याह। किन्त्विति॥ तद्विवेकावधारणकारणं तदाह। यद्द्रष्टृत्वमिति॥ कथं तदनवधारितविशेषमिति तदाह। तच्चेति॥ इहेति जागरितोक्तिः। यद्यपि जागरितं हित्वा सुप्ते पुरुषे विवेकार्थं तयोरुपगतिस्तत्र यो भोक्तैव संबोधितः स्वनामभिस्तच्छब्दं श्रोष्यति नाचेतनस्तथापि नेष्टविवेकसिद्धिर्गार्ग्यकाश्याभीष्टात्मनोरुच्यितसंशयादिति शङ्कते। नन्विति॥ संशयं निराकरोति। नेत्यादिना॥ विशेषावधारणमेव विशदयति। यो हीत्यादिना॥ स्वव्यापारस्तु मुखशब्दादिः। यथानिर्ज्ञातो यथोक्तैर्विशेषणैरुपलक्ष्यं रूपमनतिक्रम्य वर्त्तमानः प्राणस्योक्तविशेष-

भा० तस्मात् पारिशेष्याद्गार्ग्याभिप्रेतस्याभोक्तृत्वं। ब्रह्मणो भोक्तृस्वभावश्चेद्भुञ्जीतैव स्वं विषयं प्राप्तं। न हि दग्धृस्वभावः प्रकाशयितृस्वभावः सन् वह्निस्तृणोलपादि दाह्यं स्वविषयं प्राप्तं न दहति प्रकाश्यञ्च न प्रकाशयति। न चेत् दहति प्रकाशयति च प्राप्तं स्वं विषयं नासौ वह्निर्दग्धा प्रकाशयिता चेति निश्चीयते। यथाऽसौ प्राप्तशब्दादिविषयोपलब्धस्वभावश्चेद्गार्ग्याभिप्रेतः प्राणो वृहन् पाण्डरवासा इत्येवमादिशब्दं स्वं विषयमुपलभेत। यथा प्राप्तं तृणोलपादि वह्निर्दहेत् प्रकाशयेच्चाव्यभिचारेण तद्वत्। तस्मात्प्राप्तानां शब्दादीनामप्रतिबोधादभोक्तृस्वभाव इति निश्चीयते। न हि यस्य यः स्वभावो निश्चितः स तं व्यभिचरति कदाचिदपि। अतः सिद्धं प्राणस्याभोक्तृत्वं सम्बोधनार्थनामविशेषेण सम्बन्धाग्रहणादप्रतिबोध इति चेत्। स्यादेतत्। यथा वज्रव्यासीनेषु स्वनाम-

---

व्या० शवतः स्वापेऽवस्थानेऽपि तस्य तदा भोगाभावस्तत्र भोक्त्रन्तराभ्युपगमादित्याशङ्क्याह। न चेति॥ तस्यैव भोक्तृत्वे फलितमाह। तस्मादिति॥

अस्तु तस्य प्राप्तशब्दश्रवणं तत्राह। न चेति॥ परिशेषसिद्धमर्थमाह। तस्मादिति॥ प्राणस्याभोक्तृत्वं व्यतिरेकद्वारा साधयति। भोक्तृस्वभावश्चेदिति॥ न च भुङ्क्ते तस्मादभोक्तेति शेषः॥ उक्तमर्थं दृष्टान्तेन स्पष्टयति। न हीत्यादिना॥ उलपं बालतृणं॥ विपक्षे दोषमाह। न चेदिति॥ उक्तमर्थं सङ्क्षिप्याह। यथेत्यादिना॥ प्राणस्याभोक्तृत्वमुक्तमुपसंहरति। तस्मादिति॥ यद्यपि प्राणः स्वापे शब्दादीन् न प्रतिबुध्यते तथापि भोक्तृस्वभावो भविष्यति नेत्याह। न हीति॥ सम्बोधनशब्दाश्रव-

भा॰ विशेषेण सम्बन्धाग्रहणान्नामयं सम्बोधयतीति शृण्वन्नपि सम्बोध्यमानो विशेषतो न प्रतिपद्येत। तथैमानि बृहन्नित्येवमादीनि मम नामानीत्यग्रहीत्। सम्बन्धत्वात्प्राणो न गृह्णाति। सम्बोधनार्थं शब्दं न त्वविज्ञातत्वादेवेति चेत्। न। देवताभ्युपगमेऽग्रहणानुपपत्तेः। यस्य हि चन्द्राद्यभिमानिनी देवता ऽध्यात्मं प्राणो भोक्ता ऽभ्युपगम्यते। तस्य तया संव्यवहाराय विशेषनाम्ना सम्बोधो ऽवश्यं गृहीतव्यो ऽन्यथाऽऽह्वानादिविषये संव्यवहारो ऽनुपपन्नः स्यात्। व्यतिरिक्तपक्षेऽप्यप्रतिपत्तेरयुक्तमिति चेत्। यस्य च प्राणव्यतिरिक्तो भोक्ता तस्यापि बृहन्नित्यादिनामभिः सम्बोधने बृहत्त्वादिनाम्नां तदा तद्विषयत्वात् प्रतिपत्तिर्युक्ता। न च कदाचिदपि बृहत्त्वादिशब्दैः सम्बोधितः प्रतिपद्यमानो दृश्यते। तस्मात् अकारणम-

---

व्या॰ णमतः शब्दार्थः॥ तस्य स्वनामाग्रहणं सम्बन्धाग्रहणकृतं नानात्मत्वकृतमिति शङ्कते। सम्बोधनार्थेति॥ शङ्कामेव विशदयति॥ स्यादेतदित्यादिना॥ देवतायाः सम्बन्धाग्रहणमयुक्तं सर्वज्ञत्वादित्युत्तरमाह। न देवतेति॥ तदेव प्रपञ्चयति। यस्य हीत्यादिना॥ तयेति ग्रहणकर्तृनिर्देशः। अवश्यमिति सूचितामनुपपत्तिमाह। अन्यथेति॥ आदिपदेन यागस्तुतिनमस्कारादिर्गृह्यते। संव्यवहारोऽभिज्ञाभोगप्रसादादिः॥ सम्बोधननामाग्रहस्तत्कृतानात्मदोषश्च त्वदिष्टात्मनोऽपि तुल्य इति शङ्कते। व्यतिरिक्तेति॥ सङ्गृहीतं चोद्यं विवृणोति। यस्य चेति॥ तदा सुषुप्तिदशायां प्रतिपत्तिर्युक्तेति सम्बन्धः। तद्विषयत्वादित्यतिरिक्तात्मविषयत्वादिति यावत्। अस्यैवातिरिक्तस्यात्मनः सम्बोधनश्रवणमिति चेन्नेत्याह। न कदाचिदिति॥ त्वदिष्टात्मनः

भा॰ भोक्तृत्वे सम्बोधनाप्रतिपत्तिरिति चेत् । न । तद्वतस्तावन्मात्राभिमानानुपपत्तेः । यस्य प्राणव्यतिरिक्तो भोक्ता स प्राणादिकरणवान् प्राणी तस्य न प्राणदेवतामात्रेऽभिमानो यथा हस्ते । तस्मात् प्राणनामसम्बोधने कृत्स्नाभिमानिनो युक्तैवाप्रतिपत्तिः ॥ न तु प्राणस्यासाधारणनामसंयोगे देवतात्मत्वानभिमानाच्चात्मनः स्वनामप्रयोगे ऽप्यप्रतिपत्तिदर्शनादयुक्तमिति चेत् । सुषुप्तस्य यल्लौकिकं देवदत्तादि नाम तेनापि सम्बोध्यमानः कदाचिन्न प्रतिपद्यते सुषुप्तस्तथा भोक्तापि सन्प्राणो न प्रतिपद्यत इति चेत् । न । आत्मप्राणयोः सुप्तासुप्तत्वविशेषोपपत्तेः । सुप्तत्वात्प्राणग्रस्ततयोपरतकरण आत्मा स्वं नाम प्रयुज्यमानमपि न प्रतिपद्यते ।

व्या॰ सम्बोधनशब्दाप्रतिपत्तावपि भोक्तृत्वाङ्गीकारस्तच्छब्दार्थः । अतो भोक्तृत्वेपि प्राणस्येति शेषः । यथा हस्तः पादोङ्गुलिरित्यादि नामोक्तौ मैत्रो नोत्तिष्ठति । सर्व्वदेहाभिमानित्वेन तन्मात्रानभिमानित्वादेव कार्य्यस्यात्मनः सर्व्वकार्य्यकरणाभिमानित्वादङ्गुलिस्थानीयप्राणमन्त्रो तदभावात्तन्नामाग्रहणं न त्वचेतनत्वादिति परिहरति ॥ न तद्वत इति ॥ तदेव स्फुटयति । यस्येति ॥ प्राणमात्रे प्राणादिकरणवतोऽभिमानाभावे फलितमाह । तस्मादिति ॥

चन्द्रस्यापि प्राणैकदेशत्वात्तन्नामभिः सम्बोधने कृत्स्नाभिमानी सन्नुत्तिष्ठति । अत्राप्यङ्गुल्यादिदृष्टान्तोपपत्तेरित्याशङ्क्याह न त्विति ॥ गोत्ववत्तस्य सर्व्ववस्तुषु समाप्तेरहमिति सर्व्वत्राभिमानसिद्धेर्बोधाबोधौ तुल्यावित्याशङ्क्याह । देवतेति ॥ विशिष्टस्यात्मनो देवतायामात्मत्वाभिमानाभावादितरस्य च कूटस्थत्वमिमात्रत्वेन तदयोगान्न तुल्यतेत्यर्थः ॥ प्रकारान्तरेण तस्याभोक्तृत्वं वारयन्नाह । स्वनामेति ॥ अयुक्तं प्राणेतरस्य

भा॰ न तु तदसुप्तस्य प्राणस्य भोक्तृत्वे उपरतकरणत्वं सम्बोधनाग्रहणं वा युक्तं। अप्रसिद्धनामभिः सम्बोधनमयुक्तमिति चेत्। सन्ति हि प्राणविषयाणि प्रसिद्धानि प्राणादिनामानि। तान्यपोह्याप्रसिद्धैर्बृहत्त्वादिनामभिः सम्बोधनमयुक्तं लौकिकन्यायापोहात्। तस्माद्भोक्तुरेव सतः प्राणस्याप्रतिपत्तिरिति चेन्न। देवताप्रत्याख्यानार्थत्वात्। केवलसम्बोधनमात्राप्रतिपत्त्यैवासुप्तस्याध्यात्मिकस्य प्राणस्याभोक्तृत्वे सिद्धे यच्चन्द्रदेवताविषयैर्नामभिः सम्बोधनं तच्चन्द्रदेवता प्राणोऽस्मिञ्छरीरे भोक्तेति गार्ग्यस्य विशेषप्रतिपत्तिनिराकरणार्थं। न हि तल्लौकिकनाम्ना सम्बोधने शक्यं कर्तुं। प्राण-

व्या॰ भोक्तृत्वमिति शेषः॥ तदेव विवृणोति। सुप्तस्येति॥ विशेषं दर्शयन्नुत्तरमाह। नात्मेति॥ काश्याभीष्टात्मनः सुप्तत्वयुक्तं फलमाह। सुप्तत्वादिति॥ प्राणस्यापि संहृतकरणत्वात्स्वनामाग्रहणमित्याशङ्क्य तस्यासुप्तत्वकृतं कार्य्यं कथयति। न त्विति॥ न हि करणस्वामिनि व्याप्रियमाणे करणोपरमः सम्भवति। तस्य चानुपरतकरणस्य स्वनामाग्रहणमयुक्तमित्यर्थः॥ प्राणनामत्वेनाप्रसिद्धनामभिः सम्बोधनात्तदनुत्थानं नामात्मत्वादिति शङ्कते। अप्रसिद्धेति॥ तदेव स्फुटयति। सन्ति हीति॥ प्रसिद्धमनूद्याप्रसिद्धं विधेयमिति लौकिको न्यायः। अप्रसिद्धसञ्ज्ञाभिः सम्बोधनस्यायुक्तत्वे फलितमाह॥ तस्मादिति॥ चन्द्रदेवताऽस्मिन्देहे कर्त्री भोक्त्री चात्मेति गार्ग्याभिप्रायनिषेधदेवतानामग्रहस्य तात्पर्यात्तद्ग्रहोऽर्थवानिति परिहरति। न देवतेति॥ तदेव प्रपञ्चयति। केवलेति॥ प्राणादीनामपि सम्बोधनेऽपि तन्निराकरणं कर्तुं शक्यमित्याशङ्क्याह॥ न हीति॥ लौकिकनाम्नो देवताविषयत्वाभावादित्यर्थः। प्राणस्याभोक्तृत्वेऽपीन्द्रियाणां भोक्तृत्वमिति केचित्तान्प्रत्याह॥ प्राणेति॥ प्राणकरणत्वं चन्द्रदेवतानाम भोक्तृत्वेऽपि देव-

भा० प्रत्याख्यानेन प्राणग्रस्तत्वात्करणान्तराणां प्रवृत्त्यनुपपत्तेर्भोक्तृत्वाशङ्कानुपपत्तिः। देवतान्तराभावाच्च। नन्वतिष्ठा इत्याद्यात्मन्नीत्यन्तेन गुणवद्देवताभेदस्य दर्शितत्वादयुक्तमिति चेन्न। तस्य प्राण एवैकत्वाभ्युपगमात्। सर्व्वश्रुतिष्वरनाभिनिदर्शनेन सत्येन छन्नः प्राणो वा ऽमृतमिति च प्राणवाद्यस्यान्यस्यानभ्युपगमाद्योक्तुः। एष उ ह्येव सर्व्वे देवाः कतम एको देव इति प्राण इति च सर्व्वदेवानां प्राण एवैकत्वोपपादनाच्च॥

तथा करणभेदेष्वनाशङ्का। देहभेदेष्विव स्मृतिज्ञानेच्छादिप्रतिसन्धानानुपपत्तेः। न ह्यन्यद्दृष्टं अन्यः स्मरति जानातीच्छति प्रतिसन्धाति वा तस्मान्न करणभेद-

---

आ० तान्तरमत्र भोक्तृ स्यादित्याशङ्क्याह। देवतान्तराभावाच्चेति॥ भोक्तृत्वाशङ्कानुपपत्तिरिति पूर्वेण सम्बन्धः। तत्रोपक्रमविरोधं शङ्कते। नन्विति। दर्शितत्वाद्देवतान्तराभावो नास्तीति शेषः॥ स्वतन्त्रो देवताभेदो नास्तीति समाधत्ते। न तस्येति॥ प्राणे देवताभेदस्यैक्ये युक्तिमाह। अरनाभीति॥ न देवतान्तरस्य भोक्तृत्वं गार्ग्यस्य स्वपक्षविरोधादिति शेषः। सर्व्वश्रुतिष्वित्युक्तं ताः सङ्क्षेपतो दर्शयति। एष इति॥ कति देवा याज्ञवल्क्येत्यादिना सङ्क्षेपविस्तराभ्यां सर्व्वेषां देवानां प्राणात्मन्येवैकत्वमुपपाद्यते। अतो न देवताभेदोऽस्तीत्याह। सर्व्वदेवानामिति॥ प्राणात्पृथग्भूतस्य देवस्यात्मातिरेके सत्यसत्त्वापत्तेश्च प्राणान्तर्भावः। सर्व्वदेवताभेदस्येति वक्तुं चशब्दः॥

करणानामभोक्तृत्वे हेत्वन्तरमाह॥ तथेति॥ देवताभेदेष्विवेति यावत्। अनाशङ्का भोक्तृत्वस्येति शेषः॥ तत्रोदाहरणान्तरमाह। देहभेदेष्विवेति॥ न हि हस्तादिषु प्रत्येकं भोक्तृत्वं शङ्क्यते। तथा श्रोत्रनेत्रादिष्वपि न भोक्तृत्वाशङ्का युक्ता॥ तेषु

भा॰ विषये भोक्तृत्वाशङ्का विज्ञानमात्रविषया वा कदाचिदुपपद्यते। ननु सङ्घात एवास्तु भोक्ता किं व्यतिरिक्तकल्पनयेति। नापेषणे विशेषदर्शनात्। यदि हि प्राणशरीरं सङ्घातमात्रो भोक्ता स्यात्सङ्घातमात्राविशेषात्सदा पिष्टस्यापिष्टस्य च प्रतिबोधे विशेषो न स्यात्। सङ्घातव्यतिरिक्ते तु पुनर्भोक्तरि सङ्घातसम्बन्धविशेषानेकत्वात्पेषणापेषणकृतवेदनायाः सुखदुःखमोहमध्यमाधमोत्तमकर्मफलभेदोपपत्तेश्च विशेषो युक्तो न तु

व्या॰ स्मृतिरूपध्यानस्येच्छाया योऽहंरूपमद्राक्षं स शब्दं शृणोमीत्यादिप्रतिसन्धानस्य चायोगादित्यर्थः॥ अनुपपत्तिमेव स्फुटयति॥ न हीति॥ क्षणिकविज्ञानस्य निराश्रयस्य भोक्तृत्वाशङ्कापि प्रतिसन्धानासम्भवादेव प्रयुक्तेत्याह। विज्ञानेति॥ प्राणादीनामनात्मत्वमुक्त्वा स्थूलदेहस्य तदुक्तुं पूर्वपक्षयति। नन्विति॥ सङ्घातो भूतचतुष्टयसमाहारः स्थूलो देह इति यावत्। गौरोऽहमश्नामीत्यादि प्रत्यक्षेण तस्यात्मत्वदृष्टेरिति भावः॥ प्रमाणाभावादतिरिक्तकल्पना न युक्तेत्याह। किं व्यतिरिक्तेति॥ सङ्घातस्यात्मत्वं दूषयति। नापेषण इति॥ विशेषदर्शनं व्यतिरेकद्वारा विशदयति। यदि हीति॥ प्राणेन सहितं स्थूलं शरीरमेव सङ्घातस्तन्मात्रो यदि भोक्ता स्यादिति योजना। त्वत्पक्षेऽपि कथं पेषणापेषणयोरुत्थाने विशेषः स्यादित्याशङ्क्याह। सङ्घातेति॥ तस्य सङ्घातेन सम्बन्धविशेषात्स्वकर्मारभ्यत्वादात्मात्मीयत्वस्वप्राणपरिपाल्यत्वादयस्तेषामनेकत्वात्पेषणापेषणयोरिन्द्रियोद्भवाभिभवकृतवेदनायाः स्फुटत्वास्फुटत्वात्मको विशेषो युक्तः। सुखदुःखमोहानामुत्तममध्यमाधमकर्मफलानां कर्मोद्भवाभिभवकृतविशेषसम्भवाच्च यथोक्तो विशेषः सम्भवतीत्यर्थः॥ परपक्षेऽपि तथैव विशेषः स्यादित्याशङ्क्याह। न त्विति॥ न हि तत्र स्वकर्मारभ्यत्वादयः सम्बन्धविशेषाः कर्मफलभेदो वा युज्यते।

भा० सङ्घातमात्रे सम्बन्धकर्मफलभेदानुपपत्तेर्विशेषो युक्तः ॥

तथा शब्दादिपटुमान्द्यादिकृतश्च । अस्ति चायं विशेषो यस्मात्स्पर्शमात्रेणाप्रतिबुध्यमानं पुरुषं सुप्तं पाणिना पेषमापिष्यापिष्य बोधयाञ्चकाराजातशत्रुः । तस्माद्य आपेषणेन प्रतिबुबुधे ज्वलन्निव स्फुरन्निव कुतश्चिदागत इव पिण्डञ्च पूर्व्वविपरीतं बोधचेष्टाकारविशेषादिमत्त्वेनापादयन् सोऽन्योऽस्ति गार्ग्याभिमतब्रह्मभ्यो व्यतिरिक्त इति सिद्धं । संहतत्वाच्च पारार्थ्योपपत्तिः प्राणस्य ॥ गृहस्य स्तम्भादिवच्छरीरस्यान्तरुपष्टम्भकः प्राणः शरीरादिभिः संहत इत्यवोचाम । आरनेमिवच्च नाभिस्थानीय एतस्मिन्सर्व्वमिति च । तस्माद्गृहादिवत्स्वावयवसमुदायजातीयव्यतिरिक्तार्थं संहन्यत इत्येवमव-

---

आ० सङ्घातवादिनाऽतीन्द्रियकर्म्मोऽनङ्गीकारात् । अतः सङ्घातमात्रे भोक्तरि प्रतिबोधे विशेषासिद्धिरित्यर्थः ॥

शब्दस्पर्शादीनां पटुत्वमतिपटुत्वं मान्द्यमतिमान्द्यमित्येवमादिना कृतो विशेषो बोधे दृश्यते। सोऽपि सङ्घातवादे न सिद्ध्यतीत्याशयेनाह । तथेति ॥ अयुक्त इति यावत् । चकारो विशेषानुकर्षार्थः। सा तर्हि प्रतिबोधे विशेषो भूदित्याशङ्क्याह। अस्ति चेति ॥ विशेषदर्शनफलमाह । तस्मादिति ॥ आदिशब्देन गुणादि गृह्यते । अन्यः सङ्घातादिति शेषः। देहादेरनात्मत्वमुक्ता प्राणस्यानात्मत्वे हेत्वन्तरमाह । संहतत्वाचेति ॥ हेतुं साधयति । गृहस्येति ॥ यथा नेमिररास्च मिथः संहन्यन्ते तथैव प्राणस्य संहतिरित्याह । अरनेमिवचेति ॥ किञ्च प्राणे नाभिस्थानीये सर्व्वमर्पितमिति श्रूयते तद्युक्तं तस्य संहतत्वमित्याह । नाभीति ॥ संहतत्वफलमाह । तस्मादिति ॥ प्राणस्य गृहादिवत्पारार्थ्येऽपि संहतशेषित्वमेषितव्यं गृहादे-

भा० गच्छेमहि। स्तम्भकुड्यघटकाष्ठादिदृश्यावयवानां स्वात्मजन्मोपचयापचयविनाशनामाकृतिकार्य्यधर्मनिरपेक्षलब्धसत्तादितद्विषयद्रष्टृश्रोतृमन्तृविज्ञात्रर्थत्वं दृष्टमन्यामहे तत्संघातस्य च। तथा प्राणाद्यवयवानां तत्संघातस्य च स्वात्मजन्मोपचयापचयविनाशनामाकृतिकार्य्यधर्मनिरपेक्षलब्धसत्तादितद्विषयद्रष्टृश्रोतृमन्तृविज्ञात्रर्थत्वं भवितुमर्हति। देवताचेतनावत्त्वे समत्वात् गुणाभावाऽनुपगम इति चेत्। प्राणस्य विशिष्टैर्नामभिरामन्त्रणदर्शनाच्चेतनावत्त्वमभ्युपगतं। चेतनावत्त्वे च पारार्थ्योपगमः समत्वादनुपपन्न इति चेन्न। निरुपाधिकस्य केवलस्य विजिज्ञापयिषितत्वात्क्रियाकारकफलात्मकता ह्यात्मनो नामरूपोपाधिजनिता विद्याध्यारोपिता। तन्निमित्तो लोकस्य क्रियाका-

---

व्या० स्तथा दर्शनादित्याशङ्क्याह। स्तम्भेति॥ स्वात्मना स्तम्भादीनां जन्मनोपचयस्यापचयस्य विनाशस्य नाम चाकृतिस्य कार्यञ्चेत्येते धर्मास्तन्निरपेक्षतया लब्धा सत्ता स्फुरणं येन स च तेषु स्तम्भादिषु विषयेषु द्रष्टा च श्रोता च मन्ता च विज्ञाता च तदर्थत्वं तेषां तत्सङ्घातस्य च दृष्टं प्राणादीनामपि तथात्वं भवितुमर्हतीति मन्यामहे इति सम्बन्धः। प्राणादिः स्वातिरिक्तं द्रष्टृशेषः। संहतत्वाद्गृहादिवदित्यनुमानात्सत्ताया तत्प्रतीतौ च प्राणादिविक्रियानपेक्षतया सिद्धो द्रष्टा निर्विकारो युक्तस्तस्य विकारवत्त्वे हेत्वभावादिति भावः। प्राणदेवतापारार्थ्यानुमानं व्याप्त्यन्तरविरुद्धमिति शङ्कते। देवतेति॥

प्राणदेवतायाश्चेतनत्वमेव कथमभ्युपगतं तत्राह। प्राणस्येति॥ तथापि प्रकृतेऽनुमाने कथं व्याप्त्यन्तरविरोधस्तत्राह। चेतनावत्त्वे चेति। यो येन समः स तच्छेषो न भवति। यथा दीपो दीपान्तरेण तुल्यो न तच्छेष इति व्याप्तिविरोधः स्यादित्यर्थः।

उ० विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मि-
ञ्छेते तानि यदा गृह्णात्यथ हैतत्पुरुषः स्वपिति

भा० मध्ये गृहीत्वा य एषोऽन्तर्मध्ये हृदये हृदयस्याकाशो य आकाशशब्देन पर एव स्व आत्मोच्यते तस्मिन्स्व आत्मन्याकाशे शेते स्वाभाविकेऽसांसारिके। न केवल आकाश एव श्रुत्यन्तरसामर्थ्यात्। सता सोम्य तदा सम्पन्नो भवतीति लिङ्गोपाधिसम्बन्धकृतं विशेषात्मस्वरूपमुत्सृज्याविशेषे स्वाभाविक आत्मन्येव केवले वर्त्तत इत्यभिप्रायः। यदा शरीरेन्द्रियाध्यक्षतामुत्सृजति तदाऽसौ स्वात्मनि वर्त्तत इति कथमवगम्यते नामप्रसिद्ध्या। कासौ नामप्रसिद्धिरित्याह। तानि वागादिविज्ञानानि यदा यस्मिन्काले गृह्णात्यादत्तेऽथ तदाह एतत्पुरुषः स्वपिति नाम एतन्नामास्य पुरुषस्य तदा प्रसिद्धं भवति गौणमेवास्य नाम भवति स्वमेवात्मानमपीत्यपि गच्छतीति स्वपितीत्युच्यते सत्यं

आ० य एषोऽन्तरिति प्रतीकमादाय व्याचष्टे। मध्य इति॥ आकाशशब्दस्य भूताकाशविषयत्वमाशङ्क्याकाशोऽर्थान्तरत्वादिव्यपदेशादिति न्यायेनाह। आकाशशब्देनेति॥ सद्रूपे ब्रह्मण्येव सुषुप्तस्य शयनं भूताकाशे तु न भवतीत्यत्र छान्दोग्यश्रुतिमाह। श्रुत्यन्तरेति॥ कीदृगत्र शयनं विवक्षितमित्याशङ्क्याह। लिङ्गेति॥ स्वापाधिकारे स्वाभाविकत्वं अविद्यामात्रसंमिश्रितत्वं सन्ततिं सम्पाद्य न विदुरित्यादि श्रुतेरिति द्रष्टव्यं। तानि यदेत्यादिवाक्यमाकाङ्क्षापूर्व्वकमादत्ते। यदेत्यादिना॥ विज्ञानानि तत्साधनानीत्येतत्। पुरुष इति प्रथमा षष्ठ्यर्थेऽतो वक्ष्यति। अस्य पुरुषस्येति॥ अश्वकर्णादिनाम्नो विशेषमाह। गौणमेवेति॥ गौणत्वं

उ॰ नाम तद्गृहीत एव प्राणो भवति गृहीता वाक् गृहीतञ्चक्षुर्गृहीतꣳ श्रोत्रं गृहीतं मनः ॥ १७ ॥

स यत्रैतत्स्वप्न्यया चरति ते हास्य लोकास्तदु-

भा॰ स्वपितीति। नाम प्रसिद्धात्मनः संसारधर्म्मविलक्षणं रूपमवगम्यते। न त्वत्र युक्तिरस्तीत्याशङ्क्याह। तत्तत्र स्वापकाले गृहीत एव प्राणो भवति। प्राण इति घ्राणेन्द्रियं वागादिप्रकरणाद्वागादिसम्बन्धे हि सति तदुपाधित्वादस्य संसारधर्म्मित्वं लक्ष्यते। वागादयश्चोपसंहृता एव। तदा तेन कथं गृहीता वाक् गृहीतञ्चक्षुर्गृहीतं श्रोत्रं गृहीतं मनस्तस्मादुपसंहृतेषु वागादिषु क्रियाकारकफलात्मताभावात्स्वात्मस्थ एवात्मा भवतीत्यवगम्यते ॥ १७ ॥

ननु दर्शनलक्षणायां स्वप्नावस्थायां कार्य्यकरणवियोगेऽपि संसारधर्म्मित्वमस्य दृश्यते। यथा च जागरिते सुखी दुःखी बन्धुवियुक्तः शोचति मुह्यते च। तस्माच्छोक

व्या॰ व्युत्पादयति ॥ स्वमेवेति। नाम्नोऽर्थव्यभिचारस्यापि दृष्टत्वान्न तदबलात्स्वापे स्वरूपेऽवस्थानमिति शङ्कामनूद्य तद्गृहीत एवेत्यादि वाक्यमुत्थाप्य व्याचष्टे। सत्यमित्यादिना ॥ का पुनरात्मनः स्वापावस्था यामसंसारिस्वरूपेऽवस्थानमित्यत्र युक्तिरित्येताका भवति तत्राह। वागादीति ॥ तदा सुषुप्त्यवस्थाया तेनात्मनोऽचैतन्याभासेन हेतुनेत्यर्थः। स्वापे करणोपसंहारं विवृणोति। कथमित्यादिना ॥ तदुपसंहारफलं कथयति। तस्मादिति ॥ १७ ॥

अन्वयव्यतिरेकाभ्यां वागाद्युपाधिकमात्मनः संसारित्वमुक्तं तत्र व्यतिरेकासिद्धिमाशङ्कते। नन्विति ॥ व्यतिरेकासिद्धौ फलितमाह। तस्मादिति ॥ स्वप्नस्य रज्जुसर्पवन्मिथ्यात्वेन वस्तुधर्म्मत्वा-

उ० तेव महाराजो भवत्युतेव महाब्राह्मण उतेवोच्चा-
वचं निगच्छति

भा० मोहधर्म्मवानेवायं। नास्य शोकमोहादयः सुखदुःखाद-
यश्च कार्य्यकरणसंयोगजनितभ्रान्त्यध्यारोपिता इति न
मृषात्वात्स्म प्रहत आत्मा। यत्र यस्मिन्काले दर्शनलक्षणया
स्वप्नयया स्वप्नवृत्त्या चरति वर्त्तते तदा ते ह अस्य लोकाः
कर्म्मफलानि। के ते। तत्तत्र उत अपि महाराज इव भवति।
सोऽयं महाराजत्वमिवास्य लोको न महाराजत्वमेव
जागरित इव। तथा महाब्राह्मण इव। उत इव अपि
उ ावचं उच्चञ्च देवताद्यवचञ्च तिर्य्यक्कादि उच्चमिवावच-
मिव च निगच्छति मृषैव महाराजत्वादयोऽस्य लोका
इव शब्दप्रयोगाद्व्यभिचारदर्शनाच्च। तस्मान्न बन्धुवियोगा-
दिजनितशोकमोहादिभिः स्वप्ने सम्बध्यत एव। ननु च
यथा जागरिते जाग्रत्कालाव्यभिचारिणो लोका एवं
स्वप्नेऽपि तेऽस्य महाराजत्वादयो लोकाः स्वप्नकालभा-
विनः स्वप्नकालाव्यभिचारिण आत्मभूता एव। न त्वविद्या-

आ० भावान्नात्मनः संसारित्वमित्युत्तरमाह। न मृषात्वादिति॥ तदुप-
पादयन्नादौ स यत्रेत्यादीन्यक्षराणि योजयति। सम्प्रहत इत्या-
दिना॥ अथात्र स्वप्नस्वभावो निर्द्दिश्यते न तस्य मिथ्यात्वं कथ्यते
तत्राह। मृषैवेति॥ स्वप्ने दृष्टानां महाराजत्वादीनां जाग्रद-
नुवृत्तिराहित्यं व्यभिचारदर्शनं। स्वप्नस्य मिथ्यात्वे सिद्धमर्थ-
माह। तस्मादिति॥ विमता लोका न मिथ्या तत्कालव्यभि-
चारित्वाज्जाग्रल्लोकवदिति शङ्कते। ननु यथेति॥ साध्यवैकल्यं

उ० स यथा महाराजो जानपदान् गृहीत्वा स्वे जन-

भा० ध्यारोपिता इति। ननु च जाग्रत्कार्य्यकरणात्मत्वं देवतात्मत्वञ्चाविद्याध्यारोपितं न परमार्थ इति व्यतिरिक्तविज्ञानमयात्मप्रदर्शनेन दर्शितं। तत्कथं दृष्टान्तत्वेन स्वप्नलोकस्य म्नत इवोज्जीविष्यन्प्रादुर्भविष्यति। सत्यं। विज्ञानमये व्यतिरिक्ते कार्य्यकरणदेवतात्मत्वप्रदर्शनमविद्याध्यारोपितं शुक्तिकायामिव रजतत्वदर्शनमित्येतत्सिध्यति व्यतिरिक्तात्मास्तित्वप्रदर्शनन्यायेनैव। न तु तद्विशुद्धिपरतयैव न्याय उक्त इति। असन्नपि दृष्टान्तो जाग्रत्कार्य्यकरणदेवतात्मत्वदर्शनलक्षणं पुनरुच्याप्यते। सर्व्वो हि न्यायः किञ्चिद्विशेषमपेक्ष्यमाणोऽपुनरुक्तीभवति।

न तावत्स्वप्ने अनुभूतमहाराजत्वादयो लोका आत्म-

व्या० वक्तुं सिद्धान्ती पाणिपेषवाक्योक्तं स्मारयति। ननु चेति॥ जाग्रल्लोकस्य मिथ्यात्वे फलितमाह। तत्कथमिति॥ प्रादुर्भावे जाग्रल्लोकस्य कर्तृत्वं प्राकरणिकमेष्टव्यं। तत्र पूर्व्ववादी दृष्टान्तं साधयति। सत्यमित्यादिना॥ अन्वयव्यतिरेकाख्यो न्यायः। देहद्वयस्य ह्यात्मनश्च विवेकमात्रं प्रागुक्तं। ननु प्राधान्येनात्मनः शुद्धिरुक्तेति विभागमङ्गीकृत्य वस्तुतोऽसन्तमपि दृष्टान्तं सन्तं कृत्वा तेन स्वप्नसत्यत्वमाशङ्क्य तन्निरासेनात्यन्तिकी शुद्धिरात्मनः स्वप्नवाक्येनोच्यते। तथा जाग्रतोऽपि तथा मिथ्यात्वादात्मैकरसः शुद्धः स्यादित्याशयवानाह। इत्यसन्नपीति॥ पाणिपेषवाक्ये जाग्रन्मिथ्यात्वोक्त्यर्थादुक्ता शुद्धिरत्रापि सैवोच्यते चेत्पुनरुक्तिरित्याशङ्क्याह। सर्व्वो हीति॥

यत्किञ्चित्सामान्यात्पौनरुक्त्यं सर्व्वत्र तुल्यं अवान्तरभेदादपौनरुक्त्यं। प्रकृतेऽपि समं पूर्व्वत्र शुद्धिदारुण्यार्थिकत्वादिह

उ॰ पदे यथाकामं परिवेर्त्ततैव मे वैष एतत्प्राणान्

भा॰ भूता आत्मनोऽन्यस्य जाग्रत्प्रतिबिम्बभूतस्य लोकस्य दर्श-
नान्महाराज एव तावद्भृत्यसुप्तासु प्रकृतिषु पर्य्यङ्के
शयानः स्वप्नान्पश्यन्नुपसंहृतकरणः पुनरुपगतप्रकृतिं महा-
राजमिवात्मानं जागरित इव पश्यति। यात्रागतं भुञ्जा-
नमिव च भोगान्। न च तस्य महाराजस्य पर्य्यङ्के शयाना-
द्द्वितीयो ऽन्यः प्रकृत्युपेतो विषये पर्य्यटन्नहनि लोके प्रसि-
द्धोऽस्ति यमसौ सुप्तः पश्यति। न चोपसंहृतकरणस्य रूपा-
दिमतो दर्शनमुपपद्यते। न च देहे देहान्तरस्य तत्तुल्यस्य
सम्भवोऽस्ति। देहस्थस्यैव हि स्वप्नप्रदर्शनं। ननु पर्य्यङ्के शयानः
पथि प्रवृत्तमात्मानं पश्यति न बहिः स्वप्नान् पश्यति
इत्येतदाह। स महाराजो जानपदान् जनपदे भवान्
राजोपकरणभूतान् भृत्यानन्यांश्च गृहीत्वोपादाय स्वे
आत्मीय एव जयादिनोपार्ज्जिते जनपदे यथाकामं यो
यः कामोऽस्य यथाकाममिच्छातो यथा परिवर्त्ततेत्यर्थः।

आ॰ वाचनिकत्वादिति भावः। जाग्रद्दृष्टान्तेन स्वप्नसत्यत्वचोद्यस-
म्भवादाद्यस्तस्य समाधिरिति पूर्व्ववादिमुखेनोक्त्वा समाधिमधुना
कथयति। न तावदिति॥ विमता न द्रष्टुरात्मनो धर्म्मा वा
तद्दृश्यत्वाद्घटादिवदित्यर्थः। किञ्च स्वप्नदृष्टानां जाग्रद्दृष्टादर्थान्तर-
त्वेन दृष्टेर्मिथ्यात्वमित्याह। महाराज इति॥ तेषां जाग्रद्दृष्टा-
दर्थान्तरत्वमसिद्धमित्याशङ्क्याह। न चेति॥ प्रमाणसामग्र्यभा-
वाच्च स्वप्नस्य मिथ्यात्वमित्याह। न चेति॥ योग्यदेशाभावाच्च तन्मि-
थ्यात्वमित्याह। न चेति॥ देहाद्बहिरेव स्वप्नदृष्टाङ्गीकाराद्योग्यदेश

उ॰ गृहीत्वा स्वे शरीरे यथाकामं परिवर्त्तते ॥१८॥

भा॰ एवमेव एष विज्ञानमय एतदिति क्रियाविशेषणं। प्राणान् गृहीत्वा जागरितस्थानेभ्यः उपसंहृत्य स्वे शरीरे स्व एव देहे न बहिर्यथाकामं परिवर्त्तते। कामकर्म्माभ्यामुद्भासिता पूर्व्वानुभूतवस्तुसदृशी वासना अनुभवतीत्यर्थः। तस्मात्स्वप्ने मृषाध्यारोपिता एवात्मभूतत्वेन लोका अविद्यमाना एव सन्तस्तथा जागरितेऽपीति प्रत्येतव्यं। तस्माद्विशुद्धोऽक्रियाकारकफलात्मको विज्ञानमय इत्येतत्सिद्धं यस्माद्दृश्यन्ते द्रष्टुर्विषयभूताः क्रियाकारकफलात्मकाः कार्य्यकरणलक्षणा लौकिकास्तथा स्वप्नेऽपि। तस्मादन्योऽसौ दृश्येभ्यः स्वप्नजागरितलोकेभ्यो द्रष्टा विज्ञानमयो विशुद्धः ॥ १८ ॥

व्या॰ सिद्धिरित्याशङ्क्याह। देहस्यस्येति॥ एतदेव साधयितुं शङ्कयति। नन्विति॥ तत्र स यथेत्यादिवाक्यमुत्तरत्वेनावतार्य्य व्याचष्टे। न बहिरित्यादिना॥ यथाकामं तं तमनतिक्रम्येत्यर्थः। एतदिति क्रियाया ग्रहणस्य विशेषणमेतद्ग्रहणं यथा तथेत्यर्थः। परिवर्त्तनमेव विवृणोति। कामेति॥ योग्यदेशाभावे सिद्धे सिद्धमर्थं दर्शयति। तस्मादिति। स्वप्नस्य मिथ्यात्वे तद्दृष्टान्तत्वेन जडत्वादिहेतुना जागरितस्यापि तथात्वं शक्यं निश्चेतुमित्याह। तथेति॥ द्वयोर्मिथ्यात्वे प्रतीचो विशुद्धिः सिद्धेत्युपसंहरति। तस्मादिति॥ अक्रियाकारकफलात्मक इति विशेषणं समर्थयते। यस्मादिति॥ जागरितं दृष्टान्तीकृत्य दार्ष्टान्तिकमाह। तथेति॥ दृग्दृश्याभावे फलितमाह। तस्मादिति॥ अन्यत्वफलं कथयति। विशुद्ध इति॥ १८॥

उ० अथ यदा सुषुप्तो भवति यदा न कस्यचन

भा० दर्शनवृत्तौ स्वप्ने वासनाराशेर्दृश्यत्वादतद्धर्मतेति विशुद्धताऽवगता। आत्मनस्तत्र यथाकामं परिवर्त्तत इति कामवशात्परिवर्त्तनमुक्तं॥ इष्टदृश्यसम्बन्धस्यास्य स्वाभाविक इत्यशुद्धता शङ्क्यतेऽतस्तद्विशुद्ध्यर्थमाह। अथ यदा सुषुप्तो भवति यदा स्वप्न्यया चरति तदाप्ययं विशुद्ध एवाथ पुनर्यदा हित्वा दर्शनवृत्तिं स्वप्नं यदा यस्मिन्काले सुषुप्तः सुष्ठु सुप्तः सं प्रसादं स्वाभाव्यं गतो भवति सलिलमिवान्यसम्बन्धकालुष्यं हित्वा स्वाभाव्येन प्रसीदति। कदा सुषुप्तो भवति। यदा यस्मिन्काले न कस्यचन न किञ्चनेत्यर्थो वेद विजानाति कस्यचन वा शब्दादेः सम्बन्धिवस्त्वन्तरं किञ्चन न वेदेत्यध्याहार्य्यं। पूर्व्वन्तु न्याय्यं सुप्ते तु विशेषज्ञानाभावस्य विवक्षितत्वादेवं तावद्विशेषविज्ञानाभावे सुषुप्तो भवतीत्युक्तं। केन पुनः क्रमेण सुषुप्तो भवतीत्युच्यते हिता नाम हितफलप्राप्तिनिमित्तत्वान्नाड्यो हिता उच्यन्ते हिता इत्येवं नाम्न्यो नाड्यः शिरो देहस्यान्नरसविपरिणामभूता-

आ० वृत्तानुवादपूर्व्वकं उत्तरश्रुतिनिरस्यामाशङ्कामाह। दर्शनवृत्तावित्यादिना। तत्रेति स्वप्नोक्तिः। कामादिसम्बन्धस्वकारार्थः। निवर्त्त्य शङ्कासद्भावान्निवर्त्तकान्तरश्रुतिं प्रतिजानीते। अत इति। स्वप्नेऽपि शुद्धिरुक्ता किं सुषुप्तिग्रहेणेत्याशङ्क्याह। यदेति। गतो भवति तदा सुतरामस्य शुद्धिः सिध्यतीति शेषः॥ तमेकं सुषुप्तिकालं प्रश्नपूर्व्वकं प्रकटयति। कदेति॥ विकल्पं व्यावर्त्तयति। पूर्व्वन्त्विति। वृत्तमनूद्य प्रश्नपूर्व्वकं सुषुप्तिगतिप्रकारं दर्शयति।

उ॰ वेद हिता नाम नाड्यो द्वा सप्ततिसहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य

भा॰ ताश्च द्वासप्ततिसहस्राणि द्वे सहस्रेऽधिके सप्ततिश्च सहस्राणि ता द्वासप्ततिसहस्राणि नाडीनां हृदयाद्धृदयन्नाम मांसपिण्डस्तस्मान्मांसपिण्डात्पुण्डरीकाकारात् पुरीततं हृदयपरिवेष्टनमाचक्षते तदुपलक्षितं शरीरमिह पुरीतच्छब्देनाभिप्रेतं पुरीततमभिप्रतिष्ठन्त इति शरीरं कृत्स्नं व्याप्नुवन्त्योऽश्वत्थपर्णराजय इव बहिर्मुखाः प्रवृत्ता इत्यर्थः ।

तत्र बुद्धेरन्तःकरणस्य हृदयं स्थानं तत्र बुद्धितन्त्राणि चेतराणि बाह्याणि करणानि तेन बुद्धिः कर्म्मवशाच्छ्रोत्रादीनि ताभिर्नाडीभिर्मत्स्यजालवत्कर्णशष्कुल्यादिस्थानेभ्यः प्रसारयति प्रसार्य्य चाधितिष्ठति जागरितकाले तां विज्ञानमयोऽभिव्यक्तस्वात्मचैतन्यावभासतया व्याप्नोति सङ्कोचनकाले च तस्या अनुसङ्कुचति । सोऽस्य विज्ञानम-

व्या॰ एवं तावदिति ॥ हितफलप्राप्तिनिमित्तत्वान्नाड्यो हिता उच्यन्ते ॥ तासां देहसम्बद्धानामन्वयव्यतिरेकाभ्यामन्नरसविकारत्वमाह । यन्नेति ॥ तासामेव मध्यमसङ्ख्यां कथयति । ताश्चेति ॥ तासाञ्च हृदयसम्बन्धिनीनां ततो निर्गत्य देहव्याप्त्या बहिर्मुखत्वमाह हृदयादिति ॥ ताभिरित्यादि व्याकर्त्तुं भूमिकां करोति । तत्रेति । शरीरं सामर्थ्यं । शरीरे करणानां बुद्धितन्त्रत्वे किं स्यात्तदाह । तेनेति ॥ तथापि जीवस्य किमायातमित्याशङ्क्याह । तां विज्ञानमय इति ॥ भोगशब्दो जागरविषयः ॥ बुद्धिविकासमनु-

उ० पुरीतति शेते स यथा कुमारो वा महाराजो

आ० यस्य स्वापो जाग्रद्विक्षेपानुभवो भोगो बुद्ध्युपाधिस्वभावानुविधायी हि सः। चन्द्रादिप्रतिबिम्ब इव जलाद्यनुविधायी। तस्मात्तस्या बुद्धेर्जाग्रद्विषया यास्ताभिस्ताभिर्नाडीभिः प्रत्यवसर्पणमनुप्रत्यवसृप्य पुरीतति शरीरे शेते तिष्ठति तप्तमिव लोहपिण्डमविशेषेण संव्याप्याग्निवच्छरीरं संव्याप्य वर्त्तत इत्यर्थः। स्वाभाविक एव स्वात्मनि वर्त्तमानोऽपि कर्म्मानुगतबुद्ध्यनुवृत्तित्वात्पुरीतति शेत इत्युच्यते। न हि सुषुप्तिकाले शरीरसम्बन्धोऽस्ति। तीर्णो हि तदा सर्व्वाञ्छोकान्हृदयस्येति वक्ष्यति। सर्व्वसंसारदुःखवियुक्तेयमवस्थेत्यत्र दृष्टान्तः। स यथा कुमारो वात्यन्तबालो वा महाराजो वात्यन्तवश्यप्रकृतिर्यथोक्तकृन्महाब्राह्मणो वात्यन्तपरिपक्वविद्याविनयसम्पन्नोऽतिघ्नीमतिशयेन दुःखं हन्तीत्यतिघ्नी आनन्दस्यावस्था सुखावस्था तां प्राप्य गत्वा शयीतावतिष्ठेत। एषाञ्च कुमारादीनां स्वभावस्थानां सुखं निरतिशयं प्रसिद्धं लोके विक्रियमाणानां हि तेषां दुःखं न

आ० भवन्नात्मा जागर्त्तीत्युच्यते॥ तत्सङ्कोचमनुभवन्स्वपितीत्यत्र हेतुमाह। बुद्धीति॥ बुद्ध्यानुविधायित्वं परामृश्य ताभिरित्यादि व्याचष्टे। तस्मादिति॥ प्रत्यवसर्पणं व्यावर्त्तनं॥ पदार्थमुक्त्वा वाक्यार्थमाह। तप्तमिवेति॥ कर्म्मत्वे देहस्य कर्तृत्वे चात्मनो दृष्टान्तद्वयं हृदयाकाशे ब्रह्मणि शेते॥ विज्ञानात्मेत्युक्त्वा पुरीततिशयनमाचक्षाणस्य पूर्व्वापरविरोधः स्यादित्याशङ्क्याह। स्वाभाविक इति॥ औपचारिकमिदं वचनमित्यत्र हेतुमाह। नहीति॥ इयमवस्थेति

उ० वा महाब्राह्मणो वातिघ्नीमानन्दस्य गत्वा शयी तेवमेवैष एतच्छेते ॥१९॥

भा० स्वभावस्तेन तेषां स्वाभाविक्यवस्था दृष्टान्तत्वेनोपादीयते प्रसिद्धत्वात्। न तेषां स्वाप एवाभिप्रेतः। स्वापस्य दार्ष्टान्तिकत्वेन विवक्षितत्वाद्विशेषाभावाच्च। विशेषे हि सति दृष्टान्तदार्ष्टान्तिकभेदः स्यात्तस्मान्न तेषां स्वापो दृष्टान्तः। एवमेव यथायं दृष्टान्त एष विज्ञानमय एतच्छयनं शेत दृत्येतच्छब्दः क्रियाविशेषणार्थः। एवमयं स्वाभाविके स्व आत्मनि सर्व्वसंसारधर्म्मातीतो वर्त्तते स्वापकाल दृति ॥ १९ ॥

क्वैष तदाभूदित्यस्य प्रश्नस्य प्रतिवचनमुक्तमनेन च प्रश्ननिर्णयेन विज्ञानमयस्य स्वभावतो विशुद्धिरसंसारित्व-ञ्चोक्तं। कुत एतदागादित्यस्य प्रश्नस्यापाकरणार्थ आरम्भः। ननु यस्मिन् ग्रामे नगरे वा यो भवति सोऽन्यत्र गच्छं-

व्या० प्रकृता सुषुप्तिरुच्यते। उक्तेषु दृष्टान्तेषु विवक्षितमंशं दर्शयति स्वभावेति॥ दुःखमपि तेषां प्रसिद्धमित्याशङ्क्याह॥ विक्रियमाणाना मीति॥ कुमारादिस्वापस्यैव दृष्टान्तत्वं किं न स्यादित्याशङ्क्याह। न तेषामिति॥ स्वापस्य दृष्टान्तत्वमसत्स्वापस्य दार्ष्टान्तिकत्वमिति विभागमाशङ्क्याह। विशेषाभावादिति॥ क्वैष तदाभूदिति प्रश्न-स्योत्तरमुपपादितमुपसंहरति। एवमिति ॥ १९ ॥

स यथेत्यादेः सङ्गतिं वक्तुं वृत्तं सङ्कीर्त्तयति। क्वैष इति॥ किं पुनराद्यप्रश्ननिर्णयेन फलमिति त्वंपदार्थशुद्धिरित्याह। अनेनेति॥ शुद्धिद्वारा प्रधानस्य तस्योक्तिमाह। असंसारित्व-ञ्चेति॥ उत्तरग्रन्थस्य तात्पर्य्यमाह। कुत इति॥ पूर्व्वोक्तस्य गता-

भा० त्तत एव ग्रामान्नगराद्वा गच्छति नान्यतः। तथा सति क्वैष तदाभूदित्येतावानेवास्तु प्रश्नो यत्राभूत्तत एवागमनं प्रसिद्धं स्यान्नान्यत इति। कुत एतदागादिति प्रश्नो निरर्थक एव किं श्रुतिरुपालभ्यते भवता न किं तर्हि द्वितीयस्य प्रश्नस्यार्थान्तरं श्रोतुमिच्छाम्यत आनर्थक्यं चोदयामि। एवन्तर्हि कुत इत्यपादानार्थता न गृह्यते ऽपादानार्थत्वे हि पुनरुक्तता नान्यार्थत्वेऽस्तु तर्हि निमित्तार्थः प्रश्नः कुत एतदागात्किं निमित्तमिहागमनमिति। न निमित्तार्थतापि प्रतिवचनवैरूप्यादात्मनस्स सर्व्वस्य जगतोऽग्निविस्फुलिङ्गादिवदुत्पत्तिः प्रतिवचने श्रूयते। न हि विस्फुलिङ्गानां विद्रवणेऽग्निर्निमित्तमपादानमेव तु सः। तथा परमात्मा विज्ञानमयस्यात्मनोऽपादानत्वेन श्रूयते ऽस्मादात्मन इत्येतस्मिन्वाक्ये। तस्मात्प्रतिवचने वैलोम्यात्कुत इति प्रश्नस्य निमि-

---

आ० र्थत्वं शङ्कते। नन्विति॥ स्थित्यवधेरेव निर्धारितत्वादगत्यवधेर्निर्द्धिधारयिषया प्रश्ने प्रतिवचनं सावकाशमित्याशङ्क्याह। तथा सतीति॥ अपौरुषेयी श्रुतिरशेषदोषशून्यत्वादनतिशङ्कनीयेति सिद्धान्ती गूढाभिसन्धिराह। किं श्रुतिरिति॥ न श्रुतिराक्षिप्यते निर्दोषत्वादिति पूर्व्ववाद्याह। नेति॥ श्रुतेरनापेक्षत्वे त्वदीयश्चोद्यं निरवकाशमित्याह। किन्तर्हीति॥ तस्य सावकाशत्वं पूर्व्ववादी साधयति। द्वितीयस्येति॥ पूर्व्ववादिन्यपादानादर्थान्तरे पञ्चम्याः शुश्रूषमाणे सत्येकदेशी ब्रवीति। एवं तर्हीति॥ कथमन्यार्थत्वं तदाह। अस्त्विति॥ तर्हि तस्यामपादानार्थत्वेन पुनरुक्तत्वावस्थायामित्यर्थः एकदेशिनं पूर्व्ववादी दूषयति नेति॥ अपादानार्थत्वावदित्यपेरर्थः॥ तदेव स्फुटयति। आत्मनश्चेति॥ जगतः सर्व्वस्य चेतनस्याचेतनस्य चेति वक्तुं च शब्दः। तर्हि

भा० न्तार्थता न शक्यते वर्णयितुं। नन्वपादानपक्षेऽपि पुनरुक्ततादोषः स्थित एव। नैष दोषः। प्रश्नाभ्यामात्मनि क्रियाकारकफलात्मतापोहस्य विवक्षितत्वात्। इह हि विद्याऽविद्याविषयावुपन्यस्तौ। आत्मेत्येवोपासीत आत्मानमेवावेत् आत्मानमेव लोकमुपासीतेति विद्याविषयस्तथाऽविद्याविषयश्च पाङ्क्तं कर्म्म तत्फलञ्चान्नत्रयं नामरूपकर्म्मात्मकमिति। तत्राविद्याविषये वक्तव्यं सर्व्वमुक्तं। विद्याविषयस्त्वात्मा केवल उपन्यस्तो निर्णीतः।

तन्निर्णयाय च ब्रह्म ते ब्रवाणीति प्रक्रान्तं। ज्ञपयिष्यामीति च। अतस्तद्ब्रह्मविद्याविषयभूतं ज्ञापयितव्यं याथात्म्यतः। तस्य च याथात्म्यं क्रियाकारकफलभेदशून्यमत्यन्तविशुद्धमद्वैतमित्येतद्विवक्षितं। अतस्तदनुरूपौ प्रश्नावुत्थापितौ श्रुत्या क्वैष तदाभूत्कुत एतदागादिति। तत्र यत्र भवति तदधिकरणं यद्भवति तदधिकर्त्तव्यं तयोश्चाधि-

---

व्या० भवत्वपादानार्था पञ्चमीत्याशङ्क्य पूर्व्ववादी पूर्व्वोक्तं स्मारयति। नन्विति॥ सर्व्वा विद्या तज्जा निर्मुक्तं प्रत्यगद्वयं ब्रह्म प्रश्नद्वयव्याजेन प्रतिपिपादयिषितमिति न पुनरुक्तिरिति सिद्धान्ती स्वाभिसन्धिमुद्घाटयति। नैष दोष इति॥ यथोक्तं वस्तुप्रश्नाभ्यां विवक्षितमिति कुतो ज्ञानमित्याशङ्क्य तदुक्तं तार्त्तीयमर्थमनुवदति। इह हीति॥

विद्याविषयनिर्णयस्य कर्त्तव्यत्वमत्र न प्रतिभातीत्याशङ्क्याह तन्निर्णयाय चेति॥ अन्यथा प्रक्रमभङ्गः स्यादिति भावः। किं तद्याथात्म्यं तदाह। तस्य चेति॥ कथं यथोक्तयाथात्म्यव्याख्यानोपयोगित्वं प्रश्नयोरित्याशङ्क्य तयोः श्रौतमर्थमाह। तत्रेति॥ प्रश्नप्रवृत्तिमुक्त्वा प्रतिवचनप्रवृत्तिमाह। सेति॥ निवर्त्तयितव्येति तत्प्रह-

उ० स यथोर्णनाभिस्तन्तुनोच्चरेद्यथाग्नेः क्षुद्रा

भा० करणाधिकर्त्तव्ययोर्भेदो दृष्टो लोके । तथा यत आगच्छति तदपादानं । य आगच्छति स कर्त्ता । तस्मादन्यो दृष्टस्तथात्मा ह्याप्यभूदन्यस्मिन्नन्यः । कुतश्चिदागादन्यस्मादन्यः । केनचिद्भिन्नेन साधनान्तरेणेत्येवं लोकवदात्मा बुद्धिः सा प्रतिवचनेन निवर्त्तयितव्येति । नायमात्मान्यो ऽन्यत्राभूदन्यो वान्यस्मादागतः साधनान्तरं वात्मन्यस्ति । किं तर्हि स्वात्मन्येवाभूत्स्वमात्मानमपीतो भवति स्वता- सोम्य तदासम्पन्नो भवति प्राज्ञेनात्मना संपरिष्वक्तः पर आत्मनि संप्रतिष्ठेत इत्यादिश्रुतिभ्योऽत एव नान्योऽन्यस्मादागच्छति । तच्छ्रुत्यैव प्रदर्श्यतेऽस्मादात्मन इत्यात्मव्यतिरेकेण वस्त्वन्तराभावात् । न त्वस्ति प्राणाद्यात्मव्यतिरिक्तं वस्त्वन्तरं न प्राणादेस्तत एव निष्पत्तेः । तत्कथमित्युच्यते तत्र दृष्टान्तः स यथा लोके ऊर्णनाभिः ऊर्णनाभिलूताकीट एक एव प्रसिद्धः सन्स्वात्मा

व्या० त्तिरिति शेषः । सम्प्रतिप्रत्तिवचनयोस्तात्पर्य्यमाह । नायमिति ॥ स्वात्मन्येवाभूदित्यत्र प्रमाणमाह । स्वात्मानमिति ॥ सुषुप्तौ स्वात्मव्यवस्थितिरतः शब्दार्थः प्रबोधदशायामात्मन एवागमनामादानत्वमित्यत्र मानत्वेनानन्तरश्रुतिमुत्थापयति । तच्छ्रुत्यैवेति ॥ स्थित्यागत्योरात्मन एवावधित्वमित्यत्रोपपत्तिमाह । आत्मेति ॥ वस्त्वन्तराभावत्वस्यासिद्धिं शङ्कित्वा दूषयति । नन्वित्यादिना ॥

क्रियावतो मृदादेर्घटाद्युत्पत्तिदर्शनाद्ब्रह्मणोऽक्रियात्वात्ततो न प्राणाद्युत्पत्तिरिति शङ्कते । तत्कथमिति ॥ स्वष्टेर्मायामयत्वमाश्रित्य श्रुत्या परिहरति । उच्यत इति ॥ स्वात्मा प्रविभक्तेनेत्युक्तमन्वय-

उ॰ विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति तस्योपनिषत्सत्यस्य सत्यमिति प्राणा

भा॰ प्रविभक्तेन तन्तुना उच्चरेदुद्गच्छेन्नचास्ति तस्योद्गमने स्वतोऽतिरिक्तं कारकान्तरं । यथा चैकरूपादेकस्मादग्नेः क्षुद्रा अल्पा विस्फुलिङ्गास्त्रुटयोऽग्न्यवयवा व्युच्चरन्ति विविधं नाना वोच्चरन्ति। यथेमौ दृष्टान्तौ कारकभेदाभावेऽपि प्रवृत्तिं दर्शयतः। प्राक्प्रवृत्तेश्च स्वभावत एकत्वमेवमेवास्मादात्मनो विज्ञानमयस्य प्राक्प्रतिबोधाद्यत्स्वरूपं तस्मादित्यर्थः। सर्व्वे प्राणा वागादयः सर्व्वे लोकाः सर्व्वाणि कर्म्मफलानि सर्व्वे देवाः प्राणलोका अधिष्ठातारोऽग्न्यादयः सर्व्वाणि भूतानि ब्रह्मादिस्तम्बपर्य्यन्तानि प्राणिजातानि सर्व्व एत आत्मन इत्यस्मिन्पाठे उपाधिसम्पर्कजनितप्रबुध्यमानविशेषात्मान इत्यर्थे व्युच्चरन्ति। यस्मादात्मनः स्थावरं जङ्गमं जगदिदमग्निविस्फुलिङ्गवद्व्युच्चरत्यनिशं यस्मिन्नेव च प्रलीयते जलबुद्बुदवद्यदात्मकं च वर्त्तते स्थितिकाले तस्यास्यात्मनो ब्रह्मण उपनिषत् उपसमीपं निगमयतीत्यभिधायकः शब्द

व्या॰ व्यतिरेकद्वारा स्फोरयति । न चेति ॥ असहायस्य कारणत्वे दृष्टान्तमुक्त्वा कूटस्थस्य सद्भावे दृष्टान्तमाह । यथा चेति ॥ माध्यन्दिनश्रुतिमाश्रित्याह । सर्व्व एत इति ॥ तस्येत्याद्यवतार्य्य व्याचष्टे । यस्मादित्यादिना ॥ ननु प्रत्यग्भूतस्य ब्रह्मणो वाचकेषु शब्दान्तरे-

उ० स यथोर्णनाभिस्तन्तुनोच्चरेद्यथाग्नेः क्षुद्रा

भा०करणाधिकर्त्तव्ययोर्भेदो दृष्टो लोके । तथा यत आगच्छति तदपादानं। य आगच्छति स कर्त्ता। तस्मादन्यो दृष्टस्तथात्मा क्वाप्यभूदन्यस्मिन्नन्यः। कुतश्चिदागादन्यस्मादन्यः। केनचिद्भिन्नेन साधनान्तरेणेत्येवं लोकवत्प्राप्ता बुद्धिः सा प्रतिवचनेन निवर्त्तयितव्येति । नायमात्मान्योऽन्यत्राभूदन्यो वान्यस्मादागतः साधनान्तरं वात्मन्यस्ति। किं तर्हि स्वात्मन्येवाभूत्स्वमात्मानमपीतो भवति सता सोम्य तदासम्पन्नो भवति प्राज्ञेनात्मना संपरिष्वक्तः पर आत्मनि संप्रतिष्ठत इत्यादिश्रुतिभ्योऽत एव नान्योऽन्यस्मादागच्छति। तच्छ्रुत्यैव प्रदर्श्यतेऽस्मादात्मन इत्यात्मव्यतिरेकेण वस्त्वन्तराभावात् । न त्वस्ति प्राणाद्यात्मव्यतिरिक्तं वस्त्वन्तरं न प्राणादेस्तत एव निष्पत्तेः । तत्कथमित्युच्यते तत्र दृष्टान्तः स यथा लोके ऊर्णनाभिः ऊर्णनाभिलूताकीट एक एव प्रसिद्धः सन्स्वात्मा

व्या० त्तिरिति शेषः। सम्प्रतिपत्तिवचनयोस्तात्पर्य्यमाह । नायमिति ॥ स्वात्मन्येवाभूदित्यत्र प्रमाणमाह । स्वात्मानमिति ॥ सुषुप्तौ स्वात्मव्यवस्थितिरतः शब्दार्थः प्रबोधदशायामात्मन एवागमनापादानत्वमित्यत्र मानत्वेनानन्तरश्रुतिमुत्थापयति। तच्छ्रुत्यैवेति ॥ स्थित्यागत्योरात्मन एवावधित्वमित्यत्रोपपत्तिमाह। आत्मेति ॥ वस्त्वन्तराभावत्वस्यासिद्धिं शङ्कित्वा दूषयति। नन्वित्यादिना ॥

क्रियावतो मृदादेर्घटाद्युत्पत्तिदर्शनाद्ब्रह्मणोऽक्रियात्वात्ततो न प्राणाद्युत्पत्तिरिति शङ्कते। तत्कथमिति ॥ दृष्टेर्मायामयत्वमाश्रित्य श्रुत्या परिहरति। उच्यत इति ॥ स्वात्मा प्रविभक्तेनेत्युक्तमन्वय-

उ॰ विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति तस्योपनिषत्सत्यस्य सत्यमिति प्राणा

भा॰ प्रविभक्तेन तन्तुना उच्चरेदुच्चरणेनचास्ति तस्योद्गमने स्वतोऽतिरिक्तं कारकान्तरं। यथा चैकरूपादेकस्मादग्नेः क्षुद्रा अल्पा विस्फुलिङ्गास्त्रुटयोऽग्न्यवयवा व्युच्चरन्ति विविधं नाना वोच्चरन्ति। यथेमौ दृष्टान्तौ कारकभेदाभावेऽपि प्रवृत्तिं दर्शयतः। प्राक्प्रवृत्तेश्च स्वभावत एकत्वमेवमेवास्मादात्मनो विज्ञानमयस्य प्राक्प्रतिबोधाद्यत्स्वरूपं तस्मादित्यर्थः। सर्वे प्राणा वागादयः सर्वे लोकाः सर्वाणि कर्मफलानि सर्वे देवाः प्राणलोका अधिष्ठातारोऽग्न्यादयः सर्वाणि भूतानि ब्रह्मादिस्तम्बपर्य्यन्तानि प्राणिजातानि सर्व्व एत आत्मन इत्यस्मिन्पाठे उपाधिसम्पर्कजनितप्रवुध्यमानविशेषात्मान इत्यर्थे व्युच्चरन्ति। यस्मादात्मनः स्थावरं जङ्गमं जगदिदमग्निविस्फुलिङ्गवद्व्युच्चरत्यनिशं यस्मिन्नेव च प्रलीयते जलबुद्बुदवद्यदात्मकं च वर्त्तते स्थितिकाले तस्यास्यात्मनो ब्रह्मण उपनिषत् उपसमीपं निगमयतीत्यभिधायकः शब्द

व्या॰ व्यतिरेकद्वारा स्फोरयति। न चेति॥ असहायस्य कारणत्वे दृष्टान्तमुक्त्वा कूटस्थस्य सद्भावे दृष्टान्तमाह। यथा चेति॥ माध्यन्दिनश्रुतिमाश्रित्याह। सर्व्व एत इति॥ तस्येत्याद्यवतार्य्य व्याचष्टे। यस्मादित्यादिना॥ ननु प्रत्यग्भूतस्य ब्रह्मणो वाचकेषु शब्दान्तरे-

उ० वै सत्यं तेषामेष सत्यं ॥ २० ॥ चतुर्थस्य प्रथमं ब्राह्मणं ॥ ० ॥

उपनिषदित्युच्यते शास्त्रप्रामाण्यादेतच्छब्दगतो विशेषो सा०ऽवसीयते उपनिगमयितृत्वं नाम। कासावुपनिषदित्याह सत्यस्य सत्यमिति साधित्वा सर्वत्र चोपनिषल्लौकिकार्थत्वाद्दुर्विज्ञेयार्थेति तदर्थमाचष्टे प्राणा वै सत्यं तेषामेष सत्यमिति एतस्यैव वाक्यस्य व्याख्यानायोत्तरं ब्राह्मणद्वयं भविष्यति ॥ २० ॥

भवतु तावदुपनिषद्व्याख्यानायोत्तरं ब्राह्मणद्वयं। तस्योपनिषदित्युक्तं तत्र न जानीमः। किं प्रकृतस्यात्मनो विज्ञानमयस्य पाणिपेषणोत्थितस्य संसारिणः शब्दादिभुज इयमुपनिषदाहोस्विदसंसारिणः कस्यचित्किञ्चातः यदि संसारिणस्तदा संसार्य्येव विज्ञेयः। तद्विज्ञानादेव सर्व्वप्राप्तिः स एव ब्रह्मशब्दवाच्यस्तद्विद्यैव ब्रह्मविद्येति अथासंसारिणस्तदा तद्विषयाविद्या ब्रह्मविद्या। तस्माच्च

आ० ब्यपि सत्तु किमित्येतच्छब्दविषयमादरणं क्रियते तत्राह। शास्त्रेति। ब्राह्मणवाक्यस्यार्थोऽपि कथं निर्श्चीयतामित्याह। एतस्येति ॥ २० ॥

उक्तमङ्गीकृत्य विशेषावुभुत्सया संशयानो विचारं प्रस्तौति ॥ भवत्विति ॥ सन्दिग्धं सप्रयोजनञ्च विचार्य्यमिति न्यायेन सन्देहमुक्ता विचारप्रयोजकं प्रयोजनं पृच्छति। किञ्चात इति ॥ कस्मिन्पक्षे किं फलतीति पृष्टे प्रथमपक्षमनूद्य तस्मिन् फलमाह। यदीति ॥ यद्विज्ञानान्मुक्तिस्तस्यैव ज्ञेयता न जीवस्येत्याशङ्क्याह। तद्विज्ञानादिति ॥ ब्रह्मज्ञानादेव सा न संसारिज्ञानादित्याशङ्क्याह। स एवेति ॥ यद्विद्या ब्रह्मविद्या तदेव ब्रह्म न संसारी-

भा॰ ब्रह्मविज्ञानात्सर्व्वभावापत्तिः सर्व्वमेतच्छास्त्रप्रामाण्याद्भविष्यति। किन्त्वस्मिन्पक्ष आत्मेत्येवोपासीत आत्मानमेवावेत् अहं ब्रह्मास्मीति परब्रह्मैकत्वप्रतिपादिकाः श्रुतयः कुप्येरन्। संसारिणश्चान्यस्याभाव उपदेशानर्थक्यात्। यत एवं पण्डितानामप्येतन्महामोहस्थानमनुक्तप्रतिवचनप्रश्नविषयं। अतो यथाशक्त्या ब्रह्मविद्याप्रतिपादकवाक्येषु ब्रह्मविजिज्ञासूनां बुद्धिव्युत्पादनाय विचारयिष्यामो न तावदसंसारी परः पाणिपेषणप्रतिबोधिताच्छब्दादिभुजोऽवस्थान्तरविशिष्टादुत्पत्तिश्रुतेर्न प्रशासिताशनायावर्जितः परो विद्यते। कस्माद्यस्माद्ब्रह्म ज्ञपयिष्यामीति प्रतिज्ञाय सुप्तं पुरुषं पाणिपेषं बोधयित्वा तं शब्दादिभोक्तृत्वविशिष्टं दर्शयित्वा तस्यैव स्वप्नद्वारेण सुषुप्ताख्यमवस्थान्तर-

---

आ॰ त्याशङ्काह। तद्विद्यैवेति॥ आद्यकल्पीयफलसमाप्ताविति शब्दः पक्षान्तरमनूद्य तस्मिन् फलमाह। अथेत्यादिना॥ किमत्र नियामकमित्याशङ्क्य ब्रह्म वा इदमित्यादि शास्त्रमित्याह। सर्व्वमेतदिति॥ ब्रह्मोपनिषत्पक्षे शास्त्रप्रामाण्यात्सर्व्वं समञ्जसञ्चेत्तर्ह्येवास्तु किं विचारेणेत्याशङ्क्य जीवब्रह्मणोर्भेदो वेति विकल्प्याद्ये दोषमाह। किन्त्विति॥ अभेदपक्षं दूषयति। संसारिणश्चेति॥ उपदेशानर्थक्यादभेदपक्षानुपपत्तिरिति शेषः। विशेषानुपलम्भस्य संशयहेतुत्वमनुवदति। यत इति॥ पक्षद्वये फलप्रतीतिं परामृशति। एवमिति॥ अन्वयव्यतिरेककौशलं पाण्डित्यं। एतदित्यैकात्म्योक्तिः। महत्त्वं मोहस्य विचारोत्थनिर्णयं विनानुच्छिन्नत्वं। तस्य स्थानमालम्बनं केनापि नोक्तं प्रतिवचनं यस्य किं तदैकात्म्यमिति प्रश्नस्य तस्य विषयभूतमिति यावत्। न हि येन केनचिदैकात्म्यं प्रष्टुं प्रतिवक्तुं वा शक्यते। श्रवणायापि बहुभिर्यो न लभ्य इत्यादिश्रुतेरित्यर्थः। विचारप्रयोजकमुक्त्वा तत्कार्य्यं विचार-

भा० मुन्नीय तस्मादेवात्मनः सुषुप्त्यवस्थाविशिष्टादग्निविस्फुलिङ्गोर्णनाभिदृष्टान्ताभ्यामुत्पत्तिं दर्शयति श्रुतिरेवास्मादित्यादिना ।

न चान्यो जगदुत्पत्तिकारणमन्तराले श्रुतोऽस्ति विज्ञानमयस्यैव हि प्रकरणं । समानप्रकरणे च श्रुत्यन्तरे कौषीतकिनामादित्यादिपुरुषान्प्रस्तुत्य स होवाच यो वै बालाके एतेषां पुरुषाणां कर्त्ता यस्य चैतत्कर्म स वै वेदितव्य इति प्रबुद्धस्यैव विज्ञानमयस्य वेदितव्यतां दर्शयति नार्थान्तरस्य । तथा चात्मनस्तु कामाय सर्व्वं प्रियं भवतीत्युक्त्वा य एवात्मा प्रियः प्रसिद्धस्तस्यैव द्रष्टव्यश्रोतव्यमन्तव्यनिदिध्यासितव्यतां दर्शयति । तथा च विद्योपन्यामकाल आत्मेत्येवोपासीत तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयस्तदात्मानमेवावेदहं ब्रह्मास्मीत्येवमादिवाक्यानामानुलोम्यं स्यात्पराभावे । वक्ष्यति च आत्मानं चेद्विजानीयादय-

---

व्या० मुपसंहरति । अत इति ॥ संशयादिना विचारकार्य्यतामवतार्य्य पूर्व्वपक्षयति । न तावदिति ॥ जगत्कर्त्ता हीश्वरो विवक्ष्यते । प्रकृते च सुषुप्तिविशिष्टाज्जीवाज्जगज्जन्मोच्यते । तस्मादीश्वरो जीवादतिरिक्तो नास्तीत्यर्थः ॥ तदेव प्रपञ्चयति । नेत्यादिना ॥

प्रकृतेऽपि जीवे जगत्कारणत्वमीश्वरस्यैवात्र श्रुतमित्याशङ्क्याह । न चेति ॥ तत्र प्रकरणाविरोधहेतुमाह । विज्ञानेति ॥ श्रुत्यन्तरवशादपि जीव एवात्र जगत्कर्त्तेत्याह । समानप्रकरणे चेति ॥ श्रुत्यन्तरस्य च जीवविषयत्वं जगद्वाचित्वाधिकरणपूर्व्वपक्षन्यायेन द्रष्टव्यं । वाक्यशेषवशादपि जीवस्यैव वेदितव्यत्वं । वाक्यान्वयाधिकरणपूर्व्वपक्षन्यायेन दर्शयति । तथा चेति ॥ जीवातिरिक्तस्य परस्य वेदितव्यस्याभावे पूर्व्वोत्तरवाक्यानामानुकूल्यं

NOTICE.

An English translation of the Upanishad and Commentary will be given in one or two separate numbers, after the completion of the Text

उ० उच्चावचमीयमानो रूपाणि देवः कुरुते बहूनि ।
उतेव स्त्रीभिः सह मोदमानो जक्षदुतेवापि
भयानि पश्यन् ॥ १३ ॥

आराममस्य पश्यन्ति न तं पश्यति कश्चनेति ।
तन्नायतं बोधयेदित्याहुः ॥

भा० स्वप्नस्थाने उच्चावचमुच्चं देवादिभावमवचं तिर्य्यगादिभावं निकृष्टं तदुच्चावचमीयमानो गम्यमानः प्राप्नुवन्रूपाणि देवो द्योतनावान् कुरुते निवर्त्तयतीति वासनारूपाणि बहून्यसङ्ख्येयानि । उत अपि स्त्रीभिः सह मोदमान इव जक्षदिव हसन्निव वयस्यैः । उत इव अपि भयानि बिभेत्येभ्य इति भयानि सिंहव्याघ्रादीनि पश्यन्निव ॥ १३ ॥

आराममारमणमाक्रीडामनेन निर्म्मितां वासनारूपामस्यात्मनः पश्यन्ति सर्व्वे जनाः । ग्रामं नगरं स्त्रियमन्नाद्यमित्यादिवासनानिर्म्मितमाक्रीडनरूपं न तं पश्यति । तं न पश्यति कश्चन । कष्टम्भो वर्त्तते ऽत्यन्तविविक्तं दृष्टिगोचरमापन्नमप्यहो भाग्यहीनता लोकस्य यच्छक्यदर्शनमप्यात्मानं तं न पश्यति । लोकं प्रत्यनुक्रोशं दर्शयति श्रुतिः ।

आ० स्वप्नस्थं विशेषान्तरमाह । किञ्चेति ॥ उच्चावचं विषयीकृत्य तेन तेनात्मना स्वेनैव स्वयं गम्यमान इति यावत् ॥ ११ ॥ १२ ॥ १३ ॥

आरामं विवृणोति । ग्राममित्यादिना ॥ न तमित्यादेस्तात्पर्य्यमाह । कष्टमिति ॥ दृष्टिगोचरापन्नमपि न पश्यतीति सम्बन्धः । कष्टमित्यादिनोक्तं प्रपञ्चयति । अहो इति ॥ श्लोकानां तात्पर्य्यमुपसंहरति । अत्यन्तेति ॥ वाक्यान्तरमादाय तात्पर्य्यमु-

उ॰ दुर्भिषज्यꣳ हास्मै भवति यमेष न प्रतिपद्यते ।

भा॰ अत्यन्तविविक्तः स्वयं ज्योतिरात्मा स्वप्ने भवतीत्यभिप्रायः। तं नायतं बोधयेदित्याहुः । प्रसिद्धिरपि लोके विद्यते स्वप्न आत्मज्योतिषो व्यतिरिक्तत्वे । कासौ । तमात्मानं सुप्तमायतं सहसा भृशं न बोधयेदित्याहुरेवं कथयन्ति चिकित्सकादयो जना लोके । नूनं ते पश्यन्ति जाग्रद्देहादिन्द्रियद्वारतोऽपसृत्य केवलो वहिर्वर्त्तत इति यत आहुः ॥

तं नायतं बोधयेदिति । तत्र च दोषं पश्यन्ति । भृशं ह्यसौ बोध्यमानः। तानीन्द्रियद्वाराणि सहसा प्रतिबोध्यमानो न प्रतिपद्यत इति । तदेतदाह दुर्भिषज्यं हास्मै भवति यमेष न प्रतिपद्यत इति । तमिन्द्रियद्वारदेशं यस्माद्देशाच्छुक्रमादायापसृतस्तमिन्द्रियदेशमेष आत्मा पुनर्न प्रतिपद्यते । कदाचिद्व्यत्यासेनेन्द्रियमात्राः प्रवेशयति । तत

व्या॰ व्याकाङ्क्षापूर्व्वकमक्षराणि व्याकरोति । तन्नेत्यादिना ॥ तेषामभिप्रायमाह । नूनमिति ॥ इन्द्रियाण्येव द्वाराण्यस्येतीन्द्रियद्वारो जाग्रद्देहस्तस्मादिति यावत् ॥

तथापि सहसासौ बोध्यतां का हानिरित्याशङ्क्याह । तत्रेति ॥ सहसा बोध्यमानत्वं सप्तम्यर्थः । किमत्र प्रमाणमित्याशङ्क्यानन्तरवाक्यमवतार्य्य व्याचष्टे । तदेतदाहेत्यादिना ॥ पुनरप्रतिपत्तौ दोषप्रसङ्गं दर्शयति । कदाचिदिति ॥ व्यत्यासप्रवेशस्य कार्य्यं दर्शयन्दुर्भिषज्यमित्यादि व्याचष्टे । तत इति ॥ उक्तां प्रसिद्धिमुपसंहरति । तस्मादिति ॥ वृत्तमनूद्य मतान्तरमुत्थापयति । स्वप्नो भूत्वेत्यादिना ॥ इतिशब्दो यस्मादर्थे ॥ तदेव मतान्तरं स्फोरयति । नेत्यादिना ॥ उक्तमङ्गीकृत्य फलं पृच्छति । यद्येव

उ॰ अथो खल्वाहुर्जागरितदेश एवास्यैष इति यानि ह्येव जाग्रत्पश्यति तानि सुप्त इत्यत्रायं पुरुषः

भा॰ आन्ध्यबाधिर्य्यादिदोषप्राप्तौ दुर्भिषज्यं दुःखभिषक्कर्मता ह्यस्मै देहाय भवति दुःखेन चिकित्सनीयोऽसौ देहो भवतीत्यर्थः। तस्मात्प्रसिद्धापि स्वप्ने स्वयं ज्योतिष्ट्वमस्य गम्यते। स्वप्नो भूत्वातिक्रान्तो मृत्योरूपाणीति। तस्मात् स्वप्ने स्वयं ज्योतिरात्मा अथो अपि खल्वन्य आहुर्जागरितदेश एवास्यैष यः स्वप्नः। न सन्ध्यं स्थानान्तरमिहलोकपरलोकाभ्यां व्यतिरिक्तं। किं तर्हि इहलोक एव जागरितदेशः। यद्येवं किञ्चातः शृणुतो यद्भवति यदा जागरितदेश एवायं स्वप्नस्तदायमात्मा कार्य्यकरणेभ्यो न व्यावृत्तस्तैर्मिश्रीभूतः। अतो न स्वयं ज्योतिरात्मेत्यतः स्वयं ज्योतिष्ट्वबाधनायान्य आहुर्जागरितदेश एवास्यैष इति। तत्र च हेतुमाचक्षते। जागरितदेशत्वे यानि हि यस्माद्धस्त्या-

आ॰ मिति॥ स्वप्नो जागरितदेश इत्येवं यदीष्टमतश्च किं स्यादिति प्रश्नार्थः॥ फलं प्रतिज्ञाय प्रकटयति। शृण्विति॥ मतान्तरोपन्यासस्य स्वमतविरोधित्वमाह। इत्यत इति॥ स्वप्नस्य जाग्रद्देशत्वं दूषयति। तदसदिति॥ तस्य जाग्रद्देशत्वाभावे फलितमाह। तस्मादिति॥ स्वप्ने बाह्यज्योतिषः सम्भवो नास्तीत्यत्र प्रमाणमाह। तदुक्तमिति॥ बाह्यज्योतिरभावेऽपि स्वप्ने व्यवहारदर्शनात्तत्र स्वयं ज्योतिष्ट्वमात्मनोऽमुमशक्यमित्युपसंहरति। तस्मादिति॥ कथं पुनर्विद्यायामनुक्तायां सहस्रदानवचनमित्याशङ्क्य वृत्तं कीर्त्तयति। स्वयं ज्योतिरिति॥ मृत्योरूपाण्यतिक्रामतीत्यत्र च कार्य्यकरणव्यतिरिक्तत्वमात्मनो दर्शितमित्याह। अति-

उ॰ स्वयं ज्योतिर्भवति सोऽहं भगवते सहस्रं ददाम्यत ऊर्द्ध्वं विमोक्षाय ब्रूहीति ॥ १४ ॥

भा॰ दीनि पदार्थजातानि जाग्रज्जागरितदेशे पश्यति लौकिकस्तान्येव सुप्तोऽपि पश्यतीति। तदसत्। इन्द्रियोपरमात्। उपरतेषु हीन्द्रियेषु स्वप्नान् पश्यति। तस्मान्नान्यस्य ज्योतिषस्तत्र सम्भवोऽस्ति। तदुक्तं न तत्र रथा न रथयोगा इत्यादि। तस्मादस्त्ययं पुरुषः स्वयं ज्योतिर्भवतीत्येव स्वयं ज्योतिरात्मास्तीति स्वप्ननिदर्शनेन प्रदर्शितं। अतिक्रामति मृत्यो रूपाणीति च। क्रमेण सञ्चरन्निहलोकपरलोकादीनिहलोकपरलोकादिव्यतिरिक्तः। तथा जाग्रत्स्वप्नकुलायाभ्यां व्यतिरिक्तः। तत्र च क्रमसञ्चारान्नित्यस्त्येतत्प्रतिपादितं याज्ञवल्क्येन। अतो विद्यानिष्क्रियार्थं सहस्रं ददामीत्याह जनकः। सोऽहमेवं बोधितस्त्वया भगवते तुभ्यं सहस्रं

व्या॰ क्रामतीति ॥ लोकद्वयसञ्चारवशादुक्तमर्थमनुद्रवति। क्रमेणेति ॥ आदिशब्दस्तत्तद्देहादिविषयः ॥ स्थानद्वयसञ्चारवशादुक्तमनुभाषते। तथेति ॥ इहलोकपरलोकाभ्यामिवेति यावत्। लोकद्वये स्थानद्वये च क्रमसञ्चारप्रयुक्तमर्थान्तरमाह। तत्र चेति ॥ आत्मनः स्वयं ज्योतिषो देहादिव्यतिरिक्तस्य नित्यस्य ज्ञापितत्वादित्यतः शब्दार्थः ॥ कामप्रश्नस्य निर्णीतत्वान्निराकाङ्क्षत्वमिति शङ्कां वारयति। विमोक्षस्येति ॥ सम्यग्बोधस्तद्धेतुरिति यावत् ॥ ननु स एव प्रागुक्तो नासौ वक्तव्योऽस्ति तत्राह। तदुपयोगीति ॥ अयमित्युक्तात्मप्रत्ययोक्तिः। तादर्थ्यात्पदार्थज्ञानस्य वाक्यार्थज्ञानशेषत्वादिति यावत् ॥ पदार्थस्य वाक्यार्थवहिर्भावं दूषयति। तदेकदेश एवेति ॥ कामप्रश्नो नाद्यापि निर्णीत इत्यतो-

उ० स वा एष एतस्मिन्सम्प्रसादे रत्वा चरित्वा दृष्ट्वैव पुण्यञ्च पापञ्च ।

भा० ददामि । विमोक्षस्य कामप्रश्नो मयाभिप्रेतः । तदुपयोग्योऽयं तादर्थ्यात्तदेकदेश एव । अतस्त्वां नियोक्ष्यामि समस्तकामप्रश्ननिर्णयश्रवणेन विमोक्षायात ऊर्द्ध्वं ब्रूहि । येन संसाराद्विप्रमुच्येयं । त्वत्प्रसादाद्विमोक्षपदार्थैकदेशनिर्णयहेतोः सहस्रदानं ॥ १४ ॥

यत्प्रस्तुतमात्मनैवायं ज्योतिषाऽऽस्त इति तत्प्रत्यक्षतः प्रतिपादितं । अत्रायं पुरुषः स्वयं ज्योतिर्भवतीति । स्वप्ने यत्तूक्तं स्वप्नो भूत्वेमं लोकमतिक्रामति मृत्योरूपाणीति । तत्रैतदाशङ्क्यते । मृत्योरूपाण्येवातिक्रामति तन्मृत्युं । प्रत्यक्षं ह्येतत् । स्वप्ने कार्य्यकरणव्यावृत्तस्यापि मोदत्रासादिदर्शनं । तस्मान्नूनं नैवायं मृत्युमतिक्रामति । कर्म्मणो हि मृत्योः

आ० त्तरवाक्यं गमकमित्याह । अत इति ॥ कामप्रश्नस्यानिर्णीतत्वादिति यावत् । तेनापेक्षितेन हेतुनेत्यर्थः ॥ विमोक्षशब्दस्य सम्यग्ज्ञानविषयत्वं सूचयति । येनेति ॥ सम्यग्ज्ञानप्राप्तौ गुरुप्रसादस्य प्राधान्यं दर्शयति । त्वत्प्रसादादिति ॥ ननु विमोक्षपदार्थो निर्णीतोऽन्यथा सहस्रदानस्याकस्मिकत्वप्रसङ्गादत आह । विमोक्षेति ॥ १४ ॥

उत्तरकण्डिकामवतारयितुं वृत्तं कीर्त्तयति । यत्प्रस्तुतमिति ॥ आत्मनैवेत्यादिना यदात्मनः स्वयं ज्योतिष्ट्वं ब्राह्मणादौ प्रस्तुतं तदत्रायमित्यादिना प्रत्यक्षतः स्वप्ने प्रतिपादितमिति सम्बन्धः । वृत्तमर्थान्तरमनूद्य चोद्यमुत्थापयति । यत्तूक्तमिति ॥ मृत्युं नातिक्रामतीत्यत्र हेतुमाह । प्रत्यक्षं हीति ॥ इच्छाद्वेषादिरादिश-

भा॰ कार्य्यं मोहशोकादि दृश्यते। यदि च मृत्युना बद्ध एवायं स्वभावतस्ततो विमोचो नोपपद्यते। न हि स्वभावात्कश्चिद्विमुच्यते। अथ स्वभावो न भवति मृत्युस्ततस्तस्मान्मोच उपपत्स्यते। यथासौ मृत्युरात्मीयो धर्म्मो न भवति ततः प्रदर्शनायात ऊर्द्धं विमोचाय ब्रूहीत्येवं जनकेन पर्य्यनुयुक्तो याज्ञवल्क्यस्तद्दिदर्शयिषया प्रववृते। स वै प्रकृतः स्वयं ज्योतिः पुरुषः। एष यः स्वप्ने दर्शित एतस्मिन् संप्रसादे सम्यक् प्रसीदत्यस्मिन्निति सम्प्रसादः। जागरिते देहेन्द्रियव्यापारशतसन्निपातजं हित्वा कालुष्यं तेभ्यो विप्रतिमुक्त ईषत्प्रसीदति स्वप्ने। इह तु सुषुप्ते सम्यक् प्रसीदतीत्यतः सुषुप्तं सम्प्रसाद उच्यते। तीर्णो हि तदा सर्व्वान् शोकान् भवति।

व्या॰ ब्दार्थः॥ तथापि कुतो मृत्युनातिक्रामति तत्राह। तस्मादिति॥ कार्य्यस्य कारणादन्यत्र प्रवृत्त्ययोगादिति यावत्॥ उक्तमुपपादयति। कर्म्मणो हीति॥ अतः स्वप्नं गतो मृत्युं कर्म्माख्यं नातिक्रामतीति शेषः॥ मा तर्हि मृत्योरतिक्रमोऽभूत्को दोषस्तत्राह। यदि चेति॥ स्वभावादपि मृत्योर्विमुक्तिमाशङ्क्याह। न हीति॥ उक्तं हि न हि स्वभावो भावानां व्यावर्त्तेतौष्ण्यवद्रवेरिति॥ कथं तर्हि मोक्षोपपत्तिरित्याशङ्क्याह। अथेति॥ एषा च शङ्का प्रागेव राज्ञा कृतेति दर्शयन्नुत्तरमुत्थापयति। यथेत्यादिना॥ तद्विदर्शयिषयेत्यत्र तच्छब्देन मृत्योरतिक्रमणं गृह्यते॥ वैशब्दस्य प्रसिद्धार्थत्वमुपेत्य सशब्दार्थमाह। स वै प्रकृत इति॥ एषशब्दमनूद्य व्याकरोति। एष इति॥ सम्यक्प्रसादे स्थित्वा मृत्युमतिक्रामतीति शेषः॥ सुषुप्तस्य सम्प्रसादत्वं साधयति। जागरित इत्यादिना॥ तत्र वाक्यशेषमनुकूलयति। तीर्णो हीति॥ अस्तु सम्यक् प्रसादः सुषुप्तं स्थानं तथापि किमायातमित्यत आह। स वा इति॥ पूर्व्वोक्तेन क्रमेण सम्यक्प्रसादे सुषुप्ते स्थित्वा सम्यक्-

उ॰ स वा एष एतस्मिन्सम्प्रसादे रत्वा चरित्वा दृष्ट्वैव पुण्यञ्च पापञ्च ।

भा॰ ददामि । विमोक्षश्च कामप्रश्नो मयाभिप्रेतः । तदुपयोग्योऽयं तादर्थ्यात्तदेकदेश एव । अतस्त्वां नियोक्ष्यामि समस्तकामप्रश्ननिर्णयश्रवणेन विमोक्षायात ऊर्द्ध्वं ब्रूहि । येन संसाराद्विप्रमुच्येयं । त्वत्प्रसादाद्विमोक्षपदार्थैकदेशनिर्णयहेतोः सहस्रदानं ॥ १४ ॥

यत्प्रस्तुतमात्मनैवायं ज्योतिषाऽऽस्त इति तत्प्रत्यक्षतः प्रतिपादितं । अत्रायं पुरुषः स्वयं ज्योतिर्भवतीति । स्वप्ने यत्तूक्तं स्वप्नो भूत्वेमं लोकमतिक्रामति मृत्यो रूपाणीति । तत्रैतदाशङ्क्यते । मृत्यो रूपाण्येवातिक्रामति तन्मृत्युं । प्रत्यक्षं ह्येतत् । स्वप्ने कार्य्यकरणव्यावृत्तस्यापि मोदत्रासादिदर्शनं । तस्मान्नूनं नैवायं मृत्युमतिक्रामति । कर्म्मणो हि मृत्योः

व्या॰ त्तरवाक्यं गमकमित्याह । अत इति ॥ कामप्रश्नस्यानिर्णीतत्वादिति यावत् । तेनापेक्षितेन हेतुनेत्यर्थः ॥ विमोक्षशब्दस्य सम्यग्ज्ञानविषयत्वं सूचयति । येनेति ॥ सम्यग्ज्ञानप्राप्तौ गुरुप्रसादस्य प्राधान्यं दर्शयति । त्वत्प्रसादादिति ॥ ननु विमोक्षपदार्थो निर्णीतोऽन्यथा सहस्रदानस्याकस्मिकत्वप्रसङ्गादत आह । विमोक्षेति ॥ १४ ॥

उत्तरकण्डिकामवतारयितुं वृत्तं कीर्त्तयति । यत्प्रस्तुतमिति ॥ आत्मनैवेत्यादिना यदात्मनः स्वयं ज्योतिष्ट्वं ब्राह्मणादौ प्रस्तुतं तदत्रायमित्यादिना प्रत्यक्षतः स्वप्ने प्रतिपादितमिति सम्बन्धः । वृत्तमर्थान्तरमनूद्य चोद्यमुत्थापयति । यत्तूक्तमिति ॥ मृत्युं नातिक्रामतीत्यत्र हेतुमाह । प्रत्यक्षं हीति ॥ इच्छाद्वेषादिरादिश-

भा० कार्य्यं मोदनाशादि दृश्यते। यदि च मृत्युना बद्ध एवायं स्वभावतस्ततो विमोचो नोपपद्यते। न हि स्वभावात्कश्चिद्विमुच्यते। अथ स्वभावो न भवति मृत्युस्ततस्तस्मान्मोच उपपत्स्यते। यथासौ मृत्युरात्मीयो धर्मो न भवति ततः प्रदर्शनायात ऊर्द्ध्वं विमोचाय ब्रूहीत्येवं जनकेन पर्य्यनुयुक्तो याज्ञवल्क्यस्तद्विदर्शयिषया प्रववृते। स वै प्रकृतः स्वयं ज्योतिः पुरुषः। एष यः स्वप्ने दर्शित एतस्मिन् संप्रसादे सम्यक् प्रसीदत्यस्मिन्निति सम्प्रसादः। जागरिते देहेन्द्रियव्यापारशतसन्निपातजं हित्वा कालुष्यं तेभ्यो विप्रतिमुक्त ईषत्प्रसीदति स्वप्ने। इह तु सुषुप्ते सम्यक् प्रसीदतीत्यतः सुषुप्तं सम्प्रसाद उच्यते। तीर्णो हि तदा सर्व्वान् शोकान् भवति।

था० ब्दार्थः॥ तथापि कुतो मृत्युनातिक्रामति तत्राह। तस्मादिति॥ कार्य्यस्य कारणादन्यत्र प्रवृत्त्ययोगादिति यावत्॥ उक्तमुपपादयति। कर्म्मणो हीति॥ अतः स्वप्नं गतो मृत्युं कर्म्माख्यं नातिक्रामतीति शेषः॥ मा तर्हि मृत्योरतिक्रमोऽभूत्को दोषस्तत्राह। यदि चेति॥ स्वभावादपि मृत्योर्विमुक्तिमाशङ्क्याह। न हीति॥ उक्तं हि न हि स्वभावो भावानां व्यावर्त्त्यतौष्ण्यवद्रवेरिति॥ कथं तर्हि मोक्षोपपत्तिरित्याशङ्क्याह। अथेति॥ एषा च शङ्का प्रागेव राज्ञा कृतेति दर्शयन्नुत्तरमुत्थापयति। यथेत्यादिना॥ तद्विदर्शयिषयेत्यत्र तच्छब्देन मृत्योरतिक्रमणं गृह्यते॥ वैशब्दस्य प्रसिद्धार्थत्वमुपेत्य सशब्दार्थमाह। स वै प्रकृत इति॥ एषशब्दमनूद्य व्याकरोति। एष इति॥ सम्यक्प्रसादे स्थित्वा मृत्युमतिक्रामतीति शेषः॥ सुषुप्तस्य सम्प्रसादत्वं साधयति। जागरित इत्यादिना॥ तत्र वाक्यशेषमनुकूलयति। तीर्णो हीति॥ अस्तु सम्यक् प्रसादः सुषुप्तं स्थानं तथापि किमायातमित्यत आह। स वा इति॥ पूर्व्वोक्तेन क्रमेण सम्यक्प्रसादे सुषुप्ते स्थित्वा सम्यक्-

भा० मन्निव एको द्रष्टेति हि वक्ष्यति। सुषुप्तस्यमात्मानं स वा एष एतस्मिन् सम्प्रसादे क्रमेण सम्प्रसन्नः सन् सुषुप्ते स्थित्वा कथं सम्प्रसन्नः। स्वप्नात्सुषुप्तं प्रविविक्षुः स्वप्नावस्थ एव रत्वा रतिमनुभूय मित्रबन्धुजनदर्शनादिना चरित्वा विहृत्या-नेकधा चरणफलं श्रममुपलभ्येत्यर्थः। दृष्ट्वैव न कृत्वेत्यर्थः। पुण्यञ्च पुण्यफलं पापञ्च पापफलं। न तु पुण्यपापयोः साक्षा-द्दर्शनमस्तीत्यवोचाम। तस्मान्न पुण्यपापाभ्यामनुबद्धः। यो हि करोति पुण्यपापे स ताभ्यामनुबध्यते। न हि दर्शनमा-त्रेणैतदनुबद्धः स्यात्। तस्मात् स्वप्नो भूत्वा मृत्युमतिक्राम-त्येव न मृत्युरूपाण्येव केवलं। अतो न मृत्योरात्मस्वभाव-त्वाशङ्का। मृत्युश्चेत्स्वभावोऽस्य स्वप्नेऽपि कुर्य्यात्। न तु करो-

---

व्या० प्रसन्नः सन् मृत्युमतिक्रामतीत्यर्थः॥ उक्तमर्थमुपपादयितुमा-काङ्क्षामाह। कथमिति॥ रत्वेत्यादि व्याकुर्व्वन्परिहरति। स्वप्ना-दिति॥ पुण्यपापशब्दयोर्यथाश्रुतार्थत्वमाशङ्क्याह। न त्विति। अवोचामो भयान्पाप्मन आनन्दांश्च पश्यतीत्यत्रेति शेषः॥ पुण्य-पापयोर्दर्शनमेव न करणमित्यत्र फलितमाह। तस्मादिति॥ तद्द्रष्टुरपि तदनुबन्धः स्यादित्याशङ्क्यातिप्रसङ्गान्नैवमित्याह। यो हीत्यादिना॥ पुण्यपापाभ्यामात्मनोऽसंस्पर्शे फलितमाह। तस्मादिति॥ मृत्योरतिक्रमणे किं स्यादित्याशङ्क्याह। अतो नेति॥ मृत्योरस्वभावत्वमुपपादयति। मृत्युश्चेदिति॥ इष्टापत्तिमाश-ङ्क्याह। न त्विति॥ अनन्वागतवाक्यादसङ्गवाक्याच्चेत्यर्थः॥ मोक्ष-शास्त्रप्रामाण्यादपि मृत्योरस्वभावत्वमित्याह। स्वभावश्चेदिति॥ इतश्च मृत्युः स्वभावो न भवतीत्याह। न त्विति॥ अभावा-दिति छेदः॥ तस्याः स्वभावत्वे लब्धमर्थं कथयति। अत इति॥ मृत्युमेव व्याचष्टे। पुण्यपापाभ्यामिति॥ स्वप्ने मृत्योः स्वभावत्वा-भावेऽपि जाग्रदवस्थायां कर्तृत्वमात्मनः स्वभावः। तथा च निय-

उ॰ पुनः प्रतिन्यायं प्रतियोन्या द्रवति स्वप्नायैव

भा॰ ति स्वभावश्चेत्क्रियाऽस्य निर्मोक्षतैव स्यात्। न तु स्वभावः स्वप्नेऽभावात्। अतो विमोक्षोऽस्योपपद्यते मृत्योः पुण्यपापाभ्यां न तु जागरितेऽस्य स्वभाव एव। न हि बुद्ध्याद्युपाधिकृतं हि तत्। तच्च प्रतिपादितं सादृश्यात्। ध्यायतीव लेलायतीवेति॥

तस्मादेकान्तेनैव स्वप्ने मृत्युरूपातिक्रमणान्न स्वाभाविकत्वाशङ्काऽनिर्मोक्षता वा। तत्र चरित्वेऽपि चरणफलं श्रममुपलभ्येत्यर्थः। सम्प्रसादानुभवोत्तरकालं पुनः प्रतिन्यायं यथान्यायं यथागतं नि आयो न्यायः। अयनमायो निगमनं पुनः पूर्व्वगमनवैपरीत्येन यदागमनं स प्रतिन्यायः यथागतं पुनरागच्छतीत्यर्थः। प्रतियोनि यथास्थानं स्वप्नस्थानं। स्वप्नस्थानाद्धि सुषुप्तिं प्रतिपन्नः। स यथास्थानमेव पुनरागच्छतीति। प्रतियोन्या द्रवति स्वप्नायैव

आ॰ मेन तस्य मृत्योरतिक्रमो न सिध्यतीति शङ्कते। न त्विति। औपाधिकत्वात्कर्तृत्वस्य स्वाभाविकत्वाभावादात्मनो मृत्योरतिक्रमः सम्भवतीति परिहरति। नेति॥ कथमौपाधिकत्वं कर्तृत्वस्य सिद्धवदुच्यते तत्राह। तच्चेति॥ ध्यायतीवेत्यादौ सादृश्यवाचकादिव शब्दादौपाधिकत्वं कर्तृत्वस्य प्रागेव दर्शितमित्यर्थः॥ जागरितेऽपि कर्तृत्वस्य स्वभाविकत्वाभावे फलितमाह॥ तस्मादिति॥

मृत्योः स्वाभाविकत्वाशङ्काभावकृतं फलमाह। अनिर्मोक्षता वेति॥ वाशब्दो नञ्वार्थयार्थः॥ पुण्यञ्च पापञ्चेत्येतदन्तं वाक्यं व्याख्याय पुनरित्यादि व्याचष्टे। तत्र इति॥ स्वप्नाद्युत्थाय सुषुप्तिमनुभूयोत्तरकालमिति यावत्॥ स्थानात् स्थानान्तरप्राप्त-

उ० स यत्तत्र किञ्चित्पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष इत्येवमेवैतद्याज्ञवल्क्य सोऽहं भग-

भा० स्वप्नस्थानायैव। ननु स्वप्ने न करोति पुण्यपापे तयोः फल-मेव पश्यतीति कथमवगम्यते। यथा जागरिते तथा करो-त्येवं स्वप्नेऽपि तुल्यत्वाद्दर्शनस्येति। न। यत आह स आत्मा यत्किञ्चित्तत्र स्वप्ने पश्यति पुण्यपापफलं। अनन्वागतोऽननुबद्धस्तेन दृष्टेन भवति। नैवानुबद्धो भवतीति। यदि हि स्वप्ने कृतमेव तेन स्यात्तेनानुबध्येत। स्वप्नादुत्थितोऽपि सम-न्वागतः स्यात्। न च तल्लोके स्वप्नकृतकर्मणाऽनन्वागतत्व-प्रसिद्धिः। न हि स्वप्नकृतेनागसागस्कारिणमात्मानं मन्यते कश्चित्। न च स्वप्नदृशः श्रुत्वा लोकस्तं गर्हयति परिहरति

आ० वभ्यासं वक्तुं पुनःशब्दः॥ प्रतिन्यायमित्यस्यावयवार्थमुक्त्वा विवक्षितमर्थमाह। पुनरिति॥ सम्प्रसादादूर्द्ध्वमिति यावत्॥ जागरितात् स्वप्नं ततः सुषुप्तं गच्छतीति पूर्व्वगमनं ततो वैपरीत्येन सुषुप्तात् स्वप्नं जागरितं वा गच्छतीति यदागमनं स प्रतिन्यायस्तमेव सङ्क्षिपति। यथेति॥ यथा स्थानमाद्रवतीत्येतद्विवृणोति। स्वप्न-स्थानादिति॥ उक्तेऽर्थे वाक्यं पातयति। प्रतियोनीति॥ किमर्थं यथा स्थानमागमनं तदाह। स्वप्नस्थानायैवेति॥ स यदित्या-दिवाक्यस्य व्यावर्त्त्यामाशङ्कामाह। नन्विति॥ तत्र वाक्यमुत्तर-त्वेनावतार्य्य व्याकरोति। यत आहेति॥ अननुबद्ध इत्यस्यार्थं स्फुटयति। नैवेति॥ स यदित्यादिवाक्यस्याक्षरार्थमुक्त्वा तात्प-र्य्यमाह। यदि हीति॥ तेनात्मनेति यावत्। स्वप्ने कृतं कर्म्म पुनस्तेनेत्युक्तं॥ अनुबन्धे दोषमाह। स्वप्नादिति॥ इष्टापत्तिमा-शङ्क्याह। न चेति॥ स्वप्नकृतेन कर्म्मणा जाग्रदवस्थस्य पुरुषस्या-न्वागतत्वप्रसिद्धिरिति यदुच्यते तन्न व्यवहारभूमौ सम्प्रतिपन्न-मित्यर्थः॥ स्वप्नदृष्टेन जाग्रद्रूतस्य न सम्प्रतिरित्यत्र स्वानुभवं

उ० वत्ते सहस्रं ददाम्यत ऊर्द्ध्वं विमोक्षायैव ब्रूहीति ॥ १५ ॥

भा०वा। अतोऽनन्वागत एव तेन भवति। तस्मात्स्वप्ने कुर्वन्निवोपलभ्यते न तु क्रियाऽस्ति परमार्थतः। उतेव स्त्रीभिः सह मोदमान इवेति। श्लोक उक्तः। आख्यातारश्च स्वप्नस्य सहैव शब्देनाचक्षते। हस्तिनोऽद्य घटीकृता धावन्तीव मया दृष्टा इति। अतो न तस्य कर्तृत्वमिति। कथं पुनरस्याऽकर्तृत्वमिति। कार्य्यकरणैर्मूर्त्तैः संश्लेषो मूर्त्तस्य स तु क्रियाहेतुर्दृष्टः। न ह्यमूर्त्तः कश्चित्क्रियावान्दृश्यतेऽमूर्त्तश्चात्मातोऽसङ्गो यस्माच्चासङ्गो ह्ययं पुरुषस्तस्मादनन्वागतस्तेन स्वप्नदृष्टेन। अत एव न क्रियाकर्तृत्वमस्य कथञ्चिदुपपद्यते। कार्य्यकरणसंश्लेषेण हि कर्तृत्वं स्यात्स च संश्लेषः संयोगोऽस्य

आ० दर्शयति। न हीति॥ यथोक्तेऽनुभवे लोकस्यापि सम्मतिं दर्शयति। न चेति॥ तत्र फलितमाह। अत इति॥ कथं तर्हि स्वप्ने कर्तृत्वप्रतीतिस्तत्राह। तस्मादिति॥ स्वप्नस्याभासत्वाच्च न तत्र वस्तुतोऽस्ति क्रियेत्याह। उतेवेति॥ तदाभासत्वे लोकप्रसिद्धिमनुकूलयति। आख्यातारश्चेति॥ स्वप्नस्याभासत्वे फलितमाह। अत इति॥ अनन्वागतवाक्यं प्रतिज्ञारूपं व्याख्याय सङ्गवाक्यं हेतुरूपमवतारयितुमाकाङ्क्षामाह। कथमिति॥ मूर्त्तस्य मूर्त्तान्तरेण संयोगे क्रियोपलम्भादमूर्त्तस्य तदभावादात्मनश्चामूर्त्तत्वेनासंयोगो क्रियायोगादकर्तृत्वसिद्धिरित्युत्तरं हेतुवाक्यार्थकथनपूर्व्वकं कथयति। कार्य्यकरणैरित्यादिना॥ आत्मनोऽसङ्गत्वेनाकर्तृत्वमुक्तं समर्थयते। अत एवेति॥ अतःशब्दार्थं विशदयति। कार्य्येति॥ क्रियावत्त्वाभावे जन्ममरणादिराहित्यं कौटस्थ्यं फलतीत्याह। तस्मादिति॥ कर्म्मप्रविवेकमुक्तमङ्गीक-

उ॰ स वा एष एतस्मिन् स्वप्ने रत्वा चरित्वा दृष्ट्वैव पुण्यञ्च पापञ्च पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव स यत्तत्र किञ्चित्पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष इत्येवमेवैतद्याज्ञ-

---

भा॰ नास्ति यतोऽसङ्गो ह्ययं पुरुषः। तस्मादस्त एवमेवैतद्याज्ञवल्क्य। सोऽहं भगवते सहस्रं ददाम्यत ऊर्द्ध्वं विमोक्षायैव ब्रूहि। मोक्षपदार्थैकदेशस्य कर्म्मप्रविवेकस्य सम्यग्दर्शितत्वादत ऊर्द्ध्वं विमोक्षायैव ब्रूहीति॥ १५॥

तत्रासङ्गो ह्ययं पुरुष इत्यसङ्गताकर्त्तृत्वे हेतुरुक्तः। उक्तञ्च पूर्व्वं कामवशात् स ईयते यत्र काममिति। कामश्च सङ्गोऽतोऽसिद्धो हेतुरुक्तः। असङ्गो ह्ययं पुरुष इति। न त्वेतदस्ति। कथं तर्ह्यसङ्ग एवेत्येतदुच्यते। स वा एष एतस्मिन् स्वप्ने स वै एष पुरुषः संप्रसादात्प्रत्यागतः स्वप्ने रत्वा

आ॰ रोति। एवमिति॥ तत्प्रविविक्तात्मज्ञाने दार्ढ्यं सूचयति। सोऽहमिति॥ नैराकाङ्क्ष्यं व्यावर्त्तयति। अत इति॥ कथं तर्हि सहस्रदानमित्याशङ्क्याह। मोक्षेति॥ कामप्रविवेकविषयनियोगमभिप्रेत्य पुनरनुक्रामति। अत ऊर्द्ध्वमिति॥ १५॥

उत्तरकण्डिकाव्यावर्त्त्यां शङ्कामाह। तत्रेति॥ पूर्व्वकण्डिकासमर्थ्यर्थः॥ भवत्वकर्त्तृत्वहेतुरसङ्गत्वं किन्तावतेत्याशङ्क्याह। उक्तञ्चेति॥ पूर्व्वश्लोकोपन्यासदशायामिति यावत्। कर्म्मवशात् स्वप्नहेतुकर्म्मसामर्थ्यादित्यर्थः॥ आत्मनः स्वप्ने कामकर्म्मसम्बन्धेऽपि किमिति नासङ्गत्वं तत्राह। कामश्चेति॥ हेत्वसिद्धिं परिहरति। न त्विति॥ न चेद्धेतोरसिद्धत्वं किं तर्हि कथं तत्सिद्धिरिति पृच्छति। कथमिति॥ हेतुसमर्थनार्थमुत्तरग्रन्थमुत्थापयति।

उ० वल्क्य सोऽहं भगवते सहस्रं ददाम्यत ऊर्द्ध्वं विमोक्षायैव ब्रूहीति ॥ १६ ॥

स वा एष एतस्मिन्बुद्धान्ते रत्वा चरित्वा

भा० चरित्वा यथा कामं दृष्ट्वैव पुण्यञ्च पापञ्चेति सर्व्वं पूर्व्ववद्बुद्धान्तायैव जागरितस्थानाय । तस्मादसङ्ग एवायं पुरुषः । यदि स्वप्ने सङ्गवान् स्यात्कामी ततस्तत्सङ्गजैर्दोषैर्बुद्धान्ताय प्रत्यागतो लिप्येत ॥ १६ ॥

यथासौ स्वप्नेऽसङ्गत्वात्स्वप्नसङ्गजैर्दोषैर्जागरिते प्रत्यागतो न लिप्यते । एवं जागरितसङ्गजैरपि दोषैर्न लिप्यत एव बुद्धान्ते । तदेतदुच्यते । स वा एष एतस्मिन् बुद्धान्ते जागरिते रत्वा चरित्वेत्यादि पूर्व्ववत् । यत्तत्र बुद्धान्ते किञ्चित्पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष इति । ननु दृष्ट्वैवेति कथमवधार्य्यते करोति च तत्र पुण्यपापे तत्फलञ्च

व्या० ह्यसङ्ग इति । प्रतियोन्याद्रवतीत्येतदन्तं सर्व्वमित्युक्तं । स्वप्ने कर्तृत्वाभावस्तच्छब्दार्थः ॥ उक्तमसङ्गत्वं व्यतिरेकमुखेन विशदयति । यदीति ॥ सङ्गवानित्यस्य व्याख्यानं । कामीति ॥ तत्सङ्गजैस्तत्र स्वप्नविषयविशेषेषु कामाख्यसङ्गवशादुत्पन्नैरपराधैरिति यावत् । न तु लिप्यते प्रायश्चित्तविधानस्यापि स्वप्नदृष्टचिताशुभाशङ्कानिवर्हणार्थत्वादवस्तुवृत्तानुसारित्वाभावादिति शेषः ॥ १६ ॥

उक्तमर्थं दृष्टान्तीकृत्य जागरितेऽपि निर्लेपत्वमात्मनो दर्शयति । यथेत्यादिना ॥ तत्र प्रमाणमाह । तदेतदिति ॥ जाग्रदवस्थायामुक्तमकर्तृत्वमाक्षिपति । नन्विति ॥ तत्र क्षिप्तं कर्तृत्वमित्युत्तरमाह । नेत्यादिना ॥ तदेव विवृणोति । ध्यायतीवेति ॥ स्वतोऽकर्तृत्वे वाक्योपक्रमं संवादयति । तथा चेति ॥ वाक्यार्थं सङ्गृह्णाति । बुद्ध्यादीति ॥ कर्तृत्वमिति शेषः । नन्वौपा

उ॰ दृष्ट्वैव पुण्यञ्च पापञ्च पुनः प्रतिन्यायं प्रतियोन्या द्रवति स्वप्नान्तायैव ॥ १७ ॥

भा॰ पश्यति। न कारकावभासकत्वेन कर्तृत्वोपपत्तेः। आत्मनैवायं ज्योतिषाऽऽस्त इत्यादिनात्मज्योतिषावभासितः कार्य्यकरणसङ्घातो व्यवहरति। तेनास्य कर्तृत्वमुपचर्य्यते न स्वतः कर्तृत्वं। तथाचोक्तं ध्यायतीव लेलायतीवेति। बुद्ध्याद्युपाधिकृतमेव न स्वतः। इह तु परमार्थापेक्षयोपाधिनिरपेक्षमुच्यते। दृष्ट्वैव पुण्यञ्च पापञ्च न कृत्वेति तेन न पूर्व्वापरव्याघाताशङ्का। यस्मान्निरुपाधिकः परमार्थतो न करोति न लिप्यते क्रियाफलेन। तथा च व्यासेन भगवतोक्तं। अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः। शरीरस्थोऽपि कौन्तेय न करोति न लिप्यत इति। तथा सहस्रदानन्तु कामप्रश्नविवेकस्यादर्शितत्वात्। तथा स वा एष एतस्मिन् स्वप्ने स वा एष एतस्मिन् बुद्धान्त इत्येताभ्यां कण्डिकाभ्यामसङ्गतैव प्रतिपादिता। यस्माद्बुद्धान्ते कृते न

आ॰ धिकं कर्तृत्वं पूर्व्वमुक्तमिदानीं तन्निराकरणे पूर्व्वोत्तरविरोधः स्यादित्यत आह। इह त्विति॥ उपाधिनिरपेक्षः कर्तृत्वाभाव इति शेषः। तेनेत्युक्तं हेतुं स्फुटयति। यस्मादिति॥ आत्मनो लेपाभावे भगवद्वाक्यमपि प्रमाणमित्याह। तथा चेति॥ अवस्थात्रयेऽपि असङ्गत्वमनन्वागतत्वं चात्मनः सिद्धञ्चेदिमोक्षपदार्थस्य निर्णीतत्वाज्जनकस्य नैराकाङ्क्षमित्याशङ्क्याह। तथेति॥ यथा मोक्षैकदेशस्य कर्म्मविवेकस्य दर्शितत्वात्पूर्व्वत्र सहस्रदानमुक्तं तथात्रापि तदेकदेशस्य कामविवेकस्य दर्शितत्वात्तद्दानं न तु कामप्रश्नस्य निर्णीतत्वादित्यर्थः॥ द्वितीयतृतीयकण्डिकयोस्ता-

भा॰ * स्वप्नान्तगतः सम्प्रसन्नोऽसम्बद्धो भवति स्त्र्यादिकार्यादर्शनात् तस्मात्त्रिष्वपि स्थानेषु स्वतोऽसङ्ग एवायं। अतोऽमृतः स्थानत्रयधर्मविलक्षणः प्रतियोन्या द्रवति स्वप्नान्तायैव सम्प्रसादायेत्यर्थः। दर्शनवृत्तेः स्वप्नस्य स्वप्नशब्देनाभिधानदर्शनादन्तशब्देन च विशेषणोपपत्तेः। एतस्मा अन्ताय धावतीति च सुषुप्तं दर्शयिष्यति। यदि पुनरेवमुच्यते स्वप्नान्ते रत्वा चरित्वा एतावुभावन्तावनुसञ्चरति। स्वप्नान्तञ्च बुद्धान्तञ्चेति दर्शनात् स्वप्नान्तायैवेत्यत्रापि दर्शनवृत्तिरेव स्वप्नदर्शन इति। तथापि न किञ्चिद्दुष्यति असङ्गता हि सिषाधयिषिता सिध्यत्येव। यस्माज्जागरिते दृष्ट्वैव पुण्यञ्च पापञ्च रत्वा चरित्वा च स्वप्नान्तमागतो न जागरितदोषेणानुगतो भवति॥ १७ ॥

आ॰ तदर्थं सङ्गृह्णाति। तथेत्यादिना॥ यथा प्रथमकण्डिकया कर्म्मविवेकः प्रतिपादितस्तथेति यावत्॥ कण्डिकात्रितयार्थं सङ्क्षिप्योपसंहरति। यस्मादिति॥ अवस्थात्रयेऽप्यसङ्गत्वे किं सिद्ध्यति तदाह। अत इति॥ प्रतीकमादाय स्वप्नान्तशब्दार्थमाह॥ प्रतियोन्येति॥ कथं पुनस्तस्य सुषुप्तविषयत्वमत आह। दर्शनवृत्तेरिति॥ दर्शनं वासनामयं तस्य वृत्तिर्यस्मिन्निति व्युत्पत्त्या स्वप्नो दर्शनवृत्तिस्तस्य स्वप्नशब्देनैव सिद्धत्वादन्तशब्दवैयर्थ्यात्तस्यान्तो लयो यस्मिन्निति व्युत्पत्त्या स्वप्नान्तशब्देन सुषुप्तग्रहे सत्यन्तशब्देन स्वप्नस्यावच्छेदोपपत्तेश्च सुषुप्तस्थानमेव स्वप्नान्तशब्दितमित्यर्थः॥ तत्रैव वाक्यशेषानुगुण्यमाह। एतस्मा इति। स्वप्नान्तशब्दस्य स्वप्ने प्रयोगदर्शनादिहापि तस्यैव तेन ग्रहणमिति पक्षान्तरमुत्थाप्याङ्गीकरोति। यदीत्यादिना॥ सिषाधयिषितार्थसिद्धौ हेतुमाह। यस्मादिति॥ १७॥

---

* धीर्धीरिन्नेति पुस्तकान्तरपाठः।

उ० तद्यथा महामत्स्य उभे कूलेऽनुसञ्चरति पूर्व्वञ्चापरञ्चैवमेवायं पुरुष एतावुभावन्तावनुसञ्चरति स्वप्नान्तञ्च बुद्धान्तञ्च ॥ १८ ॥

भा० एवमयं पुरुष आत्मा स्वयं ज्योतिः कार्य्यकरणविलक्षणस्तत्प्रयोजकाभ्यां कामकर्म्मभ्यां विलक्षणो यस्मादसङ्गो ह्ययं पुरुषोऽसङ्गत्वादित्ययमर्थः । स वा एष एतस्मिन् सम्प्रसाद इत्याद्याभिस्तिसृभिः कण्डिकाभिः प्रतिपादितः । तत्रासङ्गतैवात्मनः कुतो यस्माज्जागरितात् स्वप्नं स्वप्नाच्च सम्प्रसादं सम्प्रसादाच्च पुनः स्वप्नं क्रमेण बुद्धान्तं जागरितं बुद्धान्ताच्च पुनः स्वप्नान्तमित्येवमनुक्रमसञ्चारेण स्थानत्रयस्य व्यतिरेकः साधितः पूर्व्वञ्चोपन्यस्तोऽयमर्थः । स्वप्नो भूत्वेमं लोकमतिक्रामति मृत्यो रूपाणीति । तं विस्तरेण प्रतिपाद्य केवलं दृष्टान्तमात्रमवशिष्टं तद्वक्ष्यामीत्यारभ्यते । तत्त्रैतस्मिन्यथा प्रदर्शितोऽर्थे दृष्टान्तोऽयमुपादीयते यथा लोके महामत्स्यो महांश्चासौ मत्स्यश्च नादेयेन स्रोतसाऽहार्य्य इत्यर्थः । स्रोतश्च विष्टम्भयति । स्वच्छन्दचारी उभे कूले नद्याः

व्या० कण्डिकात्रयेण सिद्धमर्थमनुवदति । एवमिति ॥ आत्मनः स्थानत्रयसञ्चारादसिद्धोऽसङ्गत्वहेतुरित्याशङ्कते । तत्रेति । प्रतिज्ञाहेत्वोर्हेतुनिर्द्धारणं समभ्यर्थः ॥ सप्रयोजकत्वाद्देहद्वयाद्वैलक्षण्यन्तु दूरनिरस्तमित्येवशब्दार्थः । एवञ्चोदितहेतुसमर्थनार्थं महामत्स्यवाक्यमिति सङ्गतिमभिप्रेत्य सङ्गत्यन्तरमाह । पूर्व्वञ्चेति ॥ यथा प्रदर्शितोऽर्थोऽसङ्गत्वं कार्य्यकरणविनिर्म्मुक्तत्वञ्च

उ॰ तद्यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विप-

भा॰ पूर्व्वञ्चापरञ्चानुक्रमेण सञ्चरति । स सञ्चरन्नपि कूलद्वयं तन्मध्यवर्त्तिनोदकस्रोतोवेगेन न परवशीक्रियते । एवमेवायं पुरुष एतावुभा अन्ता अनुसञ्चरति । कौ तौ । स्वप्नान्तञ्च बुद्धान्तञ्च । दृष्टान्तप्रदर्शनफलं तु मृत्युरूपः कार्य्यकरणसङ्घातः । स ह तत्प्रयोजकाभ्यामनात्मधर्म्मोऽयञ्चात्मैतस्मादिलक्षण इति विस्तरतो व्याख्यातं ॥ १८ ॥

अत्र च स्थानत्रयानुसञ्चारेण स्वयं ज्योतिष आत्मनः कार्य्यकरणसङ्घातव्यतिरिक्तस्य कामकर्म्मभ्यां विविक्तताक्ता । अतो नायं संसारधर्म्मवानुपाधिनिमित्तमेव तस्य संसारित्वमविद्याध्यारोपितमित्येष समुदायार्थ उक्तः । तत्र च जायत्स्वप्नसुषुप्तस्थानानां त्रयाणां विप्रकीर्णरूप उक्तो न पुञ्जीकृत्यैकत्वदर्शितः । यस्माज्जागरिते संसक्तः स मृत्युः स कार्य्यकरणसङ्घात उपलक्ष्यतेऽविद्यया । स्वप्ने तु कामसंयुक्तो

आ॰ असहाय्यत्वमप्रकम्प्यत्वं स्वच्छन्दचारित्वं प्रकटयति । सञ्चरन्नपीति ॥ किं पुनर्दृष्टान्तेन दार्ष्टान्तिके लभ्यते तदाह । दृष्टान्तेति ॥ १८ ॥

श्येनवाक्यमवतारयितुं वृत्तं कीर्त्तयति । अत्र चेति ॥ पूर्व्वसन्दर्भः सप्तम्यर्थः । देहद्वयेन सप्रयोजकेन वस्तुतोऽसम्बन्धे फलितमाह । अत इति ॥ कथं तर्हि तत्र संसारित्वधीरित्याशङ्क्याह । उपाधीति ॥ औपाधिकस्यापि वस्तुत्वमाशङ्क्याह । अविद्येति ॥ वृत्तमनूद्योत्तरग्रन्थमवतारयन्भूमिकामाह । तत्रेति ॥ स्थानत्रयसम्बन्धित्वे विप्रकीर्णं विश्लिष्टं रूपमस्येत्यात्मा तथा पुञ्जीकृत्य विविच्चितं सर्व्वविशेषणमादायेति यावत् । एकत्वेति वाक्योक्तिः । तत्र हेतुं वदन् जायदाक्येन विवक्षि-

उ० रिपत्य श्रान्तः सꣳहत्य पक्षौ सल्लयायैव ध्रियत एवमेवायं पुरुष एतस्मा अन्ताय धावति यत्र

भा० मृत्युरूपविनिर्म्मुक्त उपलभ्यते पुनर्बुद्धान्तमागतो बुद्धान्ताच्च। सुषुप्ते सम्प्रसन्नोऽसङ्गो भवतीत्यसङ्गतापि दृश्यते। एकवाक्यतया तूपसञ्जिहीर्षमाणं फलं नित्यमुक्तबुद्धशुद्धस्वभावतास्य नैकत्र पुञ्जीकृत्य प्रदर्शितेति तत्प्रदर्शनाय कण्डिकाऽऽरभ्यते। सुषुप्ते ह्येवंरूपतास्य वक्ष्यमाणा इति। तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माभयं रूपमिति। यस्मादेवं रूपं विलक्षणं सुषुप्तं प्रविविच्चितमिति तत्कथमित्याह दृष्टान्तेनास्यार्थस्य प्रकटीभावो भवतीति। तत्र दृष्टान्त उपादीयते। तद्यथास्मिन्नाकाशे भौतिके श्येनो वा सुपर्णो वा। सुपर्णशब्देन क्षिप्रः श्येन उच्यते। यथाकाशेऽस्मिन् विहृत्य विपरिपत्य श्रान्तो नानापरिपतनल-

---

आ० तात्मोक्तिरित्याह। यस्मादिति॥ ससङ्गत्वादेर्दृश्यमानरूपस्य मिथ्यात्वं सूचयति। अविद्ययेति॥ स्वप्नवाक्येऽविवक्षितत्वात्तत्सिद्धिमाशङ्क्याह। स्वप्नेति॥ तर्हि सुषुप्तवाक्ये तत्सिद्धिर्नेत्याह। सुषुप्ते पुनरिति। तत्राप्यविद्यानिर्म्मोकेन प्रतिभातीति भावः॥ एवं पातनिकां कृत्वा श्येनवाक्यमादत्ते। एकवाक्यतयेति॥ पूर्व्ववाक्यानामिति शेषः। कुत्र तर्हि यथोक्तमात्मरूपं पुञ्जीकृत्य प्रदर्श्यते तत्राह। सुषुप्ते हीति॥ तत्राभयमित्यविद्याराहित्यमुच्यते सा च सुषुप्ते स्वरूपेण सत्यपि नाभिव्यक्ताभातीति द्रष्टव्यं। यस्मात्सुषुप्तेर्यथोक्तमात्मरूपं वक्ष्यते तस्मादिति यावत्॥ एवं रूपमित्येतदेव प्रकटयति। विलक्षणमिति॥ कार्य्यकारणविनिर्म्मुक्तं कामकर्म्माविद्यारहितमित्यर्थः। स्थानद्वयं हित्वा कथं सुषुप्तं

उ॰ सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति ॥ १९ ॥

भा॰ चरणेन कर्म्मणा परिखिन्नः संहत्य पक्षौ सङ्गमय्य सम्प्रसार्य्य पक्षौ सम्यग्लीयतेऽस्मिन्निति संलायो नीडो नीडायैव ध्रियते स्वात्मनैव धार्य्यते स्वयमेव यथायं दृष्टान्त एवमेवायं पुरुष एतस्मा एतस्मै अन्ताय धावति अन्तशब्दवाच्यस्य विशेषणं। यत्र यत्र यस्मिन्नन्ते सुप्तो न कञ्चन न कश्चिदपि कामं कामयते। तथा न कञ्चन स्वप्नं पश्यति न कञ्चन काममिति। स्वप्नबुद्धान्तयोरविशेषेण सर्व्वः कामः प्रतिषिध्यते कञ्चनेत्यविशेषिताभिधानात्। तथा न कञ्चन स्वप्नमिति। जागरितेऽपि यद्दर्शनं तदपि स्वप्नं मन्यन्ते। श्रुतिरत आह न कञ्चन स्वप्नं पश्यतीति। तथा च श्रुत्यन्तरं तस्य त्रय आवसथास्त्रयः स्वप्ना इति यथा दृष्टान्ते पक्षिणः परिपतनजश्रमापनुत्तये स्वनीडोपसर्पणमेवं जाग्र-

व्या॰ प्रवेष्टुमिच्छतीति पृच्छति। तत्कथमिति॥ स्वप्नादौ दुःखानुभवात्तत्त्यागेन सुषुप्तं प्राप्नोतीत्याह। व्याहेति॥ यथोक्तरा श्रुतिः स्थानात्स्थानान्तरप्राप्तिमभिधत्तां तथापि किं दृष्टान्तवचनेनेत्याशङ्क्याह। दृष्टान्तेनेति॥ वक्ष्यार्थस्य सुषुप्तिप्राप्तिरूपस्येत्येतत्। स एवार्थस्तत्रेति सम्बन्धः। परमात्माकाशं व्यावर्त्तयितुं भौतिकविशेषणं। महाकायो मन्दवेगः श्येनः सुपर्णस्तु वेगवानल्पविग्रह इति भेदः। धारणे सौकर्य्यं वक्तुं स्वयमेवेत्युक्तं। स्वप्नजागरितयोरवसानमन्तमव्यक्तं ब्रह्म। तथा न कञ्चन स्वप्नमिति स्वप्नजागरितयोरविशेषेण सर्व्वं दर्शनं निषिध्यत इति शेषः। स्वप्नविशेषणात् स्वाप्नदर्शननिषेधेऽपि कुतो जाग्रद्दर्शनं निषिध्यते

उ० ता वा अस्यैता हिता नाम नाड्यो यथा केशः

भा० स्वप्नयोः कार्य्यकरणसंयोगजक्रियाफलैः संयुज्यमानस्य पक्षिणः परिपतनज इव श्रमो भवति तच्छ्रमापनुत्तये स्वात्मनो नीडमायतनं सर्व्वसंसारधर्म्मविलक्षणं सर्व्वक्रिया-कारकफलायासशून्यं स्वयमात्मानं प्रविशति ॥ १९ ॥

यद्यस्यायं स्वभावः सर्व्वसंसारधर्म्मशून्यतापरोपाधि-निमित्तञ्चास्य संसारधर्म्मित्वं । यन्निमित्तञ्चास्य परोपा-धिकृतं संसारधर्म्मित्वं सा चाविद्या । तस्या अविद्यायाः किं स्वाभाविकत्वमाहोस्वित्कामकर्म्मादिवदागन्तुकत्वं । यदि चागन्तुकत्वं ततो विमोक्ष उपपद्यते तस्याश्चागन्तुकत्वे कोप-पत्तिः कथं वानात्मधर्म्मोऽविद्येति । सर्व्वानर्थवीजभूताया अविद्यायाः सतत्त्वावधारणार्थं परा कण्डिकाऽऽरभ्यते । ता

आ० तत्राह । जागरितेऽपीति ॥ कथमयमभिप्रायः श्रुतेरवगत इत्या-शङ्क्याविशेषणसामर्थ्यादित्याह । अत आहेति ॥ जागरित-स्यापि स्वप्नत्वे श्रुत्यन्तरं संवादयति । तथा चेति ॥ दृष्टान्तदा-र्ष्टान्तिकयोर्विवक्षितमंशं दर्शयति । यथेत्यादिना ॥ संयुज्यमा-नस्य क्षेत्रज्ञस्येति शेषः ॥ सर्व्वसंसारधर्म्मविलक्षणमिति विशे-षणं व्याचष्टे । सर्व्वेति ॥ १९ ॥

श्येनवाक्येनात्मनः सौषुप्तं रूपमुक्तमिदानीं नाडीखण्डस्य सम्बन्धं वक्तुं चोदयति । यद्यस्येति ॥ परः सन्नुपाधिबुद्ध्यादिरस-ङ्गत्वतः स्वतो बुद्ध्यादिसम्बन्धासम्भवमुपेत्याह । यन्निमित्तञ्चेति ॥ सिद्धान्ताभिप्रायमनूद्य पूर्व्ववादी विकल्पयति । तस्या इति ॥ आगन्तुकत्वमस्वाभाविकत्वं ॥ आद्ये मोक्षानुपपत्तिं विवक्षि-त्वाह । यदि चेति ॥ अस्तु तर्हि द्वितीयोऽत्र मोक्षोपपत्तेरित्या-शङ्क्याह । तस्याश्चेति ॥ माभूदविद्यात्मस्वभावस्तद्धर्म्मस्तु स्याद-

उ॰ सहस्रधा भिन्नस्तावताऽणिम्ना तिष्ठन्ति शुक्लस्य नीलस्य पिङ्गलस्य हरितस्य लोहितस्य पूर्णा

भा॰वा अस्य शिरःपाण्यादिलक्षणस्य पुरुषस्यैता हिता नाम नाड्यो यथा केशः सहस्रधा भिन्नस्तावता तावत्परिमाणेनाणिम्नाणुत्वेन तिष्ठन्ति ताश्च शुक्लस्य रसस्य नीलस्य पिङ्गलस्य हरितस्य लोहितस्य पूर्णा एतैः शुक्लत्वादिभी रसविशेषैः पूर्णा इत्यर्थः । एते च रसानां वर्णविशेषा वातपित्तश्लेष्मणामितरेतरसंयोगवैषम्यविशेषाद्विचित्रा बहवश्च भवन्ति । तास्वेवंविधासु नाडीषु सूक्ष्मासु बालाग्रसहस्रभेदपरिमाणासु शुक्लादिरसपूर्णासु सकलदेहव्यापिनीषु सप्तदशकं लिङ्गं वर्त्तते । तदाश्रिताः सर्व्वा वासना उच्चावचसंसारधर्मानुभवजनितास्तल्लिङ्गं वासनाश्रयं सूक्ष्मत्वात्स्वच्छं स्फटिकमणिकल्पं नाडीगतरसोपाधिसंसर्गवशाद्धर्म्माधर्म्मप्रेरितोद्भूतवृत्तिविशेषं स्त्रीरथहस्त्याद्याकार-

---

आ॰ स्यैन्तराभावादित्याह । कथं वेति ॥ तत्रोत्तरत्वेनोत्तरग्रन्थमुत्थापयति । सर्व्वानर्थेति ॥ तासां परमसूक्ष्मत्वं दृष्टान्तेन दर्शयति । यथेति ॥ कथमन्नरसस्य वर्णविशेषप्राप्तिरित्याशङ्क्याह । वातेति ॥ भुक्तस्यान्नस्य परिणामविशेषे वातबाहुल्ये नीलो भवति पित्ताधिक्ये पिङ्गलो जायते श्लेष्मातिशये शुक्लो भवति पित्ताल्पत्वे हरितः साम्ये च धातूनां लोहित इति तेषां मिथः संयोगवैषम्यात्तत्साम्याच्च विचित्रा बहवश्चान्नरसा भवन्ति तद्व्याप्तानां नाडीनामपि तादृशो वर्णो जायते । अरुणाः सिरा वातवहा नीलाः पित्तवहाः सिरा असृग्वहास्तु रोहिण्यो गौर्य्यः श्लेष्मवहाः सिरा इति सौश्रुतेर्दर्शनादित्यर्थः । नाडीस्वरूपं

उ० अथ यत्रैनं घ्नन्तीव जिनन्तीव हस्तीव विच्छाययति गर्त्तमिव पतति ॥

भा० विशेषैर्वासनादिभिः प्रत्यवभासते । अथैवं सति यत्र यस्मिन् काले केचन शात्रवाश्चान्ये वा तस्करा मामागत्य घ्नन्तीति मृषैव वासनानिमित्तः प्रत्ययोऽविद्याख्यो जायते तदेतदुच्यते । एनं स्वप्नदृशं घ्नन्तीवेति । तथा जिनन्तीव वशं कुर्वन्तीव । न केचन घ्नन्ति नापि वशीकुर्वन्ति केवलन्त्वविद्यावासनोद्भवनिमित्तं भ्रान्तिमात्रं । तथा हस्ती चैनं विच्छापयति विच्छादयति विद्रावयति धावतीवेत्यर्थो गर्त्तमिव पतति गर्त्तं जीर्णकूपादिकमिव प्रतन्तमात्मानमुपलक्षयति । तादृशी ह्यस्य मृषा वासनोद्भवति । अत्यन्तनिकृष्टा धर्मोद्भासितान्तःकरणवृत्त्याश्रया दुःखरूपत्वात् । किं बहुना यदेव जाग्रद्भयं पश्यति हस्त्यादिलक्षणं तदेव

आ० निरूप्य तत्र जागरिते लिङ्गशरीरस्य वृत्तिं दर्शयति । तास्विति ॥ एवम्विधास्वित्यस्यैव विवरणं । सूक्ष्मास्वित्यादि ॥ पञ्चभूतानि दशेन्द्रियाणि प्राणोऽन्तःकरणमिति सप्तदशकं ॥ जागरिते लिङ्गशरीरस्य स्थितिमुक्त्वा स्वाप्नीं तत्स्थितिमाह । तल्लिङ्गमिति ॥ विवक्षितां स्वप्ने स्थितिमुक्त्वा श्रुत्यक्षराणि योजयति । अथेत्यादिना ॥ स्वप्ने धर्मादिनिमित्तवशान्मिथ्यैव लिङ्गं नानाकारमवभासते तन्मिथ्याज्ञानं लिङ्गानुगतमूलाविद्याकार्य्यत्वादविद्येति स्थिते सतीत्यथशब्दार्थमाह । एवं सतीति ॥ तस्मिन्काले स्वप्नदर्शनं विज्ञेयमिति शेषः ॥ इवशब्दार्थमाह । नेत्यादिना ॥ उक्तोदाहरणेन समुच्चित्योदाहरणान्तरमाह । तथेति ॥ गर्त्तादिपतनप्रतिपत्तौ हेतुमाह ।

उ० यदेव जाग्रद्भयं पश्यति तदत्राविद्यया मन्यते

भा०भयरूपमत्रास्मिन् स्वप्ने विनैव हस्त्यादिरूपं भयमविद्यावासनया स्वयैवोद्भूतया मन्यते।

अथ पुनर्यत्राविद्यापकृष्यमाणा विद्या चोत्कृष्यमाणा किंविषया किंलक्षणा वेत्युच्यतेऽथ पुनर्यत्र यस्मिन् काले देव इव स्वयं भवति देवताविषया विद्या यदोद्भूता जागरितकाले तदोद्भूतया वासनया देवमिवात्मानं मन्यते स्वप्नेऽपि तदुच्यते। देव इव राजेव राज्यस्थोऽभिषिक्तः स्वप्नेऽपि राजाहमिति मन्यते। राजवासनावासित एवमत्यन्तप्रचीयमाणा विद्योद्भूता च विद्या सर्व्वात्मविषया। तदा स्वप्नेऽपि तद्भावभावितोऽहमेवेदं सर्व्वमस्मीति मन्यते। स यः सर्व्वात्मभावः सोऽस्यात्मनः परमो लोकः परम आत्मभावः स्वाभाविकः। यत्तु सर्व्वात्मभा-

व्या० तादृशो हीति। तादृशत्वं विशदयति। अत्यन्तेति॥ यथोक्तवासनाप्रभवत्वं कथं गर्त्तपतनादेरवगतिमित्याशङ्क्याह। दुःखेति॥ यदेवेत्यादिश्रुतेरर्थमाह। किं बह्नेति॥ भयमित्यस्य भयरूपमिति व्याख्यानं। भयं रूप्यते तेन तत्कारणं तथा हस्त्यादि नास्ति चेत्कथं स्वप्ने भातीत्याशङ्क्याह। अविद्येति॥ अथ यत्र देव इवेत्यादेस्तात्पर्य्यमाह। अथेति॥ तत्र तस्याः फलमुच्यत इति शेषः॥ तात्पर्य्योक्त्यायशब्दार्थमुक्त्वा विद्याया विषयस्वरूपे प्रश्नपूर्व्वकं वदन्यत्रेत्यादेरर्थमाह। किं विषयेति॥ इवशब्दप्रयोगात्स्वप्न एवोक्त इति शङ्कां वारयति। देवतेति॥ विद्येत्युपास्तिरुक्ता। अभिषिक्तो राज्यस्थो जाग्रदवस्थायामिति शेषः॥ अहमेवेदमित्याद्यवतारयति। एवमिति॥ यथा विद्यायामपकृ-

उ० अथ यत्र देव इव राजेवाहमेवेदꣳ सर्वोऽस्मीति मन्यते सोऽस्य परमो लोकः ॥ २० ॥

भा० वादर्वाग्वालाग्रमात्रमप्यन्यत्वेन दृश्यते नाहमस्मीति। तद-वस्थाऽविद्या तयाऽविद्यया ये प्रत्युपस्थापिता अनात्मभावा लोकास्तेऽपरमाःस्थावरान्तास्तान् संव्यवहारविषयाँल्लोका-नपेक्ष्य अयं सर्व्वात्मभावः समस्तोऽनन्तरो वाह्यः सोऽस्य परमो लोकस्तस्मादपकृष्यमाणायामविद्यायां विद्यायाञ्च काष्ठां गतायां सर्व्वात्मभावो मोक्षः। यथा स्वयं ज्योतिष्ट्वं स्वप्ने प्रत्यक्षत उपलभ्यते तद्वद्विद्याफलमुपलभ्यत इत्यर्थः। तथाऽविद्यायामप्युत्कृष्यमाणायां तिरोधीयमानायाञ्च विद्यायामविद्यायाः फलं प्रत्यक्षत उपलभ्यते। अथ यत्रैनं घ्नन्तीव जिनन्तीवेति। त एते विद्याविद्ये कार्य्ये सर्व्वात्मभावः परिच्छिन्नात्मभावश्च। विद्यया शुद्धया सर्व्वात्मा भवति। अविद्यया चासर्व्वो भवति। अन्यतः कुतश्चित्प्रविभक्तो भवति।

आ० ष्यमाणायां कार्य्यमुक्तं तद्वदित्यर्थः। यदेति जागरितोक्तिः। इदं चैतन्यमहं चिन्मात्रमेव न तु मदतिरिक्तोऽस्ति तस्मादहं पूर्णोऽस्मीति जानातीत्यर्थः॥ सर्व्वात्मभावस्य परमत्वमुपपादयति। यत्त्वित्यादिना॥ तत्र तेनाकारेणाविद्यावस्थितेत्याह। तदवस्थेति॥ तस्याः कार्य्यमाह। तयेति॥ समस्तत्वं पूर्णत्वमनन्तरत्वमेकरसत्वं। अवाह्यत्वं प्रत्युक्तं। योऽयं यथोक्तो लोकः सोऽस्यात्मनो लोका-त्पूर्व्वोक्तानपेक्ष्य परम इति सम्बन्धः॥ वाक्यार्थमुपसंहरति। तस्मादिति। मोक्षो विद्याफलमित्युत्तरत्रसम्बन्धः॥ तस्य प्रत्य-क्षत्वं दृष्टान्तेन स्पष्टयति। यथेति। विद्याफलवदविद्याफलमपि स्वप्ने प्रत्यक्षमित्युक्तमनुवदति। तथेति॥ विद्याफलमविद्याफल-

भा॰ यतो विभक्तो भवति तेन विरुध्यते। विरुद्धत्वाद्धन्यते जीयते विच्छाद्यते चासर्व्वविषयत्वे च भिन्नत्वादेतद्भवति समस्तस्य सन् कुतो भिद्यते केन विरुध्यते येन विरुध्येत विरोधाभावात् केन हन्यते जीयते विच्छाद्यते च।

अत इदमविद्यायाः सतत्त्वमुक्तं भवति। सर्व्वात्मानं सन्तमसर्व्वात्मत्वेन ग्राहयत्यात्मनोऽन्यद्वस्त्वन्तरमविद्यमानं प्रत्युपस्थापयति। आत्मनः सर्व्वमापादयति। ततस्तद्विषयः कामो भवति। यतो भिद्यते कामतः क्रियामुपादत्ते ततः फलं। तदेतदुक्तं वक्ष्यमाणं च यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्यादि। इदमविद्यायाः सतत्त्वं सहकार्य्येण प्रदर्शितं। विद्यायाश्च कार्य्यं सर्व्वात्मभावः प्रदर्शितोऽ

आ॰ च्छेद्युक्तमुपसंहरति। ते एते इति॥ उक्तं फलद्वयं विभजते। विद्ययेति॥ असर्व्वो भवतीत्येतत्प्रकटयति। अन्यत इति॥ अविभागे फलमाह। यत इति॥ विरोधफलं कथयति। विरुद्धत्वादिति॥

अविद्याकार्य्यं निगमयति। असर्व्वेति। अविद्यायाश्चेत्परिच्छिन्नफलत्वं तदा तस्य भिन्नत्वादेव यथोक्तं विरोधादिदुर्व्वारमित्यर्थः॥ विद्याफलं निगमयति। समस्तस्त्विति। नन्वविद्यायाः सतत्त्वं निरूपयितुमारब्धं न च तदद्यापि दर्शितं तथा च किं कृतं स्यादत आह। अत इति॥ कार्य्यवशादिति यावत्॥ इदं शब्दार्थमेव स्फुटयति। सर्व्वात्मानमिति॥ ग्राहकत्वमेव व्यनक्ति। आत्मन इति॥ वस्त्वन्तरोपस्थितिफलमाह। तत इति॥ कामस्य कार्य्यमाह। कामत इति॥ क्रियातः फलं लभते तद्भोगकाले च रागादिना क्रियामादधातीत्यविच्छिन्नः संसारस्तावन्न सम्यग्ज्ञानं तावन्मिथ्याज्ञाननिदानमविद्या दुर्व्वारेत्याह। तत इति॥ भेददर्शननिदानमविद्येति अविद्यासूत्रे स्थितमि-

उ॰ तद्वा अस्यैतदतिच्छन्दा अपहतपाप्मा ऽभयꣳ रूपं ।

भा॰ विद्याविपर्य्ययेण । सा चाविद्या नात्मनः स्वाभाविको धर्मो यस्माद्विद्यायामुत्कृष्यमाणायां स्वयमपचीयमाना सती काष्ठां गतायां विद्यायां परितिष्ठते सर्व्वात्मभावे सर्व्वात्मना निवर्त्तते रज्ज्वामिव सर्पज्ञानं रज्जुनिश्चये । तच्चोक्तं । यत्र त्वस्य सर्व्वमात्मैवाभूत्तत्केन कं पश्येदित्यादि । तस्मान्नात्मधर्मोऽविद्या । न हि स्वाभाविकस्योच्छित्तिः कदाचिदप्युपपद्यते सवितुरिवौष्ण्यप्रकाशयोः । तस्मात्तस्य मोक्ष उपपद्यते ॥ २० ॥

इदानीं योऽसौ सर्व्वात्मभावो मोक्षो विद्याफलं क्रियाकारकफलशून्यं स प्रत्यक्षतो निर्द्दिश्यते । यत्राविद्याकाम-

---

आ॰ त्याह । तदेतदिति ॥ तत्रैव वाक्यशेषमनुकूलयति । वक्ष्यमाणञ्चेति ॥ अविद्यात्मनः स्वभावो न वेति विचारे किं निर्णीतं भवतीत्याशङ्क्य वृत्तं कीर्त्तयति । इदमिति ॥ अविद्यायाः परिच्छिन्नफलत्वमस्ति ततो वैपरीत्येन विद्यायाः कार्य्यमुक्तं स च सर्व्वात्मभावो दर्शित इति योजना ॥ सम्प्रति निर्णीतमर्थं दर्शयति । सा चेति ॥ ज्ञाने सत्यविद्यानिवृत्तिरित्यत्र वाक्यशेषं प्रमाणयति । तच्चेति ॥ अविद्या नात्मनः स्वभावो निवर्त्त्यत्वाद्रज्जुसर्पवदित्याह । तस्मादिति ॥ निवर्त्त्यत्वेऽप्यात्मस्वभावत्वे का हानिरित्याशङ्क्याह । न हीति ॥ अविद्यायाः स्वाभाविकत्वाभावे फलितमाह । तस्मादिति ॥ २० ॥

तद्वा अस्यैतदित्यनन्तरवाक्यतात्पर्य्यमाह । इदानीमिति । विद्याविद्ययोस्तत्फलयोश्च प्रदर्शनानन्तरमिति यावत् ॥ मोक्षमेव विशिनष्टि । यत्रेति । पदद्वयस्यान्वयं दर्शयन्विवक्षितमर्थ-

भा॰ कर्म्माणि न सन्ति। तदेतत्प्रस्तुतं यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यतीति। तद्वा अस्य रूपं। यः सर्व्वात्मभावः सोऽस्य परमो लोक इत्युक्तस्तदतिच्छन्दा अतिच्छन्दमित्यर्थः। रूपपरत्वाच्छन्दः कामोऽतिगतः छन्दोऽस्मिन् * रूपे तदतिच्छन्दं रूपं। अन्योऽसौ असन्तः छन्दःशब्दो गायत्र्यादिच्छन्दोवाची। अयन्तु कामवचनोऽतः स्वरान्त एव। तथाप्यतिच्छन्दा इति पाठः स्वाध्यायधर्म्मो द्रष्टव्यः। अस्ति च लोके कामवचनप्रयुक्तः छन्दःशब्दः स्वच्छन्दः परच्छन्द इत्यादौ अतोऽतिच्छन्दमित्येवमुपनेयं कामवर्जितमेतद्रूपमित्यस्मिन्नर्थे। तथापहतपाप्मा। पाप्मशब्देन धर्म्माधर्म्मावुच्येते। पाप्मभिः संसृज्यते। पाप्मनो

आ॰ माह। तदेतदिति। यत्रेत्यन्तशब्दितं सम्बोध्यते॥ व्याख्यातं पदद्वयमनूद्य वैशब्दस्य प्रसिद्धार्थत्वं मन्वानो रूपशब्देन षष्ठ्याः सम्बन्धं दर्शयति। तदिति॥ अतिच्छन्दमिति प्रयोगे हेतुमाह। रूपपरत्वादिति॥ कथमतिच्छन्दमित्यात्मरूपं विवक्ष्यते तत्राह। छन्द इति॥ छन्दःशब्दस्य गायत्र्यादिच्छन्दोविषयस्य कथं कामविषयत्वमित्याशङ्क्याह। अन्योऽसाविति॥ गायत्र्यादिविषयत्वं त्यक्त्वा छन्दःशब्दस्य कामविषयत्वमतःशब्दार्थः। यद्यात्मरूपं कामवर्जितमित्येतदत्र विवक्षितं किमिति तर्हि दैर्घ्यं प्रयुज्यते तत्राह। तथापीति। स्वाध्यायधर्म्मत्वं छान्दसत्वं। वृद्धव्यवहारमन्तरेण कामवाचित्वं छन्दःशब्दस्य कथमित्याशङ्क्याह। अस्ति चेति॥ तस्य कामवचनत्वे सति सिद्धं पदरूपमनूद्य तस्यार्थमुपसंहरति॥ अत इति॥ तथा कामवर्जितत्ववदित्येतत्। नन्वत्राधर्म्मवर्जितत्वमेव प्रतीयते न धर्म्मवर्जितत्वं पाप्मशब्दस्य अधर्म्म-

---

* यस्माद्रूपादित्यर्थः।

भा० विजहातीत्युक्तत्वात्। अपहतपाप्मा धर्म्माधर्म्मवर्जितमित्येतत्किञ्चाभयं। भयं हि नामाविद्याकार्य्यं। अविद्यया भयं मन्यत इति ह्युक्तं। तत्कार्य्यद्वारेण कारणप्रतिषेधोऽयमभयं रूपमित्यविद्यावर्जितमित्येतत्। यदेतद्विद्याफलं सर्व्वात्मभावस्तदेतदतिच्छन्दापहतपाप्मा भयं रूपं सर्व्वसंसारधर्म्मवर्जितमतो भयं रूपमेतत्। इदञ्च पूर्व्वमेवोपन्यस्तमतीतानन्तरब्राह्मणसमाप्तौ। अभयं वै जनक प्राप्तोऽसीत्यागमतः। इह तु तर्कतः प्रपञ्चितं। दर्शितागमार्थप्रत्ययदार्ढ्याय। अयमात्मा स्वयं चैतन्यज्योतिःस्वभावः सर्व्वं स्वेन चैतन्यज्योतिषावभासयति। स यत्तत्र किञ्चित्पश्यति रमते चरति जानाति चेत्युक्तं। अतः स्थितञ्चैतन्यायतो नित्यं स्वरूपं चैतन्यज्योतिष्ट्वमात्मनः॥

व्या० मात्रवचनत्वादत आह। पाप्मशब्देनेति॥ उपक्रमानुसारेण पाप्मशब्दयोर्भयविषयत्वे विशेषणमनूद्य विवक्षितमर्थं कथयति। अपहतेति॥ तर्हि कार्य्यमेवाविद्याया निषिध्यते नेत्याह। तत्कार्य्येति॥ तस्मादर्थे तच्छब्दः॥ वाक्यार्थमुपसंहरति। यदेतदिति॥ कूर्चब्राह्मणान्तेऽपीदमुक्तमित्याह। इदञ्चेति॥ आगमवशात्तत्रोक्तं चेत्किमित्यत्र पुनरुच्यते तत्राह। इह त्विति॥ सविशेषत्वं चेदात्मत्वानुपपत्तिरित्यादिस्तर्कः। आगमसिद्धे किं तर्कोपन्यासेनेत्याशङ्क्याह। दर्शितेति॥ स्वोवाक्यस्य सङ्गतिं वक्तुं वृत्तमनुद्रवति। अयमिति॥ अनन्वागतवाक्ये चात्मनश्चैतन्यत्वमुक्तमित्याह। स यदिति॥ आत्मनः सदा चैतन्यज्योतिष्ट्वं स्वरूपं न केवलमुक्तादागमादेव सिद्धं किन्तु पूर्व्वोक्तादनुमानाच्च स्थितमित्याह। अतः स्थितञ्चेति॥

उ॰ तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं

भा॰ स यद्यात्माऽविनष्टः स्वेनैव रूपेण वर्त्तते कस्मादयमहमस्मीत्यात्मानं वा बहिर्वेमानि भूतानीति जाग्रत्स्वप्नयोरिव न जानातीत्यत्रोच्यते । शृणु तत्राज्ञानहेतुमेकत्वमेवाज्ञानहेतुस्तत्कथमित्युच्यते । दृष्टान्तेन हि प्रत्यक्षीभवति विवक्षितोऽर्थ इत्याह । तत्तत्र यथा लोके प्रिययेष्टया स्त्रिया सम्परिष्वक्तः सम्यक् परिष्वक्तः कामयन्त्या कामुकः सन्न बाह्यमात्मनः किञ्चन किञ्चिदपि न वेद मत्तोऽन्यदस्तीति । न चान्तरमयमहमस्मि सुखी दुःखी चेति अपरिष्वक्तस्तु तया प्रविभक्तो जानाति । सर्वमेव बाह्यमभ्यन्तरञ्च । परिष्वङ्गोत्तरकालन्त्वेकत्वापत्तेर्न जानाति । एवमेव यथादृष्टान्तोऽयं पुरुषः क्षेत्रज्ञो भूतमात्रासंसर्गतः

आ॰ वृत्तमनूद्य सम्बन्धं वक्तुं कामश्चोदयति । स यदीति ॥ अत्रेति सुषुप्तिरुक्ता । चैतन्यस्वभावस्यैव सुषुप्ते विशेषज्ञानाभावं साधयति । उच्यत इति ॥ सुषुप्तिः सप्तम्यर्थः ॥ अज्ञानं विशेषज्ञानाभावः । कोऽसावज्ञानहेतुस्तमाह । एकत्वमिति ॥ जीवस्य परेणात्मना यदेकत्वं तत्कथं सुषुप्ते विशेषज्ञानाभावे कारणं तस्मिन्सत्यपि चैतन्यस्वभावानिवृत्तेरिति शङ्कते । तत्कथमिति ॥ तत्र श्रौतवाक्यमुत्तरत्वेनोत्थापयति । उच्यत इति ॥ तत्र दृष्टान्तभागमाचष्टे । दृष्टान्तेनेति ॥ एकत्वकृतो विशेषज्ञानाभावो विवक्षितोऽर्थः ॥ परिष्वङ्गप्रयुक्तसुखाभिनिवेशादज्ञानं किमिति कल्प्यते स्वाभाविकमेव तत्किं न स्यादित्याशङ्क्याह । अपरिष्वक्तस्त्विति ॥ तर्हि परिष्वङ्गवतोऽपि स्वभावविपरिलोपासम्भवाद्विशेषविज्ञानं स्यादिति चेन्नेत्याह । परिष्वङ्गेति ॥ स्त्रीपुंसत्व-

उ॰ किञ्चन वेद नान्तरमेवायं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरं ॥

भा॰ सैन्धवखिल्यवत्प्रविभक्तो जलादौ चन्द्रादिप्रतिबिम्बवत्कार्य्यकरण इह प्रविष्टः सोऽयं पुरुषः प्राज्ञेन परमार्थेन स्वाभाविकेन स्वेनात्मना परेण ज्योतिषा सम्परिष्वक्तः सम्यक् परिष्वक्त एकीभूतो निरन्तरः सर्व्वात्मा न बाह्यं किञ्चन वस्त्वन्तरं नाप्यान्तरमात्मन्ययमहमस्मि सुखी दुःखी वेति वेद तत्र चैतन्यज्योतिःस्वभावत्वे कस्मादिह न जानातीति यदप्राक्षीस्तत्रायं हेतुर्मयोक्तः । एकत्वं यथा स्त्रीपुंसयोः सम्परिष्वक्तयोः । तत्रार्थान्नानात्वं विशेषविज्ञानहेतुरित्युक्तं भवति ॥

आ॰ द्वयोर्व्यामिश्रत्वं परिष्वङ्गस्तदुत्तरकालं सम्भोगफलप्राप्तिरेकत्वापत्तिस्तद्दशायां विशेषाज्ञानमित्यर्थः । दार्ष्टान्तिकं व्याकरोति । एवमेवेति ॥ भूतमात्राः शरीरेन्द्रियलक्षणास्ताभिश्चिदात्मनस्तादात्म्याध्यासात्तत्प्रतिबिम्बो जातस्ततो विभक्तवद्भातीत्यत्र दृष्टान्तमाह । सैन्धवेति ॥ तस्य देहादौ प्रवेशं दृष्टान्तेन दर्शयति । जलादाविति ॥ उपसर्गबललभ्यमर्थं कथयति । एकीभूत इति । तादात्म्यं व्यावर्त्तयितुं निरन्तर इत्युक्तं । परमात्माभेदप्रयुक्तमनवच्छिन्नत्वमाह । सर्व्वात्मेति ॥ एवं स्त्रीवाक्याक्षराणि व्याख्याय चोद्यपरिहारं प्रकटयति । तत्रेति ॥ प्रत्यगात्मनीति यावत् । इहेति सुषुप्तिरुच्यते । यथा परिष्वक्तयोः स्त्रीपुंसयोरेकत्वं पुंसो विशेषविज्ञानाभावे तस्य तत्र कारणमुक्तमित्यर्थः ॥ स्त्रीवाक्ये श्रौतमर्थमभिधायार्थिकमर्थमाह । तत्रेति ॥

उ० तद्वा अस्यैतदाप्तकाममात्मकाममकामꣳ रूपꣳ शोकान्तरं ॥ २१ ॥

भा० नानात्वे च कारणमात्मनो वस्त्वन्तरस्य प्रत्युपस्थापिकाविद्येत्युक्तं तत्र चाविद्याया यदा प्रविविक्तो भवति तदा सर्व्वैकत्वमेवास्य भवति । ततश्च ज्ञानज्ञेयादिकारकविभागेऽसति कुतो विशेषविज्ञानप्रादुर्भावः कामो वा सम्भवति स्वाभाविके स्वरूपस्थ आत्मज्योतिषि । यस्मादेवं सर्व्वैकत्वमेवास्य रूपमतस्तद्वै अस्यात्मनः स्वयं ज्योतिः स्वभावस्यैतद्रूपमाप्तकामं यस्मात्समस्तमेतत्तस्मादाप्ताः कामा अस्मिन्रूपे तदिदमाप्तकामं यस्य ह्यन्यत्वेन प्रविभक्तः कामस्तदनाप्तकामं भवति । यथा जागरितावस्थायां देवदत्तादिरूपं । न त्विदं तथा कुतश्चित्प्रविभज्यतेऽतस्तदाप्त-

---

व्या० किं पुनर्नानात्वे कारणमिति तदाह । नानात्वे चेति ॥ उक्तमथ योन्यामित्यादावित्यर्थः ॥ किमेतावता सुषुप्ते विशेषविज्ञानाभावस्थायात्तं तत्राह । तत्रेति ॥ विशेषविज्ञाने नानात्वं तत्र चाविद्याकारणमिति स्थिते सतीति यावत् ॥ यदा तदेति सुषुप्तिर्विवक्षिता । प्रविविक्तत्वं कार्य्यकरणाविद्याविरहित्वं । सर्व्वेण पूर्व्वेण परमात्मना सहेत्यर्थः । विज्ञानात्मा षष्ठ्यार्थते ॥ एकत्वफलमाह । ततश्चेति ॥ उक्तमुपजीव्याप्तकामवाक्यमवतार्य्य व्याचष्टे । यस्मादिति ॥ आत्मकामत्वं समर्थयते । यस्मात्समस्तमिति ॥ तदेव व्यतिरेकमुखेन विशदयति । यस्य हीत्यादिना ॥ विशेषणान्तरमाकाङ्क्षापूर्व्वकमादाय व्याचष्टे । किमन्यस्मादित्यादिना ॥ सुषुप्तेरन्यत्रात्मनः सकाशादन्यत्वेन प्रविभक्ता इव काम्यमानाः सुषुप्तावात्मैव कामास्तस्मादात्मकाममात्मरूपमित्येत-

उ० अत्र पिताऽपिता भवति माताऽमाता लोका अलोका देवा अदेवा वेदा अवेदाः ॥

भा० कामं भवति। किमन्यस्मादस्त्वन्तरान्न प्रविभज्यते आहो-स्विदात्मैव तद्वस्त्वन्तरमत आह। नान्यदस्त्यात्मनः कथ-यत आत्मकाममात्मैव कामा यस्मिन्रूपे येऽन्ये प्रविभक्ता इवान्यत्वेन काम्यमाना यथा जाग्रत्स्वप्नयोस्तेऽस्यात्मैवान्यत्व-प्रत्युपस्थापकहेतोरविद्याया अभावादात्मकाममत एवा-काममेतद्रूपं काम्यविषयाभावाच्छोकान्तरं शोकच्छिद्रं शोकशून्यमित्येतच्छोकमध्यमिति वा सर्व्वथाप्यशोकमे-तद्रूपं शोकवर्जितमित्यर्थः ॥ २१ ॥

प्रकृतः स्वयंज्योतिरात्मा अविद्याकामकर्मविनिर्मुक्त इत्युक्तं। असङ्गत्वादात्मन आगन्तुकत्वाच्च तेषां तच्चैवा

आ० दृष्टान्तेनाह। यथेति ॥ अवस्थाद्वये खल्वात्मनः सकाशादन्यत्वेन प्रविभक्ता इव काम्याः काम्यन्त इति कामाः। नैवं सुषुप्त्यवस्था-यामात्मनस्ते भिद्यन्ते किन्तु सुषुप्तस्यात्मैव कामा इत्यात्मकामं तद्रूपमित्यर्थः। तस्यात्मैवेत्यत्र हेतुमाह। अन्यत्वेनेति ॥ यद्यपि सुषुप्तेऽविद्या विद्यते तथापि न साभिव्यक्तास्तीत्यनर्थपरिहारोप-पत्तिरित्यर्थः। कामानामात्माश्रयत्वपक्षं प्रतिक्षेप्तुं तृतीयं विशे-षणं। शोकमध्यं शोकस्यान्तरं प्रत्यग्भूतमिति यावत्। तर्हि शोकवत्त्वं प्राप्तं नेत्याह। सर्व्वथेति ॥ पक्षद्वयेऽपि शोकशून्यमा-त्मरूपं। न हि शोको येनात्मवांस्तस्य शोकवत्त्वं शोकस्यात्मा-धीनसत्त्वास्फुर्त्तेरात्मातिरेकेणाभावादित्यर्थः ॥ २१ ॥

अत्र पितेत्यादि वाक्यमवतारयितुं वृत्तमनुद्रवति। प्रकृत इति ॥ अविद्यादिनिर्म्मोके हेतुद्वयमाह। असङ्गत्वादिति ॥ यद्यपि

भा॰ शङ्का जायते। चैतन्यस्वभावत्वे सत्यप्येकीभावान्न जानाति स्त्रीपुंसयोरिव सम्परिष्वक्तयोरित्युक्तं। तत्र प्रासङ्गिकमेतदुक्तं कामकर्मादिवत् स्वयं ज्योतिष्ट्वमप्यस्यात्मनो न स्वभावः। यस्मात् सम्प्रसादेनोपलभ्यत इत्याशङ्कायां प्राप्तायां तन्निराकरणाय स्त्रीपुंसयोर्दृष्टान्तोपादानेन विद्यमानस्यैवं स्वयं ज्योतिष्ट्वस्य सुषुप्तेऽग्रहणमेकीभावाद्धेतोर्न तु कामकर्मादिवदागन्तुकं। इत्येतत्प्रासङ्गिकमभिधाय यत्प्रकृतं तदेवानुप्रवर्त्तयति। अत्र चैतत्प्रकृतमविद्याकामकर्मविनिर्मुक्तमेव तद्रूपं। यत्सुषुप्त आत्मनो गृह्यते प्रत्यक्षत इति तदेतद्यथाभूतमेवाभिहितं सर्व्वसम्बन्धाधीनमेतद्रूपमिति। यस्मादत्रैतस्मिन् सुषुप्तस्थानेऽतिच्छन्दापहतपाप्माभयमेतद्रूपं तस्मादत्र पिता जनकः। तस्य च जनयितृत्वाद्यत्पितृत्वं पुत्रं प्रति तत्कर्मनिमित्तं तेन च

आ॰ नागन्तुकत्वमविद्याया युक्तं तथाप्यभिव्यक्ता सानर्थहेतुरागन्तुकीति द्रष्टव्यं। स्त्रीवाक्यनिरस्याशङ्कामनुवदति। तत्रेति॥ कामादिविमोक्षे दर्शिते सतीति यावत्॥ स्वभावस्यापायो न सम्भवतीत्यभिप्रेत्य हेतुमाह। यस्मादिति॥ शङ्कोत्तरत्वेन स्त्रीवाक्यमवतार्य्य तत्तात्पर्य्यं पूर्व्वोक्तमनुकीर्त्तयति। एवं स्वयमिति॥ विद्यमानस्येति वृत्तमनूद्योत्तरग्रन्थमुत्थापयति। इत्येतदिति॥ स्वयं ज्योतिष्ट्वस्य स्वाभाविकत्वमेतच्छब्दार्थः। प्रासङ्गिकं कामादेरागन्तुकत्वोक्तिः। प्रसङ्गादागतमिति यावत्॥ प्रकृतमेव दर्शयति। अत्र चेति॥ अतिच्छन्दादिवाक्यं सप्तम्यर्थः। प्रत्यक्षतः स्वरूपचैतन्यबलाद्यथोक्तात्मरूपस्य सुषुप्ते गृह्यमाणमुत्थितस्य परामर्शमवधेयं॥ कामादिसम्बन्धवशात्मनस्तद्रहितमपि रूपं कल्पितमेवेत्याशङ्क्याह। तदेतदिति॥ प्रकृतमर्थमुक्तोत्तरवाक्यस्य-

भा० कर्म्मणाऽयमसम्बद्धोऽस्मिन् काले । तस्मात्पिता पुत्रसम्बन्धनिमित्तस्य कर्म्मणो विनिर्मुक्तत्वात् पिताप्यपिता भवति। तथा पुत्रोऽपि पितुरपुत्रो भवतीति सामर्थ्याद्गम्यते । उभयोर्हि सम्बन्धनिमित्तं कर्म्म । तदयमतिक्रान्तो वर्त्ततेऽपहतपाप्मेति ह्युक्तं । तथा माताऽमाता । लोकाः कर्म्मणा जेतव्या जिताश्च । तत्कर्म्मसम्बन्धाभावाल्लोका अलोकाः। तथा देवाः कर्म्माङ्गभूतास्तत्कर्म्मसम्बन्धात्यया देवा अदेवाः । तथा वेदाः साध्यसाधनसम्बन्धविधायकाः ब्राह्मणलक्षणा मन्त्रलक्षणाश्चाभिधायत्वेन कर्म्माङ्गभूता अधीता अध्येतव्याश्च । कर्म्मनिमित्तमेव सम्बध्यन्ते पुरुषेण। तत्कर्म्मातिक्रमणादेतस्मिन्काले वेदा अप्यवेदाः सम्पद्यन्ते ॥

व्या० समम्यर्थमाह । अत्रैतस्मिन्निति ॥ जनकोऽप्यत्राप्यपिता भवतीति सम्बन्धः ॥ पिताप्यत्रापिता भवतीत्युपपादयति । तस्येत्यादिना ॥ यथा यस्मिन्काले तत्पिता पुत्रस्यापिता भवति तद्वदित्याह । तथेति ॥ नास्यार्थस्य प्रतिपादकः शब्दोऽस्तीत्याशङ्क्याह । सामर्थ्यादिति ॥ तदेव सामर्थ्यं दर्शयति । उभयोरिति ॥ सुषुप्ते कर्म्मातिक्रमे प्रमाणमाह । अपहतेति ॥ पुनर्लोकवेदशब्दावनुवादार्थौ ॥ वाक्यान्तरमादाय व्याचष्टे । तथेत्यादिना ॥ साध्यसाधनसम्बन्धाभिध्यायका ब्राह्मणलक्षणा इति शेषः । अभिधायकत्वेन प्रमाणत्वेन प्रमेयत्वेन चेत्यर्थः ॥

उ॰ अत्र स्तेनोऽस्तेनो भवति भ्रूणहाऽभ्रूणहा चाण्डालोऽचाण्डालः पौल्कसोऽपौल्कसः श्रमणोऽश्रमणस्तापसोऽतापसोऽनन्वागतं पुण्येनानन्वागतं

भा॰ न केवलं शुभकर्म्मसम्बन्धातीतः। किन्तर्हि अशुभैरप्यत्यन्तघोरैः कर्म्मभिरसम्बद्ध एवायं वर्त्तत इत्येतमर्थमाहात्र स्तेनो ब्राह्मणसुवर्णहर्त्ता भ्रूणहासहपाठादवगम्यते। स तेन घोरेण कर्म्मणैतस्मिन्काले विनिर्म्मुक्तो भवति। येनायं कर्म्मणा महापातकी स्तेन उच्यते तथा भ्रूणहाऽभ्रूणहा तथा चाण्डालो न केवलं प्रत्युत्पन्नेनैव कर्म्मणा विनिर्म्मुक्तः। किं तर्हि सहजेनाप्यत्यन्तनिकृष्टजातिप्रापकेणापि विनिर्म्मुक्त एवायं। चाण्डालो नाम शूद्रेण ब्राह्मण्यामुत्पन्नः चाण्डाल एव चाण्डालः स जातिनिमित्तेन कर्म्मणासम्बद्धत्वादचाण्डालो भवति। पौल्कसः पुल्कस एव पौल्कसः शूद्रेणैव क्षत्रियायामुत्पन्नः। तथा सोऽप्यपुल्कसो

व्या॰ अत्र स्तेनोऽस्तेनो भवतीत्यादेस्तात्पर्य्यमाह। न केवलमिति॥ स्तेनशब्दोऽत्र चोरमात्रे भाति कथं विशेषणमित्याशङ्क्याह। भ्रूणहेति॥ भ्रूणहा च वरिष्ठब्रह्महन्तोच्यते॥ तदेव घोरं कर्म्म विशिनष्टि। येनेति॥ महत्पातकमस्येति व्युत्पत्त्या महापातकी स्तेनः॥ स्तेनादिवाक्येन चाण्डालादिवाक्यस्य गतार्थत्वमाशङ्क्याह। नेत्यादिना। प्रत्युत्पन्नमागन्तुकं॥ ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहकस्तथा। शूद्राज्जातस्तु चाण्डालः सर्व्वधर्म्मबहिष्कृत इति स्मृतिमाश्रित्याह। चाण्डालो नामेति॥ जातो निषादाच्छूद्रायां जात्या पुल्कस इति स्मृते। शूद्रायां ब्राह्मणाज्जातो निषादः। स च जात्या शूद्रः। तस्मात्क्षत्रियायां जातः पुल्कसो भवतीति व्याख्या-

उ॰ पापेन तीर्णो हि तदा सर्व्वाञ्छोकान्हृदयस्य भवति ॥ २२ ॥

भा॰ भवति। तथा श्रमणश्च कर्म्मभिरसम्बद्धो भवतीत्युच्यते। श्रमणः परिव्राट् यत्कर्म्मनिमित्तो भवति स तेन विनिर्मुक्तत्वादश्रमणः। तथा तापसो वानप्रस्थोऽतापसः। सर्व्वेषां वर्णाश्रमादीनामुपलक्षणार्थमुभयोर्ग्रहणं किं बहुना। नन्वागतं न अन्वागतमनन्वागतमसम्बद्धमित्येतत्पुण्येन शास्त्रविहितेन कर्म्मणा। तथा पापेन विहिताकरणप्रतिषिद्धक्रियालक्षणेन रूपपरत्वान्नपुंसकलिङ्गं। अभयं रूपमिति ह्यनुवर्त्तते। किं पुनरसम्बद्धत्वे कारणमिति तद्धेतुरुच्यते। तीर्णोऽतिक्रान्तो हि यस्मादेवंरूपस्तदा तस्मिन् काले सर्व्वाञ्छोकान् शोकाः कामा इष्टविषयप्रार्थनाः। ते हि तद्विषयवियोगे शोकत्वमापद्यन्ते। इष्टं

व्या॰ नमुपेत्याह। शूद्रेणैवेति॥ तथा चाण्डालवदिति यावत्॥ श्रमणादिवाक्यस्य तात्पर्य्यमाह। तथेति॥ परिव्राडतापसयोरेव ग्रहणात्तत्कर्म्मायोगेऽपि सौषुप्तस्य वर्णाश्रमान्तरकर्म्मयोगं शङ्कित्वाह। सर्व्वेषामिति॥ आदिशब्देन वयोऽवस्थादि गृह्यते॥ सौषुप्ते पुरुषे प्रकृते कथमनन्वागतमिति नपुंसकप्रयोगस्तत्राह। रूपपरत्वादिति॥ तत्परत्वे हेतुमनुषङ्गं दर्शयति। अभयमिति॥ हेतुवाक्यमाकाङ्क्षापूर्व्वकमुत्थाप्य व्याचष्टे। किं पुनरित्यादिना॥ यस्मादतिच्छन्दादिवाक्योक्तस्वभावोऽयमात्मा सुषुप्ते काले हृदयनिष्ठान्सर्व्वाञ्छोकानतिक्रामति तस्मादेतदात्मरूपं पुण्यपापाभ्यामनन्वागतं युक्तमित्यर्थः॥ शोकशब्दस्य कामविषयत्वं साध-

भा॰ हि विषयमप्राप्तं वियुक्तं चोद्दिश्य चिन्तयानस्तद्गुणान् सन्तप्यते पुरुषोऽतः शोको रतिः काम इति पर्य्यायाः ॥

यस्मात् सर्व्वकामातीतो ह्यत्रायं भवति । न कञ्चन कामं कामयते अति छन्दा इति ह्युक्तं तत्प्रक्रियापतितोऽयं शोकशब्दः कामवचन एव भवितुमर्हति । कामस्य कर्म्महेतुर्वक्ष्यति हि । स यथाकामो भवति तत्क्रतुर्भवति यत् क्रतुर्भवति तत्कर्म्म कुरुत इति । अतः सर्व्वकामातितीर्णत्वाद्युक्तमुक्तमनन्वागतं पुण्येनेत्यादि । हृदयस्य हृदयमिति पुण्डरीकाकारो मांसपिण्डस्तत्स्थमन्तःकरणं बुद्धिर्हृदयमित्युच्यते । तात्स्थ्यान्मञ्चाक्रोशनवद्धृदयस्य बुद्धेर्ये शोका बुद्धिसंश्रया हि ते । कामः संकल्पो विचिकित्सेत्यादि । सर्व्वं मन एवेत्युक्तत्वात् । वक्ष्यति च कामा येऽस्य हृदि श्रिता

व्या॰ यति । इष्टेति ॥ कथं तस्याः शोकत्वापत्तिरित्याशङ्क्याह । इत्थं हीति ॥

तेषां पर्य्यायत्वेऽपि प्रकृते किमायातं तदाह । यस्मादिति ॥ अत्रेति सुषुप्तिरुच्यते । अतः सर्व्वकामातितीर्णत्वादित्युत्तरत्र सम्बन्धः ॥ न केवलं शोकशब्दस्य कामविषयत्वमुपपन्नमेव किन्तु सन्निधेरपि सिद्धमित्याह । न कञ्चनेति ॥ शोकशब्दस्य कामविषयत्वेऽपि तदत्ययमात्रात्कथं कर्म्मात्ययः स्यादित्याशङ्क्याह । कामस्येति ॥ तत्र वाक्यं प्रमाणयति । वक्ष्यति हीति ॥ कामस्य कर्म्महेतुत्वे सिद्धे फलितमाह । अत इति ॥ हृदयस्य शोकानतिक्रामतीत्यत्र हृदयशब्दार्थमाह । हृदयमितीति ॥ मांसपिण्डविशेषविषयं हृदयपदं कथं बुद्धिमाहेत्याशङ्क्याह । तात्स्थ्यादिति ॥ यथा मञ्चाः क्रोशन्तीति मञ्चक्रोशनमुच्यमानं मञ्चस्थान्पुरुषानुपचारादाह तथा हृदयस्थत्वाद्बुद्धेरुपचाराद्बुद्धिं हृदयशब्दो दर्शयतीत्यर्थः ॥ हृदयशब्दार्थमुक्त्वा तस्य सम्बन्धं दर्शयति ।

भा॰ इति । आत्मसंश्रयभ्रान्त्यपनोदाय हीदं वचनं । हृदि श्रिता हृदयशोका इति च । हृदयकरणसम्बन्धातीतश्चायमस्मिन् कालेऽतिक्रामति मृत्योरूपाणीति ह्युक्तं । हृदयसम्बन्धातीतत्वात्तत्संश्रयकामसम्बन्धातीतो भवतीति युक्ततरं वचनं । ये तु वादिनो हृदि श्रिताः कामा वासनाश्च हृदयसम्बन्धिनमात्मानमुपसर्प्योपश्लिष्यन्ते । हृदयवियोगेऽपि चात्मन्यवतिष्ठन्ते । पुटतैलस्य इव पुष्पादिगन्ध इत्याचक्षते । तेषां कामः संकल्पः । हृदये ह्येव रूपाणि हृदयस्य शोका इत्यादीनां वचनानामानर्थक्यमेव । हृदयकरणोत्पाद्यत्वादिति चेत् । न । हृदि श्रिता इति विशेषणात् । न हि हृदयस्य करणमात्रत्वे हृदि श्रिता इति वचनं समञ्जसं । हृदये ह्येव रूपाणि प्रतिष्ठितानीति च ।

आ॰ हृदयस्येति ॥ तानतिक्रान्तो भवतीति शेषः ॥ आत्माश्रयास्ते न बुद्धिमाश्रयन्तीत्याशङ्क्याह । बुद्धीति ॥ कथं तर्हि केचिदात्माश्रयत्वं तेषां वदन्तीत्याशङ्क्य भ्रान्तिवशादित्याह । आत्मेति ॥ भवतु कामादीनां हृदयाश्रितत्वं तथापि तत्सम्बन्धद्वारा तदाश्रयत्वसम्भवात् कथमात्मा सुषुप्ते कामानतिवर्त्तते तत्राह । हृदयकरणेति ॥ तत्सम्बन्धातीतत्वे श्रुतिसिद्धे फलितमाह । हृदयेति ॥ भर्तृप्रपञ्चप्रस्थानमुत्थापयति । ये त्विति ॥ सत्येव हृदये तन्निष्ठानां कामादीनामात्मन्युपश्लेषो न तन्निवृत्तावित्याशङ्क्याह । हृदयवियोगेऽपीति ॥ तन्मते श्रुतिविरोधमाह । तेषामिति ॥ करणेन हृदयेनोत्पाद्यत्वादात्मविकाराणामपि कामादीनां हृदयसम्बन्धसम्भवान्नानर्थक्यं श्रुतीनामिति शङ्कते । हृदयेति ॥ न कामादिसम्बन्धमात्रं हृदयस्य श्रुत्यर्थः । किन्त्वाश्रयाश्रयित्वं तच्च करणत्वे न स्यात् । न हि चक्षुराद्याश्रयं रूपादिज्ञानं दृष्टमिति परिहरति । न हृदीति ॥ चकाराद्वचनं न समञ्जसमिति सम्बध्यते ॥

भा॰ आत्मविशुद्धेश्च विवक्षितत्वाद्बुद्ध्याश्रयणवचनं यथार्थमेव युक्तं। ध्यायतीव लेलायतीवेति च श्रुतेरन्यार्थासम्भवात्। कामा येऽस्य हृदि श्रिता इति विशेषणादात्माश्रया अपि सन्तीति चेत्। न अनाश्रितापेक्षत्वात्। न चाश्रयान्तरमपेक्ष्य ये हृदीति विशेषणं किन्तर्हि ये हृद्यनाश्रिताः कामास्तानपेक्ष्य विशेषणं। ये त्वप्ररूढा भविष्या भूताः स्वप्रतिपक्षतो निवृत्तास्तेनैव हृदि श्रिताः सम्भाव्यन्ते च ते। अतो युक्तं तानपेक्ष्य विशेषणं। ये प्ररूढा वर्त्तमानादिविषये ते सर्वे प्रमुच्यन्त इति। तथापि विशेषणानर्थक्यमिति चेत्। न। तेषु यत्नाधिक्याद्धेयार्थत्वात्। इतरथाऽश्रुतमनिष्टञ्च कल्पितं स्यादात्माश्रयत्वञ्च कामानां। न कश्चन कामं कामयत इति

व्या॰ प्रदीपायत्तं घटज्ञानमिति वदन्तः करणायत्तमात्माश्रितं कामादीति तस्य तदाश्रयत्ववचनमौपचारिकमित्याशङ्क्याह। आत्मविशुद्धेश्चेति॥ इतश्चेदं यथार्थमेवेत्याह। ध्यायतीवेति॥ अन्यार्थासम्भवाद्बुद्ध्याश्रयणवचनस्येति शेषः॥ दक्षिणेनाक्ष्णा पश्यतीत्युक्ते वामेन न पश्यतीतिवत्प्रमुच्यन्ते हृदि श्रिता इति विशेषणमाश्रित्याशङ्कते। कामा ये इति॥ प्रकारान्तरेण विशेषणस्यार्थवत्त्वं दर्शयति। नेत्यादिना। अस्येति प्रकृतश्रुत्युक्तिः। आश्रयान्तरं बुद्ध्यतिरिक्तमात्माख्यं॥ बुद्ध्यनाश्रिताः कामा एव न सन्ति यदपेक्षया हृदयाश्रयत्वविशेषणमित्याशङ्क्याह। ये त्विति॥ प्रतिपक्षतो विषयदोषदर्शनादिति यावत्॥ कामानां वर्त्तमानत्वनियमाभावाद्भूतभविष्यतामपि सम्भवे फलितमाह। ये इति॥ हृदयानाश्रितभूतभविष्यत्कामसम्भवेऽपि सर्वकामनिवृत्तेर्विवक्षितत्वाद्वर्त्तमानविशेषणमनर्थकमिति शङ्कते। तथापीति॥ अतीतानागतकामाभावः सम्भवति स्वतः सिद्धो न तन्निवृत्तौ यत्नोऽपेक्ष्यते शुद्धात्मदिदृक्षुणा वर्त्तमानकामनिरासे यत्नाधिक्य-

भा॰ प्राप्तप्रतिषेधादात्माश्रयत्वं कामानां श्रुतमेवेति चेत्। न। सुधीः स्वप्नो भूत्वेति परनिमित्तत्वात् कामाश्रयत्वप्राप्ते रसङ्गवचनाच्च। न हि कामाश्रयत्वेऽसङ्गवचनमुपपद्यते। सङ्गश्च काम इत्यवोचाम। आत्मकाम इति श्रुतेरात्मविषयोऽस्य कामो भवतीति चेत्। न। व्यतिरिक्तकामाभावार्थत्वात्तस्याः। वैशेषिकादितन्त्रन्यायोपपन्नमात्मनः कामाद्याश्रयत्वमिति चेत्। न। हृदि श्रिता इत्यादि विशेषश्रुतिविरोधादनपेक्ष्यास्ता वैशेषिकादितन्त्रोपपत्तयः। श्रुतिविरोधे न्यायाभासत्वोपगमात्। स्वयं ज्योतिष्ट्वबाधनाच्च। कामादीनाञ्च स्वप्ने केवलदृशिमात्रविषयत्वात् स्वयं ज्योतिष्ट्वं सिद्धं। स्थितञ्च बाध्येतात्मसमवायित्वे। दृश्यत्वानुपपत्तेश्चक्षुर्गतविशेषवत्।

व्या॰ माधेयमिति ज्ञापयितुं वर्त्तमानग्रहणमिति परिहरति॥ न तेष्विति॥ यदि यथोक्तं व्याख्यानमनादृत्यात्माश्रयत्वमेव कामनामाश्रीयते तदाऽश्रुतं मोक्षासम्भवेनानिष्टञ्च कल्पितं स्यादित्याह। इतरथेति॥ अश्रुतत्वमसिद्धमिति शङ्कते। न कश्चनेति॥ अर्थादात्माश्रयत्वं श्रुतमेव कामानामित्येतद्दूषयति। नेत्यादिना॥ निषेधो हि प्राप्तिमपेक्षते न वास्तवं कामानामात्मधर्मत्वं प्राप्तिस्तु भ्रान्त्यापि सम्भवति। तस्मादात्मनो वस्तुतो न कामाद्याश्रयत्वमित्यर्थः॥ इतश्चात्मनो न कामाद्याश्रयत्वमित्याह। असङ्गेति॥ नन्वसङ्गवचनमात्मनः सङ्गाभावं साधयति तस्य कामित्वे न विरुध्यते तत्राह। सङ्गश्चेति॥ कामस्य सङ्गत्वतोऽसिद्धो हेतुरत्रेति शेषः॥ वाक्यान्तरमाश्रित्यात्मनि कामाश्रयत्वं शङ्कित्वा दूषयति। आत्मेत्यादिना॥ इच्छादयः क्वचिदाश्रिताः गुणत्वाद्रूपादिवदित्यनुमानात्परिशेषात् कामाद्याश्रयत्वमात्मनः सेत्स्यतीति शङ्कते। वैशेषिकादीति॥ श्रुत्यवष्टम्भेन निराचष्टे। नेत्यादिना॥ स्वयं ज्योतिष्ट्वबाधनाच्च नात्माश्रयत्वं कामादीनामिति शेषः॥ तदेव

भा॰ द्रष्टुर्हि दृश्यमर्थान्तरभूतमिति। द्रष्टुः स्वयं ज्योतिष्ट्वं सिद्धं। तद्बाधितं स्याद्यदि कामाद्याश्रयत्वं परिकल्पेत। सर्व्वशास्त्रप्रतिषेधाच्च। परस्यैकदेशकल्पनायाः कामाद्याश्रयत्वे च सर्व्वशास्त्रार्थजातं कुप्येत। एतच्च विस्तरेण चतुर्थेऽवोचाम। महता हि प्रयत्नेन कामाद्याश्रयकल्पनाः प्रतिषेद्धव्याः। आत्मनः परेणैकत्वशास्त्रार्थसिद्धेः। तत्कल्पनायां पुनः क्रियमाणायां शास्त्रार्थ एव बाधितः स्यात्। यथेच्छादीनामात्मधर्म्मत्वं कल्पयन्तो वैशेषिका नैयायिकाश्चोपनिषच्छास्त्रार्थेन न सङ्गच्छन्ते। तथेयमपि कल्पनोपनिषच्छास्त्रार्थबाधनादनादरणीया॥ २२॥

था॰ विरुणोति। कामादीनामिति। स्थितस्यानुमानादिति शेषः। यद्यत्र समवेतं तत्तेन न दृश्यते। यथा चक्षुर्गतं कार्ष्ण्यं तेनैव चक्षुषा न दृश्यते तथा कामादीनामात्मसमवायित्वे दृश्यत्वं न स्यात्। दृश्यत्वबलेनैव स्वयं ज्योतिष्ट्वं साधितं। तथा च तद्बाधे पूर्व्वोक्तमनुमानमपि बाध्येतेत्यर्थः। कथं कामादीनामात्मदृश्यत्वमाश्रित्य स्वप्ने स्वयं ज्योतिष्ट्वस्योपदिष्टत्वं तत्राह। द्रष्टुरिति॥ तथापि तेषामात्माश्रयत्वे कानुपपत्तिस्तत्राह। तद्बाधितमिति॥ यत्तु परमात्मैकदेशं जीवमाश्रित्य तदाश्रितं कामादीति तत्राह। सर्व्वशास्त्रेति॥ तदेव स्फुटयति। परस्येति॥ शास्त्रार्थजातं निरवयवत्वप्रत्यगेकत्वादि। तस्य कथं कोपः स्यादित्याशङ्क्याह। एतच्चेति॥ चतुर्थे चेद्बहुत्वप्रपञ्चमतं निरस्तं तर्हि पुनर्निराकरणमकिञ्चित्करमित्याशङ्क्याह। महतेति॥ परेण सह प्रत्यगात्मनो यदेकत्वं तस्य शास्त्रार्थस्य सिद्धार्थमिति यावत्॥ अंशत्वकल्पनायामपि शास्त्रार्थसिद्धिमाशङ्क्याह। तत्कल्पनायामिति॥ भर्तृप्रपञ्चकल्पनाया हेयत्वमुपसंहरति। यथेत्यादिना॥ २२॥

उ० यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति ॥

भा० स्त्रीपुंसयोरविकलत्वान्न पश्यतीत्युक्तं स्वयं ज्योतिरिति च। स्वयं ज्योतिष्ट्वं नाम चैतन्यात्मस्वभावता। यदि ह्यग्न्युष्णत्वादिवच्चैतन्यात्मस्वभाव आत्मा स कथमेकत्वेऽपि हि स्वभावं जह्यान्न जानीयात्। अथ न जहाति कथमिह सुषुप्ते न पश्यति। विप्रतिषिद्धमेतच्चैतन्यमात्मस्वभावो न जानाति चेति। न विप्रतिषिद्धमुभयमप्येतदुपपद्यत एव। कथं यद्वै सुषुप्ते तन्न पश्यति पश्यन्वै तत्तत्र पश्यन्नेव न पश्यति। यत्तत्र सुषुप्ते न पश्यतीति जानीषे तन्न। तथा गृह्णीयाः। कस्मात्पश्यन्नेव भवति तत्र। नन्वेवं न पश्यतीति सुषुप्ते जानीमो यतो न चक्षुर्वा मनो वा दर्शने करणं व्यापृतमस्ति। व्यापृतेषु हि दर्शनश्रवणादिषु पश्यतीति व्यवहारो भवति शृणोतीति वा। न च व्यापृतानि करणानि पश्यामः। तस्मान्न पश्यत्येवायं न हि किन्तर्हि पश्यन्नेव भवति। कथं

आ० यद्वै तन्न पश्यतीत्यादेः सम्बन्धं वक्तुं वृत्तं कीर्त्तयति। स्त्रीपुंसयोरिति॥ चकारादुक्तं स्वयं ज्योतिष्ट्वमिति सम्बध्यते॥ किमिदं स्वयं ज्योतिष्ट्वमिति तदाह। स्वयं ज्योतिष्ट्वं नामेति॥ एवं वृत्तमनूद्योत्तरवाक्यव्यावर्त्त्यांशङ्कामाह। यदीत्यादिना॥ स्वभावत्यागमेवाभिनयति। न जानीयादिति॥ तत्त्यागाभावे सुषुप्ते विशेषविज्ञानराहित्यमयुक्तमित्याह। अथेत्यादिना॥ आत्मा चिद्रूपोऽपि सुषुप्ते विशेषं न जानाति किं दुष्यतीत्याशङ्क्याह। विप्रतिषिद्धमिति॥ परिहरति। नेति॥ उभयं चैतन्यस्वभावत्वं विशेषविज्ञानराहित्यञ्चेत्यर्थः॥ उभयस्वीकारे शङ्कितं विप्रतिषेधमाकाङ्क्षापूर्व्वकं श्रुत्वा निराकरोति। कथमित्यादिना॥ यद्वै तदि-

उ॰ न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात् ॥

भा॰ न हि । यस्माद्द्रष्टुर्दृष्टिकर्त्तुर्या दृष्टिस्तस्या दृष्टेर्विपरिलोपो विनाशः सन् विद्यते यथाग्नेरौष्ण्यं यावदग्निभावि तथाचायमात्माऽविनाश्यतोऽविनाशित्वादात्मनो दृष्टिरप्यविनाशिनी यावद्द्रष्टृभाविनी हि सा । ननु विप्रतिषिद्धमिदमभिधीयते द्रष्टुः सा दृष्टिर्न विपरिलुप्यत इति च । दृष्टिश्च द्रष्ट्रा क्रियते । दृष्टिकर्तृत्वाद्धि द्रष्टेत्युच्यते । क्रियमाणा च द्रष्ट्रा दृष्टिर्न विपरिलुप्यत इति चाशक्यं वक्तुं । ननु न विपरिलुप्यत इति वचनादविनाशिनी स्यात् । न वचनस्य ज्ञापकत्वात् । न हि न्यायप्राप्तो विनाशः । कृतकस्य वचनशतेनापि वारयितुं शक्यते वचनस्य यथा प्राप्तार्थज्ञापकत्वात् । नैष दोषः । आदित्यादि-

व्या॰ त्यादिवाक्यं चोदितार्थानुवादस्तत्परिहारस्तु पश्यन्नित्यादिवाक्यमिति विभजते । यत्तन्नेति ॥ न हीत्यादिवाक्यनिरस्यामाशङ्कामाह । नन्विति ॥ चक्षुरादिव्यापाराभावेऽपि सत्ते दर्शनादि किं न स्यादित्याशङ्क्याह । व्याप्तेष्विति ॥ अस्तु तर्हि तत्रापि करणव्यापारो नेत्याह । न चेति ॥ अयमिति सुषुप्तपुरुषोक्तिः ॥

न पश्यत्येवेति नियमं निषेधति । नेति ॥ तत्र हेतुं वक्तुं प्रश्नपूर्व्वकं प्रतिज्ञां प्रस्तौति । किं तर्हीति ॥ तत्राकाङ्क्षापूर्व्वकं हेतुवाक्यमुत्थाप्य व्याचष्टे । कथमित्यादिना ॥ अविनाशित्वादित्येतद्व्याकुर्वन्दृष्टेर्विनाशाभावं स्पष्टयति । यथेत्यादिना ॥ द्रष्टुर्दृष्टिर्नश्यतीत्यत्र विरोधश्चोदयति । नन्विति ॥ विप्रतिषेधमेव साधयति । दृष्टिश्चेति ॥ कार्य्यस्यापि–वचनादविनाशः स्यादिति

भा० प्रकाशकत्ववद्दर्शनोपपत्तेः। यथादित्यादयो नित्यप्रकाशस्वभावा एव सन्तः स्वाभाविकेन नित्येनैव प्रकाशेन प्रकाशयन्ति। न ह्यप्रकाशात्मनः सन्तः प्रकाशं कुर्व्वन्तः प्रकाशयन्तीत्युच्यन्ते। किं तर्हि स्वभावेनैव नित्येनैव प्रकाशेन। तथायमप्यात्मा विपरिलुप्तस्वभावया दृष्ट्या नित्यया द्रष्टेत्युच्यते। गौणं तर्हि द्रष्टृत्वं। नैवमेव मुख्यत्वोपपत्तेः। यदि ह्यन्यथाप्यात्मनो द्रष्टृत्वं दृष्टं तदास्य द्रष्टृत्वस्य गौणत्वं न त्वात्मनोऽन्यो दर्शनप्रकारोऽस्ति। तदेवमेव मुख्यं द्रष्टृत्वमुपपद्यते नान्यथा। यथादित्यादीनां प्रकाशयितृत्वं नित्येनैव स्वाभाविकेनाक्रियमाणेन प्रकाशेन। तदेव च प्रकाश-

---

व्या० शङ्कते। नन्विति॥ तस्या कारकत्वान्नैवमिति परिहरति। न वचनस्येति॥ तदेव स्फुटयति। न हीति॥ यत्कृतकं तदनित्यमिति व्याप्त्यनुगृहीतानुमानविरोधाद्वचो न कार्य्यनित्यत्वबोधकमित्यर्थः॥ कूटस्थदृष्टिरेवात्र द्रष्टृशब्दार्थो न दृष्टिकर्त्ता तन्न विप्रतिषेधोऽस्तीति सिद्धान्तयति। नैष दोष इति॥ आदित्यादिप्रकाशवत्त्ववदित्युक्तं दृष्टान्तं व्याचष्टे। यथेति॥ दृष्टान्तेऽपि विप्रतिपन्नं प्रत्याह। न हीति॥ दर्शनोपपत्तेरित्युक्तं दार्ष्टान्तिकं विभजते। तथेति॥ आत्मनो नित्यदृष्टित्वे दोषमाशङ्कते। गौणमिति॥ गौणस्य मुख्यापेक्षत्वान्मुख्यस्य चान्यस्य द्रष्टृत्वस्याभावान्नैवमित्युत्तरमाह। नेत्यादिना॥ तामेवोपपत्तिमुपदर्शयति। यदि हीत्यादिना॥ अन्यथा कूटस्थदृष्टिमन्तरेणेति यावत्॥ दर्शनप्रकारस्यान्यत्वं क्रियात्मत्वं तस्य निष्क्रियत्वश्रुतिस्मृतिविरोधादिति शेषः॥ द्रष्टृत्वान्तरानुपपत्तौ फलितमाह। तदेवमेवेति॥ नित्यदृष्टित्वेनैवेत्यर्थः॥ उक्तेऽर्थे दृष्टान्तमाह। यथेत्यादिना॥ तथात्मनोऽपि द्रष्टृत्वं नित्येनैव स्वाभाविकेन चैतन्यज्योतिषा सिध्यति तदेव च द्रष्टृत्वं मुख्यं द्रष्टृत्वान्तरानुपपत्तेरिति शेषः॥ आत्मनो नित्यदृष्टिस्वभावत्वे फलितमाह। तस्मादिति॥ दृजन्तं

उ॰ न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत् ॥ २३ ॥

भा॰ यितृत्वं मुख्यं प्रकाशयितृत्वान्तरानुपपत्तेः। तस्मान्न द्रष्टुर्दृष्टेर्विपरिलुप्यत इति न विप्रतिषेधगन्धोऽप्यस्ति ॥ नन्वनित्यक्रियाकर्तृविषय एव तृच्प्रत्ययान्तस्य शब्दस्य प्रयोगो दृष्टो यथा छेत्ता भेत्ता गन्तेति तथा द्रष्टेत्यत्रापीति चेन्न। प्रकाशयितेति दृष्टत्वात्। भवतु प्रकाशकेष्वन्यथा सम्भवान्न त्वात्मनीति चेत्। न। दृष्ट्यविपरिलोपश्रुतेः। पश्यामि न पश्यामीत्यनुभवदर्शनान्नेति चेत्। न। करणव्यापारविशेषापेक्षत्वात्। उद्धृतचक्षुषाश्च स्वप्न आत्मदृष्टेरविपरिलोपदर्शनात्। तस्मादविपरिलुप्तस्वभावैवात्मनो दृष्टिः। अतस्तयाऽविपरिलुप्तया दृष्ट्या स्वयं ज्योतिःस्वभावया

आ॰ दृष्टिशब्दमाश्रित्य शङ्कते। नन्विति ॥ अत्राप्यनित्यक्रियाकर्तृविषयस्तृजन्तशब्दप्रयोग इति शेषः ॥ तृजन्तशब्दप्रयोगस्यानित्यक्रियाकर्तृविषयत्वं व्यभिचारयन्नुत्तरमाह। नेति ॥ वैषम्यमाशङ्कते। भवत्विति ॥ आदित्यादिषु स्वाभाविकप्रकाशेन प्रकाशयितृत्वमस्तु कादाचित्कप्रकाशेन प्रकाशयितृत्वस्य तेष्वसम्भवान्न त्वात्मनि नित्यादृष्टिरस्ति तन्मानाभावात्। तथा च कादाचित्कदृष्ट्यैव तस्य द्रष्टृतेत्यर्थः। प्रतीचश्चिद्रूपस्य श्रौतत्वात्कर्तृत्वं विना प्रकाशयितृत्वमविशिष्टमित्युत्तरमाह। न दृष्टीति ॥ कूटस्थदृष्टिरात्मेत्युक्ते प्रत्यक्षविरोधं शङ्कते। पश्यामीति ॥ द्विविधोऽनुभवस्तस्य कूटस्थदृष्टित्वमनुरुणद्धीति। चक्षुरादिव्यापारभावाभावापेक्षया पश्यामि न पश्यामीति धियोरात्मसाक्षिकत्वादित्युत्तरमाह। न करणेति ॥ आत्मदृष्टेर्नित्यत्वे हेत्वन्तरमाह। उद्धृतेति ॥ आत्मदृष्टेर्नित्यत्वमुपसंहरति। तस्मा-

भा० पश्यन्नेव भवति सुषुप्ते। कथं तर्हि न पश्यतीत्युच्यते। न तु तदस्ति किन्तद्द्वितीयं विषयभूतं किं विशिष्टं ततो द्रष्टुरन्यदन्यत्वेन विभक्तं यत्पश्येद्यदुपलभ्येत। यद्धि तद्विशेषदर्शनकारणमन्तःकरणं चक्षूरूपं च तदविद्ययान्यत्वेन प्रत्युपस्थापितमासीत्। तदेतस्मिन् काले एकीभूतं। आत्मनःपरेण परिष्वङ्गात्। द्रष्टुर्हि परिच्छिन्नस्य विशेषदर्शनाय करणमन्यत्वेन व्यतिष्ठते। यस्तु स्वेन सर्व्वात्मना सम्परिष्वक्तः स्वेन परेण प्राज्ञेनात्मना प्रिययेव पुरुषस्तेन न पृथक्त्वेन व्यवस्थितानि करणानि विषयाश्च। तदभावाद्विशेषदर्शनं नास्ति। करणादिकृतं हि तन्नात्मकृतं। आत्मकृतमिव प्रत्यवभासते।

व्या० दिति॥ तन्नित्यत्वोक्तिफलमाह। यत इति॥ वाक्यान्तरमाकाङ्क्षापूर्व्वकमुत्थाप्य व्याचष्टे। कथमित्यादिना॥ द्वितीयादिपदानां पौनरुक्तिमाशङ्क्यार्थभेदं दर्शयति। यद्धीत्यादिना॥ साभासमन्तःकरणं यत्पश्येदिति विशेषदर्शनकारणं प्रमातृद्वितीयं। तस्मादन्यच्चक्षुरादिप्रमाणं रूपादि च प्रमेयं विभक्तं तत्सर्व्वं जाग्रत्स्वप्नयोरविद्याप्रतिपन्नं सुषुप्तिकाले कारणमात्रतां गतमभिव्यक्तं नास्तीत्यर्थः॥ सुषुप्ते द्वितीयं प्रमातृरूपं नास्तीत्येतदुपपादयति। आत्मन इति॥ प्रमातृरूपं पृथङ्नास्तीति शेषः॥ तथापि करणव्यापारकृतं विषयदर्शनमात्मनः स्यादित्याशङ्क्याह। द्रष्टुरिति॥ सुषुप्तस्यापि परिच्छिन्नत्वमाशङ्क्याह। यस्त्विति॥ तस्य परेणैकीभावफलमाह। तेनेति॥ विषयेन्द्रियाभावकृतं फलमाह। तदभावादिति॥ किमिति विषयाद्यभावाद्विशेषदर्शनं निषिध्यते। तत्त्वमेव तस्यात्मसत्त्वाधीनं किं न स्यादित्याशङ्क्याह। करणादीति॥ नन्ववस्थाद्वये विशेषदर्शनमात्मकृतं प्रतिभाति तस्य प्रधानत्वादत आह। आत्मकृतमिति॥ न त्वित्यादेस्तात्पर्य्यमुपसंहरति। तस्मादिति॥ प्रमातृकरणविषयकृतत्वाद्विशेषदृष्टेस्तेषाञ्च सुषुप्तावभावात्तत्कार्य्याया विशेषदृष्टेरपि तत्राभावादिति

उ० यद्वै तन्न जिघ्रति जिघ्रन्वै तन्न जिघ्रति न हि घ्रातुर्घ्रातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यज्जिघ्रेत् ॥ २४ ॥ यद्वै तन्न रसयते रसयन्वै तन्न रसयते न हि रसयितूरसयतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्रसयेत् ॥ २५ ॥ यद्वै तन्न वदति वदन्वै तन्न वदति न हि वक्तुर्वक्तेर्विपरिलोपो विद्यतेऽवि-

---

भा० तस्मात्तत्कृतेयं भ्रान्तिरात्मनो दृष्टिः परिलुप्यत इति समानमन्यत् ॥ २३ ॥

यद्वै तन्न जिघ्रति । यद्वै तन्न रसयते । यद्वै तन्न वदति । यद्वै तन्न शृणोति । यद्वै तन्न मनुते । यद्वै तन्न स्पृशति । यद्वै तन्न विजानाति । मननविज्ञानयोर्दृश्यादिसहकारित्वेऽपि सति चक्षुरादिनिरपेक्षो भूतभविष्यद्वर्त्तमानविषयव्यापारो विद्यत इति पृथग्ग्रहणं । किं

घा० यावत् ॥ तत्कृता जागरादावात्मकृतत्वेन भ्रान्तिप्रतिपन्नविशेषदर्शनाभावप्रयुक्तेत्यर्थः समानमन्यदिति ॥ २३ ॥

यद्वै तन्न पश्यतीत्यादावुक्तन्यायमुत्तरवाक्येष्वतिदिशति । मनोबुद्ध्योः साधारणकरणत्वात् पृथग्व्यापाराभावे कथं पृथङ्निर्देशः स्यादित्याशङ्क्याह । मननेति ॥ वाक्यानि व्याख्याय स्वसिद्धान्तस्फुरणार्थं विचारयति । किं पुनरिति ॥ धर्मभेदो धर्माणां सतां मिथो धर्मिणश्च भेदो नास्तीति यावत् ॥ धर्मस्य दृष्ट्यादिपदार्थस्येत्यर्थः । परोपाधिनिमित्तं चक्षुराद्यु-

उ० नाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्वदेत् ॥ २६ ॥ यद्वै तन्न शृणोति शृण्वन्वै तन्न शृणोति न हि श्रोतुः श्रुतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यच्छृणुयात् ॥ २७ ॥ यद्वै तन्न मनुते मन्वानो वै तन्न मनुते न हि मन्तुर्मतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यन्मन्वीत ॥ २८ ॥ यद्वै तन्न स्पृशति स्पृशन्वै तन्न स्पृशति न हि स्प्रष्टुः स्पृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति

भा० पुनर्दृष्ट्यादीनामग्नेरौष्ण्यप्रकाशनज्वलनादिवद्धर्मभेद आहोस्विदभिन्नस्यैव धर्मस्य परोपाधिनिमित्तकं धर्मान्यत्वमित्यत्र केचिद्व्याचक्षते । आत्मवस्तुनः स्वत एवैकत्वं नानात्वञ्च । यथा गोर्गोद्रव्यतयैकत्वं सास्नादीनां धर्माणां परस्परतो भेदो यथा स्थूलेष्वेवमेकत्वं नानात्वं तथा निरवयवेष्वमूर्त्तवस्तुष्वेकत्वं नानात्वञ्चानुमेयं । सर्वत्राव्यभिचार-

---

व्या० पाधिकृतमित्येतत् । धर्मान्यत्वं धर्मत्वं धर्मिणो मिथोऽन्यत्वं चेत्यर्थः ॥ भर्तृप्रपञ्चमतेन पूर्वपक्षं गृह्णाति । अत्रेति ॥ गवादीनां सावयवत्वाद्रूपभेदसम्भवादेकेन रूपेणाभिन्नत्वं रूपान्तरेण भिन्नत्वमित्युभयथात्वेऽपि निरवयवेष्वात्मादिषु कथमनेकरसत्वसिद्धिरित्याशङ्क्याह । यथा स्थूलेष्विति ॥ एकरूपत्वे वस्तुनो दृष्टान्तादृष्टेर्नानारूपत्वे गवादिदृष्टान्तदर्शनात्तदेवानुमेयं ।

उ॰ ततोऽन्यद्विभक्तं यत्स्पृशेत् ॥ २९ ॥ यद्वै तन्न विजानाति विजानन्वै तन्न विजानाति न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्विजानीयात् ॥ ३० ॥

भा॰ दर्शनादात्मनोऽपि तद्वदेव दृष्ट्यादीनां परस्परं नानात्वमात्मना चैकत्वमिति नान्यपरत्वात्। न हि दृष्ट्यादिधर्मभेदप्रदर्शनपरमिदं वाक्यं यद्वै तदित्यादि। किं तर्हि यदि चैतन्यात्मज्योतिः कथं न जानाति सुषुप्ते नूनमतो न चैतन्यात्मज्योतिरित्येवमाशङ्काप्राप्तौ तन्निराकरणायैतदारब्धं यद्वै तदित्यादि ॥

यदस्य जाग्रत्स्वप्नयोश्चक्षुराद्यनेकोपाधिद्वारा चैतन्यात्मज्योतिःस्वाभाव्यमुपलक्षितं दृष्ट्याद्यभिधेयव्यवहारापन्नं सुषुप्त उपाधिभेदव्यापारनिवृत्तावनुद्भास्यमान-

---

व्या॰ विमतं भिन्नाभिन्नं वस्तुत्वाद्गवादिवदित्यर्थः। यद्यपि गगनादिषु भिन्नाभिन्नत्वमनुमीयते तथापि कथमात्मनि तदनुमानमित्याशङ्क्य वस्तुत्वस्य नानारूपत्वेनाव्यभिचारादात्मन्यपि यथोक्तमनुमानं निरङ्कुशप्रसरमित्याह। सर्वं चेति। यथोक्तानुमानानुग्राह्यं च द्वैतमित्यादिभिन्नाभिन्नत्ववस्तुनि तात्पर्यमिति भावः॥ भर्तृप्रपञ्चोक्तां वाक्यतात्पर्यं निराकरोति। नेत्यादिना॥

चैतन्याविनाशे वाक्यतात्पर्यं चेत्कथं तर्हि दृष्ट्यादिभिदा वचनमित्याशङ्क्याह। यदस्येति। तद्धि सुषुप्त्यवस्थायामुपाधेरन्तःकरणस्य चक्षुरादिभेदाधीनपरिणामव्यापारनिवृत्तौ सत्यामु-

भा० त्वादनुपलभ्यमाणस्वभावमप्युपाधिभेदेन भिन्नमिव यथा प्राणानुवादेनैव विद्यमानत्वमुच्यते। तत्र दृष्ट्यादिधर्म्मभेदकल्पना विवेचितार्थानभिज्ञतया सैन्धवघनवत्प्रज्ञानैकरसघनश्रुतिविरोधाच्च विज्ञानमानन्दं सत्यं ज्ञानं प्रज्ञानं ब्रह्मेत्यादिश्रुतिभ्यश्च। शब्दप्रवृत्तेश्च लौकिकी च शब्दप्रवृत्तिश्चक्षुषा रूपं विजानाति। श्रोत्रेण शब्दं विजानाति। वाचान्नस्य रसं विजानातीति च सर्व्वैव च दृष्ट्यादिशब्दाभिधेयानां विज्ञानशब्दवाच्यतामेव दर्शयति। शब्दप्रवृत्तिश्च प्रमाणं। दृष्टान्तोपपत्तेश्च। यथा हि लोके स्वच्छस्वाभाव्ययुक्तः स्फटिकस्तन्निमित्तमेव केवलं हरि-

---

आ० पाधिभेदस्यानुह्यास्यमानत्वात्तेन भिन्नमिवानुपलभ्यमानस्वभावं यद्यपि तथापि चक्षुर्द्वारेण जायमानायां बुद्धिवृत्तौ व्यक्तं चैतन्यं दृष्टिः। प्राणद्वारेण जातायां तस्यां व्यक्तं घ्रातिरित्युपाधिभेदात्प्राणभेदानुवादेन चैतन्यस्याविनाशित्वे वाक्यतात्पर्य्यमित्यर्थः॥ उक्ते वाक्यतात्पर्य्ये स्थिते फलितमाह। तत्रेति॥ इतश्च दृष्ट्यादिभेदकल्पना न श्लिष्टेत्याह। सैन्धवेति॥ तदेव स्पष्टयति। विज्ञानमिति। न दृष्ट्यादिभेदकल्पनेति शेषः॥ यथा घटाकाशो महाकाश इत्येकशब्दविषयत्वादुपाधिभेदेऽप्याकाशस्यैकत्वमिष्टं तथैकशब्दप्रवृत्तेरेकत्वं चितोऽपि स्वीकर्त्तव्यं तत्कुतो दृष्ट्यादिभेदसिद्धिरित्याह। शब्दप्रवृत्तेश्चेति॥ तामेव विवृणोति। लौकिकी चेति॥ यत्तु सिद्धान्ते दृष्टान्तो नास्तीति तत्राह। दृष्टान्तेति। किमेकरूपत्वे वस्तुनो दृष्टान्तो नास्ति किं वा मिथ्यात्वे तन्नानारूपस्येति वक्तव्यं। नाद्यः। नानारूपवस्तुवादिभिरप्येकैकरूपस्यानवस्थापरिहारार्थमनानारूपत्वाङ्गीकारादस्माकं दृष्टान्तसिद्धेर्वस्तुत्वहेतोश्च तत्रैवानैकान्तिकत्वात्तस्मादेकरूपमेव वस्तु स्वीकर्त्तव्यमिति भावः॥ द्वितीयं दूषयति। यथा हीति। तन्निमित्तमेवेत्यत्र तच्छब्देन स्वच्छस्वाभाव्यं परामृश्यते। स्फटिके हरितादिधर्म्माणां

भा० तन्नीललोहितायुपाधिभेदसंयोगात्तदाकारत्वं भजते । न च स्वच्छस्वाभाव्यव्यतिरेकेण हरितनीललोहितादिलक्षणा धर्मभेदाः स्फटिकस्य कल्पयितुं शक्यन्ते। तथा चक्षुरायुपाधिभेदसंयोगात् प्रज्ञानघनस्वभावस्यैवात्मज्योतिषो दृष्ट्यादिशक्तिभेद उपलक्ष्यते। प्रज्ञानघनस्य स्वच्छस्वाभाव्यात् । स्फटिकस्वच्छस्वाभाव्यवज्ज्योतिष्ट्वाच्च ॥

यथा चादित्यज्योतिरवभास्य भेदैः संयुज्यमानं हरितनीलपीतलोहितादिभेदैरविभाज्यं तदाकाराभासं भवति। तथा च कृत्स्नं जगदवभासयच्चक्षुरादीनि च तदाकारं भवति। तथा चोक्तमात्मनैवायं ज्योतिषाऽऽस्त इत्यादि। न

व्या० स्वाभाविकत्वं किं न स्यादित्याशङ्क्याह । न चेति । तस्य हि स्वच्छं स्वाभाव्यं तद्रूपेण हरितायुपाधिभेदसम्बन्धव्यतिरेकेणेति यावत् ॥ एकस्य नानारूपत्वं मिथ्येत्यत्र दृष्टान्तमुक्त्वा दार्ष्टान्तिकमाह । तथेति । आत्मा मिथ्यानानानिर्भास उपहितत्वात्स्फटिकवदित्यर्थः ॥ किञ्चात्मा मिथ्यानानात्वाधारः स्वच्छत्वात्स्फटिमणिवदित्याह । प्रज्ञानेति । किञ्चात्मा कल्पितनानात्वाधारो ज्योतिष्ट्वादादित्यादिज्योतिर्वदित्याह । स्वयमिति ।

आदित्याद्यवकल्पितोऽपि भेदोऽस्तीत्याशङ्क्य विवक्षितं साम्यमाह। यथा चेत्यादिना । अविभाज्यं वस्तुतो विभागायोग्यमिति यावत् ॥ चक्षुरादीनि चावभासयदिति सम्बन्धः ॥ आत्मनः सर्वावभासकत्वे वाक्योपक्रमं प्रमाणयति। तथेति ॥ यत्तु निरवयवेष्वपि नानारूपत्वमनुमेयमिति तत्राह । न चेति ॥ आकाशादीनां दृष्टान्तत्वमाशङ्क्य निराचष्टे । यदपीत्यादिना ॥ कथमाकाशस्यानेकधर्मवत्त्वमौपाधिकमित्याशङ्क्य तस्य सर्वगतत्वं तावदौपाधिकमिति साधयति । आकाशस्येति ॥ कथं तर्हि सर्वगतत्वव्यवहारस्तत्राह । सर्वोपाधीति ॥ नन्वाकाशस्य सर्वेन

भा० च निरवयवेष्वनेकात्मता शक्यते कल्पयितुं। दृष्टान्ताभावात्। यदप्याकाशस्य सर्व्वगतत्वादिधर्म्मभेदः परिकल्प्यते परमाण्वादीनाञ्च गन्धरसाद्यनेकगुणवत्त्वं तदपि निरूप्यमाणं परोपाधिनिमित्तमेव च भवत्याकाशस्य तावत् सर्व्वगतत्वं नामतः स्वतो धर्म्मोऽस्ति। सर्व्वोपाधिसंश्रयाद्धि सर्व्वत्र स्वेन रूपेण सत्त्वमपेक्ष्य सर्व्वगतत्वव्यवहारो न त्वाकाशः क्वचिद्गतो वाऽगतो वा। स्वतो गमनं हि नाम देशान्तरस्थस्य देशान्तरेण संयोगकारणं। सा च क्रिया नैवाविशेषे सम्भवति। एवं धर्म्मभेदा नैव सन्त्याकाशे। तथा परमाण्वादावपि। परमाणुर्नाम पृथिव्या गन्धघनायाः परमः सूक्ष्मोऽवयवो गन्धात्मक एक एव न तस्य पुनर्गन्ध-

---

व्या० गमनमपेक्ष्य सर्व्वगतत्वं किमिति न व्यवक्रियते तत्राह। न त्विति॥ आकाशे गमनायोगं वक्तुं तत्स्वरूपमाह। गमनं हीति॥ ननु कुतश्चिद्विभागे संयोगे च केनचिद्देशे न तत्कारणीभूता क्रियापि श्येनादाविवाकाशे भविष्यति नेत्याह। सा चेति। सावयवे हि श्येनादौ क्रिया दृश्यते आकाशत्वविशेषे निरवयवं कुतस्तत्र क्रियेत्यर्थः॥ तथापि धर्म्मान्तराण्याकाशे भविष्यन्तीत्याशङ्क्य तेषामपि क्रियापूर्व्वकाणामुक्तन्यायकवलीकृतत्वमाह। एवमिति। भेदाभेदाभ्यां दुर्व्वचत्वाच्च तत्र धर्म्मधर्म्मिभावो न सम्भवतीति भावः॥ आकाशे दर्शितन्यायमन्यत्रापि सञ्चारयति। तथेति॥ पार्थिवत्वं परमाणोरेकं रूपं गन्धवत्त्वं चापरमित्यनेकरूपत्वमित्याशङ्क्याह। परमाणुर्नामेति। न हि पार्थिवत्वातिरेकि गन्धवत्त्वं प्रामाणिकमिति भावः॥ वैशेषिकपरिभाषामाश्रित्य शङ्कयति। अथेति॥ पार्थिवपरमाणौ रसादिमत्त्वमनौपाधिकं न भवति जलादिसंसर्गकृतत्वात्तथा च निरुपाधिकभेदेनेदमुदाहरणमिति परिहरति। न तत्रापीति॥ उक्तन्यायस्य दिगादावपि

उ॰ यत्र वाऽन्यदिव स्यात्तत्रान्योऽन्यत्पश्येदन्योऽन्यज्जिघ्रेदन्योऽन्यद्रसयेदन्योऽन्यद्वदेदन्योऽन्य-

---

भा॰ वत्त्वं नाम शक्यते कल्पयितुं। अथ तस्यैव रसादिमत्त्वं स्यादिति चेन्न। तत्राप्यब्ादिसंसर्गनिमित्तत्वात्। तस्मान्न निरवयवस्यानेकधर्मवत्त्वे दृष्टान्तोऽस्ति। एतेन दृगादिशक्तिभेदानां पृथक्चक्षूरूपादिभेदेन परिणामभेदकल्पना परमात्मनि प्रत्युक्ता ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥

जाग्रत्स्वप्नयोरिव यद्विजानीयात्तद्द्वितीयं प्रविभक्तमन्यत्वेन नास्तीत्युक्तमतः सुषुप्ते न विजानाति विशेषं। ननु यद्यस्यायमेवास्य स्वभावः किं निमित्तमस्य विशेषविज्ञानं स्वभावपरित्यागेन। अथ विशेषविज्ञानमेवास्य स्वभावः कस्मादेष विशेषं न विजानातीत्युच्यते। शृणु। यत्र यस्मिन् जागरिते स्वप्ने वान्यदिवात्मनो वस्त्वन्तरमिवाविद्यया प्रत्यु-

---

व्या॰ समत्वं मलीमसं हरति। तस्मादिति। सन्ति परस्मिन्नात्मनि दृगादिशक्तिभेदास्तेषां मध्ये दृक्छक्तिश्चक्षुरात्मना रूपात्मना च पृथगेव परिणमते। घ्राणशक्तिश्च घ्राणात्मना गन्धात्मना चेत्यनेन क्रमेण परस्मिन्परिणामकल्पना भर्तृप्रपञ्चैर्या कृता सापि परस्यैकरूपत्वोपपादनेन निरस्तेत्याह। एतेनेति ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥

औपाधिको द्रष्ट्रादिभेदो न वास्तवोऽस्तीत्युपपाद्य वृत्तमनुस्मरति। जाग्रदिति॥ यत्रेत्युत्तरवाक्यव्यावर्त्यामाशङ्कां दर्शयति। नन्विति। किमस्य विशेषविज्ञानराहित्यं स्वरूपं किं वा विशेषविज्ञानवत्त्वं। आद्ये जाग्रत्स्वप्नयोरनुपपत्तिः। द्वितीये सुषुप्तेरसि-

उ० च्छृणुयादन्योऽन्यन्मन्वीतान्योऽन्यत्स्पृशेदन्योऽन्य-
द्विजानीयात् ॥ ३१ ॥

सलिल एको द्रष्टाऽद्वैतो भवत्येष ब्रह्मलोकः

भा० पस्थापितं भवति तत्र तस्मादविद्याप्रत्युपस्थापितादन्योऽन्य-
मिवात्मानं मन्यमानोऽसत्यात्मनः प्रविभक्ते वस्त्वन्तरेऽ
सति चात्मनि ततः प्रविभक्तोऽन्योऽन्यत्पश्येदुपलभेत ।
तच्च दर्शितं स्वप्ने प्रत्यक्षतो घ्नन्तीव जिनन्तीवेति ।
तथान्योऽन्यज्जिघ्रेद्रसयेद्वदेच्छृणुयान्मन्वीत स्पृशेद्विजानीया
दिति ॥ ३१ ॥

यत्र पुनः साविद्या सुषुप्ते वस्त्वन्तरप्रत्युपस्थापिका
शान्ता तेनान्यत्वेनाविद्याप्रविभक्तस्य वस्तुनोऽभावात्तत्केन
कं पश्येज्जिघ्रेद्विजानीयाद्वातः स्वेनैव हि प्राज्ञेनात्मना
स्वयं ज्योतिःस्वभावेन सम्परिष्वक्तः समस्तः सम्प्रसन्न आप्त-
काम आत्मकामः सलिलवत्स्वच्छीभूतः सलिल इव सलिल
एको द्वितीयस्याभावात्। अविद्यया हि द्वितीयः प्रविभज्यते।

व्या० द्विरिति भावः । प्रतीचश्चिन्मात्रज्योतिषो विशेषविज्ञान-
राहित्यमेव स्वरूपं तथापि स्वाविद्याकल्पितविशेषविज्ञानवत्त्व-
माश्रित्यावस्थाद्वयं सिद्ध्यतीत्युत्तरं वाक्यमवलम्ब्योत्तरमाह ।
उच्यत इत्यादिना । तच्चेत्याविद्यं दर्शनमित्यर्थः ॥ ३१ ॥

पूर्वोक्तवस्तूपसंहारार्थं सलिलवाक्यमुत्थापयति । यत्रेत्या-
दिना । तेनाविद्यायाः शान्तत्वेनेति यावत् । वस्तुनोऽभावा-
त्तत्रेति शेषः ॥ सुषुप्ते विशेषविज्ञानाभावप्रयुक्तं फलमाह । अत
इति । पूर्वमेवास्यार्थस्योक्तत्वं द्योतयितुं हिशब्दः । सम्परि-
ष्वङ्गफलं समस्तत्वमपरिच्छिन्नत्वं तत्फलं सम्प्रसन्नत्वं । असम्प्र-

उ॰ सम्राडिति हैनमनुशशास याज्ञवल्क्य एषास्य परमा गतिरेषास्य परमा सम्पदेषोऽस्य परमो

भा॰सा च शान्ताचात एको द्रष्टा दृष्टेरविपरिलुप्तत्वात्मज्योतिःस्वभावा या । अद्वैतो द्रष्टव्यस्य द्वितीयस्याभावादेतदमृतमभयमेष ब्रह्मलोको ब्रह्मैव लोको ब्रह्मलोकः पर एवायमस्मिन् काले व्यावृत्तकार्य्यकरणोपाधिभेदः स्व आत्मज्योतिषि शान्तसर्व्वसम्बन्धो वर्त्तते । हे सम्राडिति ह एवं हैनं जनकमनुशशासानुशिष्टवान् याज्ञवल्क्य इति । श्रुतेर्वचनमेतत्कथं वानुशशास एषास्य विज्ञानमयस्य परमा गतिः । यास्त्वन्या देहग्रहणलक्षणा ब्रह्मादिस्तम्बपर्य्यन्ता अविद्या कल्पितास्ता गतायातोऽपरमा अविद्याविषयत्वात् । इयन्तु देवतादिगतीनां कर्म्मविद्यासाध्यानां परमोत्तमा । यः समस्तात्मभावो यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानातीत्येषैव च परमा सम्पत्सर्व्वासां सम्पदां विभूतीनां इयं परमा स्वाभाविकत्वादस्याः कृतका ह्यन्याः सम्पदः ।

व्या॰ सादौ हि परिच्छेदाभिमानवतः ॥ सम्प्रसन्नत्वे हेत्वन्तरमाह । आप्तकाम इति ॥ तदेव सम्प्रसन्नत्वं दृष्टान्तेन स्पष्टयति । सलिलवदिति ॥ उक्तेऽर्थे वाक्याक्षराणि योजयति । सलिल इवेति ॥ द्वितीयस्याभावं सुषुप्ते व्यक्तीकरोति । अविद्ययेति । अस्पष्टा स्पष्टेति वाच्छेदः । एकोऽद्वैतश्चेत्यभ्यासस्तात्पर्य्यलिङ्गं ॥ तस्य परमपुरुषार्थत्वं दर्शयन्कूटस्थत्वमाह । एतदिति ॥ किमिति परा-समासमुपेक्ष्य कर्म्मधारयो गृह्यते तत्राह । पर इति । अस्मिन्काले सुषुप्तावस्थायामित्येतत् । परमार्थं साधयति ॥ यामिति ॥ प्रस्तुतं समस्तात्मभावं विशेषयित्वागमापायिभ्यो विशिनष्टि ।

उ० लोक एषोऽस्य परम आनन्द एतस्यैवानन्द-
स्यान्यानि भूतानि मात्रामुपजीवन्ति ॥ ३२ ॥

भा० तथैषोऽस्य परमो लोकः । येऽन्ये कर्म्मफलाश्रया लोका-स्तेऽस्यापरमाः । अयन्तु न केन च कर्म्मणा मीयते स्वाभाविकत्वादेषोऽस्य परमो लोकः । तथैषोऽस्य परम आनन्दः । यान्यन्यानि विषयेन्द्रियसम्बन्धजनितानि आनन्दजातानि तान्यपेक्ष्यैषोऽस्य परम आनन्दो नित्यत्वाद्यो वै भूमा तत्सुखमिति श्रुत्यन्तरात् । यत्रान्यत्पश्यत्यन्यद्विजानाति तदल्पं मर्त्त्यमसुख्यं सुखमिदं तु तद्विपरीतं । अत एव एषोऽस्य परम आनन्दः । एतस्यैवानन्दस्य मात्रां कलामविद्याप्रत्युपस्थापितां विषयेन्द्रियसम्बन्धकालविभाव्यामन्यानि भूतानि उपजीवन्ति । तत एवानन्दादविद्यया प्रविभज्यमानस्वरूपाण्यन्यत्वेन तानि ब्रह्मणःपरिकल्प्यमानान्यन्यानि सन्त्युपजीवन्ति भूतानि विषयेन्द्रियसम्पर्कद्वारेण विभाव्यमानां॥ ३२॥

आ० यत्रेति ॥ सर्व्वात्मभावाख्यस्य लोकस्य परमत्वमुपपादयति । येऽन्य इति । मीयते परिच्छिद्यते साध्यत इति यावत् ॥ सैषुप्तस्य सर्व्वात्मभावस्य परमानन्दत्वं विशदयति । यानीति ॥ आत्मनोऽनवच्छिन्नानन्दत्वे छान्दोग्यश्रुतिं संवादयति । यो वै भूमेति ॥ ननु वैषयिकमेकं सुखमात्मरूपं चापरमिति सुखभेदाङ्गीकारादपसिद्धान्तः स्यादित्याशङ्क्य मुख्यामुख्यभेदेन तदुपपत्तेर्मैवमित्याह । यत्रेत्यादिना ॥ किञ्च वस्तुतो नास्त्येवात्मसुखातिरिक्तं वैषयिकं सुखमित्याह । एतस्येति ॥ ब्रह्मातिरिक्तचेतनाभावे कान्युपजीवकानि स्युरित्याशङ्क्य परिहरति । कानीत्यादिना । विभाव्यमानामानन्दस्य मात्रामिति पूर्व्वेण सम्बन्धः ॥ ३२ ॥

उ॰ स यो मनुष्याणाꣳ राद्धः समृद्धो भवत्यन्येषामधिपतिः सर्व्वैर्मानुष्यैर्भोगैः सम्पन्नतमः स मनुष्याणां परम आनन्दोऽथ ये शतं मनुष्याणामानन्दाः स

भा॰ यस्य परमानन्दस्य मात्रा अवयवाः ब्रह्मादिभिर्मनुष्यपर्य्यन्तैर्भूतैरुपजीव्यन्ते तदानन्दमात्रावयवद्वारेण मात्रिणं परमानन्दमधिजिगमिषन्नाह । सैन्धवलवणशकलैरिव लवणशैलं। स यः कश्चिन्मनुष्याणां मध्ये राद्धः संसिद्धोऽविकलः समग्रावयव इत्यर्थः समृद्ध उपभोगोपकरणसम्पन्नो भवति। किञ्चान्येषां समानजातीयानामधिपतिः स्वतन्त्रः पतिर्न माण्डलिकः सर्व्वैः समस्तैर्मानुष्यकैरिति दिव्यभोगोपकरणनिवृत्त्यर्थं मनुष्याणामेव यानि भोगोपकरणानि तैः सम्पन्नानामप्यतिशयेन सम्पन्नः सम्पन्नतमः स मनुष्याणां परम आनन्दः। तत्रानन्दानन्दिनोरभेदनिर्द्देशान्नार्थान्तरभूतत्वमित्येतत्। परमानन्दस्यैवेयं विषयविषय्याकारेण

व्या॰ स यो मनुष्याणामित्यादिवाक्यतात्पर्य्यमाह। यस्येति॥ यथा सैन्धवावयवैः सैन्धवाचलं लोको बोधयति तथा तस्यानन्दस्य मात्रा नाम अवयवास्तत्प्रदर्शनद्वारेणावयविनं परमानन्दमधिगमयितुमिच्छन्ननन्तरो ग्रन्थः प्रवृत्त इत्यर्थः॥ तात्पर्य्यमुक्त्वाक्षराणि व्याचष्टे। स यः कश्चिदित्यादिना॥ राद्धत्वमविकलत्वञ्चेत्समृद्धत्वेन पुनरुक्तिरित्याशङ्क्याह। समग्रेति॥ तदेव समृद्धत्वमपीत्याशङ्क्य व्याकरोति। उपभोगेति॥ अन्तर्बहिःसम्पत्तिभेदादपुनरुक्तिरिति भावः। न केवलमुक्तमेव तस्य विशेषणं किन्तु विशेषणान्तरञ्चास्तीत्याह। किञ्चेति॥ विशेषणतात्पर्य्यमाह। दिव्येति॥ तदनिवर्त्तनत्वे तस्य वक्ष्यमाणगन्धर्वादिष्वन्तर्भावः

उ० एकः पितॄणां जितलोकानामानन्दोऽथ ये शतं पितॄणां जितलोकानामानन्दाः स एको गन्धर्वलोक आनन्दोऽथ ये शतं गन्धर्वलोक आनन्दाः

भा० मात्रा प्रसृतेति श्रुतं यत्र वा अन्यदिव स्यादित्यादिवाक्येन । तस्मायुक्तोऽयं स परम आनन्द इत्यभेदनिर्द्देशः युधिष्ठिरादितुल्यो राजात्रोदाहरणं दृष्टं । मनुष्यानन्दमादिं कृत्वा शतगुणोत्तरोत्तरक्रमेणोन्नीय परमानन्दं यत्र भेदो निवर्त्तते तमधिगमयतीति । अत्रायमानन्दः शतगुणोत्तरोत्तरक्रमेण वर्द्धमानो यत्र वृद्धिकाष्ठामनुभवति । यत्र गणितभेदो निवर्त्ततेऽन्यदर्शनश्रवणमननभावात्तं परमानन्दं विवचन्नाह । अथ ये मानुष्या एवंप्रकाराः शतमानन्दभेदाः स एकः पितॄणां । तेषां विशेषणं जितलोकानामिति । श्राद्धादिकर्मभिः पितॄन्तोषयित्वा तेन कर्मणा जितो लोको येषां ते जितलोकाः पितर-

---

था० स्यादिति भावः । अतिशयेन सम्पन्न इति शेषः ॥ अभेदनिर्द्देशस्याभिप्रायमाह । तत्रेति ॥ प्रकृतं वाक्यं सप्तम्यर्थः । आत्मनः सकाशादानन्दस्येति शेषः ॥ औपचारिकत्वं भेदनिर्द्देशस्य भविष्यतीत्याशङ्क्याह । परमानन्दस्येति ॥ तस्यैव विषयित्वं विषयत्वमिति स्थिते फलितमाह । तस्मादिति ॥ यथोक्तो मनुष्यो न दृष्टिपथमवतरतीत्याशङ्क्याह । युधिष्ठिरादीति ॥ अथ ये शतं मनुष्याणामित्यादेस्तात्पर्य्यमाह । दृष्टमिति ॥ शतगुणेनोत्तरोत्तरत्वानन्दस्योत्कर्षप्रदर्शनक्रमेण परमानन्दमुन्नीय तमधिगमयत्युत्तरेण ग्रन्थेनेति सम्बन्धः ॥ परमानन्दमेव विशिनष्टि । यत्रेति ॥ भेदः सङ्ख्याव्यवहारः ॥ उक्तमेव प्रपञ्चयति । यत्रेत्यादिना ॥ पर-

ॐ स एकः कर्म्मदेवानामानन्दो ये कर्म्मणा देवत्वमभिसम्पद्यन्ते। अथ ये शतं कर्म्मदेवानामानन्दाः स एक आजानदेवानामानन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथ ते शतमा-

भा॰ स्तेषां पितॄणां जितलोकानां मनुष्यानन्दशतगुणीकृतपरिमाण एक आनन्दो भवति। सोऽपि शतगुणीकृतो गन्धर्वलोक एक आनन्दो भवति। स च शतगुणीकृतः कर्मदेवानामेक आनन्दः। अग्निहोत्रादिश्रौतकर्माणा ये देवत्वं प्राप्नुवन्ति ते कर्मदेवाः।

तथैवाजानदेवानामेक आनन्दः। आजानत एवोत्पत्तित एव ये देवास्ते आजानदेवाः। यश्च श्रोत्रियोऽधीतवेदोऽवृजिनो वृजिनं पापं तद्रहितो यथोक्तकारीत्यर्थः। अकामहतो वीततृष्णः। आजानदेवेभ्योऽर्वाक् यावन्तो

आ॰ मानन्दे विरुद्धिकाष्ठायां हेतुमाह। अन्येति॥ यद्यपि यस्तेत्यादिनोक्तमेतत्तथापीहाक्षरव्याख्यानावसरे तदेव विवृतमित्यविरोधः। तत्तदानन्दप्रदर्शनानन्तर्य्यं तत्र तत्राप्यथशब्दार्थः। तत्तद्वाक्योपक्रमो वा। एवं प्रकारत्वसम्पन्नत्वादि पितॄणामानन्द इति सम्बन्धः॥ श्राद्धादिकर्म्मभिरित्यादिशब्देन पिण्डपितृयज्ञादि गृह्यते॥ के ते कर्म्मदेवा नाम तत्राह। अग्निहोत्रादीति॥

यथा गन्धर्वानन्दः शतगुणीकृतः कर्म्मदेवानामेक आनन्दस्तथा कर्म्मदेवानन्दः शतगुणीकृतः सन्नाजानदेवानामेक आनन्दो भवतीत्याह। तथैवेति॥ कुत्र वीततृष्णत्वं तत्राह। आजानदेवेभ्य इति॥ श्रोत्रियादिवाक्यस्य प्रकृतासङ्गतिमाशङ्क्याह। तस्य चेति॥ एवम्भूतस्य विशेषणत्रयविशिष्टस्येति यावत्। प्रजापति-

उ॰ ज्ञानदेवानामानन्दाः स एकः प्रजापतिलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथ ये शतं प्रजापतिलोक आनन्दाः स एको

भा॰ विषयास्तेषु तस्य चैवंभूतस्याजानदेवैः समान आनन्द इत्येतदन्वाकृष्यते। चशब्दात्तच्छतगुणीकृतपरिमाणः प्रजापतिलोक एक आनन्दो विराट्शरीरे। तथा तद्विज्ञानवान् श्रोत्रियोऽधीतवेदश्चावृजिन इत्यादि पूर्ववत्। तच्छतगुणीकृतपरिमाणो ब्रह्मलोक एक आनन्दो हिरण्यगर्भात्मनि। यश्चेत्यादि पूर्ववदेव। अतःपरं गणितनिवृत्तिः। एष परम आनन्द इत्युक्तो यस्य च परमानन्दस्य ब्रह्मलोकाद्यानन्दा मात्रा उदधेरिव विप्रुषः। एवं शतगुणोत्तरोत्तरवृद्ध्युपेतानन्दा यत्रैकतां यान्ति। यश्च श्रोत्रियप्रत्यक्षोऽथैष

आ॰ लोकशब्दस्य ब्रह्मलोकशब्दादर्थभेदमाह। विराडिति॥ यथा विराडात्मन्याजानदेवानन्दः शतगुणीकृतः सन्नेक आनन्दो भवति तथा विराडात्मोपासिता श्रोत्रियत्वादिविशेषणो विराजा तुल्यानन्दः स्यादित्याह। तथेति॥ तच्छतगुणीकृत इति तच्छब्दो विराडानन्दविषयः। श्रोत्रियत्वादिविशेषणवानपि हिरण्यगर्भोपासकस्तेन तुल्यानन्दो भवतीत्याह। यश्चेति॥ हिरण्यगर्भानन्दादुपरिष्टादपि ब्रह्मानन्दे गणितभेदे प्राकरणिके प्राप्ते प्रत्याह। अतः परमिति॥ एषोऽस्य परमानन्द इत्युपक्रम्य किमित्यानन्दान्तरमुपदर्शितमित्याशङ्क्याह। एष इति॥ तथापि सौषुप्तसर्वात्मत्वमुपेक्षितमिति चेन्नेत्याह। यस्य चेति॥ प्रकृतस्य ब्रह्मानन्दस्यापरिच्छिन्नत्वमाह। तत्र हीति॥ अनवच्छिन्नत्वफलमाह। भूमत्वादिति॥ ब्रह्मानन्दादितरे परिच्छिन्ना मर्त्याश्चेत्याह। इतर इति॥ अथ यत्रान्यत्पश्यतीत्यादिश्रुते-

उ॰ ब्रह्मलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतो ऽथैष एव परम आनन्दः।

भा॰ एष सम्प्रसादलक्षणः परम आनन्दस्तत्र हि नान्यत्पश्यति नान्यच्छृणोति अतो भूमा भूमत्वादमृतः। इतरे तद्विपरीता आनन्दाः। अत्र च श्रोत्रियत्वावृजिनत्वे तुल्ये। अकामहतत्वकृतो विशेष आनन्दशतगुणवृद्धिहेतुः। अत्रैतानि साधनानि श्रोत्रियत्वावृजिनत्वाकामहतत्वानि तस्य तस्यानन्दस्य प्राप्त्यावर्थादभिहितानि। यथा कर्माण्यग्निहोत्रादीनि देवानां देवत्वप्राप्तौ। तत्र च श्रोत्रियत्वावृजिनत्वलक्षणे कर्मणी अधरभूमिष्वपि समाने इति नोत्तरानन्दप्राप्तिसाधने अभ्युपेयेते ॥

व्या॰ रिति भावः ॥ श्रोत्रियादिपदानि व्याख्याय तात्पर्यं दर्शयति। अत्र चेति ॥ मध्ये विशेषणेषु त्रिष्विति यावत्। तुल्ये सर्व्वपर्य्यायेष्विति शेषः। विशेषणान्तरे विशेषमाह। अकामहतत्वेति ॥ तयोक्तविभागमुपपादयितुं सिद्धमर्थमाह। अत्रैतानीति ॥ यश्चेत्यादिवाक्यं सप्तम्यर्थः। तस्य तस्यानन्दस्येति देवप्राजापत्यादिनिर्देशः॥ अर्थादभिहितत्वे दृष्टान्तमाह। यथेति ॥ ये कर्म्मणा देवत्वमित्यादिश्रुतिसामर्थ्याद्देवानन्दाप्तौ यथा कर्म्माणि साधनान्युक्तानि तथा यश्चेत्यादिश्रुतिसामर्थ्यादेव तान्यपि श्रोत्रियत्वादीनि तत्तदानन्दप्राप्तौ साधनानि विवक्षितानीत्यर्थः ॥ ननु त्रयाणामविशेषश्रुतौ कथं श्रोत्रियत्वावृजिनत्वयोः सर्व्वत्र तुल्यत्वं। न हि ते पूर्व्वभूमिषु श्रुते तथा चाकामहतत्ववदानन्दोत्कर्षे तयोरपि हेतुतेति तत्राह। तत्र चेति ॥ निर्द्धारणायां सप्तमी। न हि श्रोत्रियत्वादिशून्यः सार्व्वभौमादिसुखमनुभवितुमुत्सहते। तथा च सर्व्वत्र श्रोत्रियत्वादेस्तुल्यत्वान्न तदानन्दातिरेकप्राप्त्यसाधारणं साधनमित्यर्थः ॥

उ० एष ब्रह्मलोकः सम्राडिति होवाच याज्ञवल्क्यः सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीत्यत्र ह याज्ञवल्क्यो बिभयाञ्चकार मेधावी राजा सर्वेभ्यो माऽन्तेभ्य उदरौत्सीदिति ॥ ३३ ॥

भा० अकामहततत्वं तु वैराग्यतारतम्योपपत्तेरुत्तरोत्तरभूम्यानन्दप्राप्तिसाधनमित्यवगम्यते। स एष परम आनन्दो वितृष्णश्रोत्रियप्रत्यक्षोऽधिगतः। तथा च वेदव्यासः। यच्च कामसुखं लोके यच्च दिव्यं महत्सुखं। तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलामिति। एष ब्रह्मलोको हे सम्राडिति होवाच याज्ञवल्क्यः सोऽहमेवमनुशिष्टो भगवते तुभ्यं सहस्रं ददामि गवां। अत ऊर्ध्वं विमोक्षायैव ब्रूहीति व्याख्यातमेतत्। अत्र ह विमोक्षायेत्यस्मिन्वाक्ये याज्ञवल्क्यो बिभयाञ्चकार भीतवान्। याज्ञवल्क्यस्य कारणमाह श्रुतिर्न याज्ञवल्क्यो वक्तृत्वसामर्थ्याभावाद्भीतवान् ज्ञानाद्वा किन्तर्हि मेधावी राजा सर्वेभ्यो मा मामन्तेभ्यः प्रश्ननिर्णयावसानेभ्य उत अरौत्सीत् आवृणोत् अवरोधं

आ० यदुक्तमानन्दशतगुणवृद्धिहेतुरकामहतत्वकृतो विशेष इति तदुपपादयति। अकामहतत्वन्त्विति॥ पूर्व्वपूर्व्वभूमिषु वैराग्यमुत्तरोत्तरभूम्यानन्दप्राप्तिसाधनं वैराग्यस्य तरतमभावेन परमकाष्ठोपपत्तेर्निरतिशयस्य तस्य परमानन्दप्राप्तिसाधनत्वसम्भवादित्यर्थः। यच्चेत्यादिवाक्यस्येत्थं तात्पर्य्यमुक्त्वा प्रकृते परमानन्दे विद्वदनुभवं प्रमाणयति। स एष इति॥ निरतिशयमकामहतत्वं परमानन्दप्राप्तिहेतुरित्यत्र प्रमाणमाह। तथा चेति॥

उ॰ स वा एष एतस्मिन् स्वप्नान्ते रत्वा चरित्वा

भा॰ कृतवानित्यर्थः । यद्यन्मया निर्णीतं प्रश्नरूपं विमोक्षार्थं तत्तदेकदेशत्वेनैव कामप्रश्नस्य गृहीत्वा पुनः पुनर्मां पर्य्यनुयुङ्क्त एव मेधावित्वादित्येतद्भयकारणं सर्व्वं मदीयं विज्ञानं कामप्रश्नव्याजेनोपादित्सतीति ॥ ३३ ॥

अत्र विज्ञानमयः स्वयं ज्योतिरात्मा स्वप्ने प्रदर्शितः । स्वप्नान्तबुद्धान्तसञ्चारेण कार्य्यकरणव्यतिरिक्तताकामकर्म्मप्रविवेकश्चासङ्गतया महामत्स्यदृष्टान्तेन प्रदर्शितः । पुनश्चाविद्याकार्य्यं स्वप्न एव घ्नन्तीवेत्यादिना प्रदर्शितं । अर्थादविद्यायाः सतत्त्वं निर्द्धारितमतद्धर्म्माध्यारोपणरूपलमनात्मधर्म्मत्वञ्च । तथा विद्यायाश्च कार्य्यं प्रदर्शितं सर्व्वात्मभावः स्वप्न एव प्रत्यक्षतः सर्व्वोऽस्मीति मन्यते । सोऽस्य

आ॰ प्रकृतं प्रत्यग्भूतं परमानन्दमेष इति परामृशति श्रुतिर्मेधावीत्याद्या व्याचष्टे । नेत्यादिना ॥ तथापि किन्तद्भयकारणं तदाह । यद्यदिति ॥ मेधावित्वात्प्रज्ञातिशयशालित्वादिति यावत् ॥ तदेव भयकारणं प्रकटयति । सर्व्वमिति ॥ ३३ ॥

स वा एष एतस्मिन्नित्याद्युत्तरग्रन्थसम्बन्धं वक्तुं वृत्तं कीर्त्तयति । अत्रेति ॥ अत्रायं पुरुषः स्वयं ज्योतिर्भवतीति वाक्यं समर्थ्यं ॥ वृत्तमर्थान्तरमनुद्रवति । स्वप्नान्तेति ॥ कार्य्यकरणव्यतिरिक्तत्वं प्रदर्शितमिति सम्बन्धः ॥ उक्तमर्थान्तरमाह । कामेति ॥ अथ यत्रैनं घ्नन्तीवेत्यादावुक्तमनुभाषते । पुनश्चेति ॥ किं तत्कार्य्यप्रदर्शनसामर्थ्यान्निर्द्धारितमविद्यायाः सतत्त्वं तदाह । अतद्धर्म्मेति ॥ अनात्मधर्म्मत्वमात्मनि चैतन्यवदस्वाभाविकत्वं । अविद्याकार्य्यंवद्विद्याकार्य्यञ्च स्वप्ने सर्व्वात्मभावलक्षणं प्रत्यक्षत एव प्रदर्शितमित्याह । तथेति ॥ सुप्ते स्वप्नवदेतद्दर्शितमित्याह ।

उ० दृष्ट्वैव पुण्यञ्च पापञ्च पुनः प्रतिन्यायं प्रतियोन्या द्रवति बुद्धान्तायैव ॥ ३४ ॥

भा० परमो लोक इति। तत्र च सर्व्वात्मभावः स्वभावोऽस्याविद्या-कामकर्म्मादिसर्व्वसंसारधर्म्मसम्बन्धातीतं रूपमस्य साक्षात्सुषुप्ते गृह्यत इत्येतद्विज्ञापितं स्वयं ज्योतिरात्मा एष परम आनन्द एष विद्याया विषयः। स एष परमः सम्प्रसादः सुखस्य च परा काष्ठेत्येतदेवमन्तेन ग्रन्थेन व्याख्यातं। तस्यैतत्सर्व्वं विमोक्षपदार्थस्य दृष्टान्तभूतं बन्धनस्य च। ते च एते मोक्षबन्धने सहेतुके सप्रपञ्चे निर्दिष्टेऽविद्याकार्य्ये तत्सर्व्वं दृष्टान्तभूतमेवेति तद्दार्ष्टान्तिकस्थानीये मोक्षबन्धने सहेतुके कामप्रश्नार्थभूते त्वया वक्तव्ये इति पुनः पर्य्यनुयुङ्क्ते जनकोऽत ऊर्द्धं विमोक्षायैव ब्रूहीति। तत्र महामत्स्यवत्स्वप्नबुद्धान्तावसङ्गः सञ्चरत्येक आत्मा स्वयं

आ० एवमिति॥ साक्षात्स्वरूपचैतन्यवशादित्येतत्। अन्यथोत्थितस्य सुखपरामर्शो न स्यादिति भावः। उक्तं विद्याकार्य्यं निगमयति। एष इति॥ तमेव विद्याविषयं विशदयति। स एष इति॥ वृत्तानुवादमुपसंहरति। इत्येतदिति॥ एवमन्तेन ग्रन्थेन ब्रह्मलोकान्तवाक्येनेति यावत्॥ सोऽहमित्यादेस्तात्पर्य्यमनुवदति। तच्चेति॥ यतो राजेत्थं मन्यतेऽतस्तस्य सहस्रदाने युक्ता प्रवृत्तिरित्यर्थः॥ अत ऊर्द्धमित्यादेरभिप्रायमनुद्रवति। ते चेति॥ यद्यपि यथोक्तलक्षणे मोक्षबन्धने प्रागेवोपदिष्टे तथापि पूर्व्वोक्तं सर्व्वं दृष्टान्तभूतमेव तयोरिति यतो राजा भ्राम्यति अतो मोक्षबन्धने दार्ष्टान्तिकभूते वक्तव्ये याज्ञवल्क्येनेति मन्यमानस्तं प्रेरयतीत्यर्थः। बन्धमोक्षयोर्वक्तव्यत्वेन प्राप्तयोरपि प्रथमं बन्धो

भा° ज्योतिरित्युक्तं। यथा चासौ कार्य्यकरणानि मृत्युरूपाणि परित्यजन्नुपादानश्च महामत्स्यवत्स्वप्नबुद्धान्तावनुसञ्चरति। तथा जायमानो म्रियमाणश्च तैरेव मृत्युरूपैः संयुज्यते वियुज्यते चोभौ लोकावनुसञ्चरतीति। सञ्चरणं स्वप्नबुद्धान्तावनुसञ्चारस्य दार्ष्टान्तिकत्वेन सूचितं। तदिह विस्तरेण सनिमित्तं सञ्चरणं वर्णयितव्यमिति तदर्थोऽयमारम्भः। तत्र च बुद्धान्तात्स्वप्नान्तमयमात्मानुप्रवेशितः। तस्मात्सम्प्रसादस्थानं मोक्षदृष्टान्तभूतं। ततः प्रच्याव्य बुद्धान्ते संसारव्यवहारः प्रदर्शयितव्य इति। तेनास्य सम्बन्धः स वै बुद्धान्तात्स्वप्नान्तक्रमेण सम्प्रसन्न एषः। तस्मिन्सम्प्रसादे स्थित्वा ततः पुनरीषत्प्रच्युतः स्वप्ने रत्वा चरित्वेत्यादि पूर्व्ववद्बुद्धान्तायैवाद्रवति॥ १४॥

आ० वर्ण्यत इति वक्तुं दृष्टान्तं स्मारयति। तत्रेति॥ दृष्टान्तमनूद्य दार्ष्टान्तिकस्य बन्धस्य सूचितत्वं दर्शयति। यथा चेत्यादिना॥ उभौ लोकावित्यत्र प्रथममेवंशब्दो द्रष्टव्यः॥ वृत्तमनूद्यानन्तरप्रकरणमुत्थापयति। तदिहेति॥ अज्ञः संसारी सत्यम्यर्थः। सनिमित्तं कामादिना निमित्तेन सहितमित्येतत्॥ प्रकरणारम्भमुक्त्वा समनन्तरवाक्यस्य व्यवहितेन सम्बन्धमाह। तत्र चेति॥ स वा एष एतस्मिन्बुद्धान्ते रत्वेत्युपक्रम्य स्वप्नान्तायैवेति वाक्यं सप्तम्या परामृश्यते॥ स्वप्नान्तशब्दस्य स्वप्नविषयव्यावृत्त्यर्थं विशिनष्टि। सम्प्रसादेति॥ कथं पुनः सम्प्रसन्नस्य संसारोपवर्णनमित्याशङ्क्याह। तत इति॥ प्रागुक्तः सप्तम्यर्थो व्यवहितो यस्तेनेति परामृश्यते। समनन्तरग्रन्थः पठ्यते॥ वाक्यस्य व्यवहितेन सम्बन्धमुक्त्वा तदक्षराणि योजयति। स वै बुद्धान्तादिति॥ स्वप्नान्ते रत्वा चरित्वेत्यादि बुद्धान्तायैवाद्रवतीत्येतदन्तं पूर्ववदिति योजना॥ १४॥

उ॰ तद्यथाऽनः सुसमाहितमुत्सर्जद्यायादेवमेवा-

भा॰ इत आरभ्यास्य संसारो वर्ण्यते । यथायमात्मा स्वप्ना-न्ताद्बुद्धान्तमागत एवमयमस्माद्देहाद्देहान्तरं प्रतिपत्स्यत इत्याहात्र दृष्टान्तः । तत्तत्र यथा लोके अनः शकटं सुसमाहितं सुष्ठु भृशं वा समाहितं भाण्डोपस्करणेनोलूखलमुसलशूर्पपिठरादिनान्नाद्येन च सम्पन्नं सम्भारेणाक्रान्तमित्यर्थः । तथा भाराक्रान्तं सदुत्सर्जच्छब्दं कुर्व-द्यथा यायाद्गच्छेच्छाकटिकेनाधिष्ठितं सत् । एवमेव यथोक्तो दृष्टान्तोऽयं शारीरः शरीरे भवः । कोऽसौ आत्मा लिङ्गोपाधिर्यः स्वप्नबुद्धान्ताविव जन्ममरणाभ्यां पाप्मसंसर्गवियोगलक्षणाभ्यामिहलोकपरलोकावनुसञ्चरति यस्योत्क्रमणमनु प्राणाद्युत्क्रमणं स प्राज्ञेन परेणात्मना स्वयं ज्योतिःस्वभावेनान्वारूढोऽधिष्ठितोऽवभास्यमानस्तथा

आ॰ तद्यथेत्यादेरिति तु कामयमान इत्युत्तरस्य सन्दर्भस्य तात्पर्यं तदिहेत्यत्रोक्तमनुवदति । इत आरभ्यत इति ॥ तद्यथेत्यस्माद्वाक्यादेतत् दृष्टान्तवाक्यमुत्थाप्य व्याकरोति । यथेत्यादिना । इत इत्यत्र दृष्टान्तमाहेति योजना । भाण्डोपस्करणेन भाण्डप्रमुखेन गृहोपस्करणेनेति यावत् ॥ तदेवोपकरणं विशिनष्टि । उलूख-लेति । पिठरं पाकार्थं स्थूलं भाण्डं ॥ अन्वयं दर्शयितुं यथा शब्दोऽनूद्यते ॥ लिङ्गविशिष्टमात्मानं विशिनष्टि । यः स्वप्नेति ॥ जन्ममरणे विशदयति । पाप्मेति ॥ कार्य्यकरणानि पाप्मशब्देनोच्यन्ते । शारीरस्य प्राधान्यं द्योतयति । यस्येति ॥ उत्सर्जद्याति चेत्तदाङ्गीकृतमात्मनो गमनमित्याशङ्क्याह । तत्रेति ॥ लिङ्गोपाधेरात्मनो गमनप्रतीतिरित्यत्राथर्वणश्रुतिं प्रमाणयति । तथा चेति ॥

उ॰ यएं शारीर आत्मा प्राज्ञेनात्मनान्वारूढमुत्सर्जंयाति यत्रैतदूर्ध्वोच्छ्वासी भवति ॥ ३५ ॥

भा॰ चोक्तमात्मनैवायं ज्योतिषाऽऽस्ते पल्ययते इति उत्सर्जंयाति तत्र चैतन्यात्मज्योतिषा भास्ये लिङ्गे प्राणप्रधाने गच्छति सति तदुपाधिरप्यात्मा गच्छतीव। तथा च श्रुत्यन्तरं कस्मिन्नहमित्यादि ध्यायतीवेति च। अत एवोक्तं प्राज्ञेनात्मनान्वारूढ इत्यन्यथा प्राज्ञेनैकीभूतः शकटवत्कथमुत्सर्जंयाति तेन लिङ्गोपाधिरात्मा उत्सर्जन्मर्मसु निःकृत्यमानेषु दुःखवेदनयार्त्तः शब्दं कुर्व्वन्याति गच्छति। तत्कस्मिन्काल इत्युच्यते। यत्रैतद्भवत्येतदिति क्रियाविशेषणमूर्द्ध्वोच्छ्वासी यत्रोर्द्ध्वोच्छ्वासित्वमस्य भवतीत्यर्थः। दृश्यमानस्याप्यनुवदनं वैराग्यहेतोरीदृशः कष्टः खल्वयं संसारो येनोत्क्रान्तिकाले मर्मसूत्कृत्यमानेषु स्मृतिलोपो दुःखवेदनार्त्तस्य पुरुषार्थसाधनप्रतिपत्तौ चासामर्थ्यं परवशीकृतचित्तस्य। तस्माद्यावदियमवस्था नागमिष्यति तावदेव

घा॰ उत्सर्जंयातीति श्रुतेर्मुख्यार्थत्वार्थमात्मनो वस्तुतो गमनं किं न स्यादित्याशङ्क्याह। ध्यायतीवेति ॥ औपाधिकमात्मनो गमनमित्यत्र लिङ्गान्तरमाह। अत एवेति॥ कथमेतावता निरुपाधेरात्मनो गमनं नेष्यते तत्राह। अन्यथेति ॥ प्रमाणफलं निगमयति। तेनेति ॥ तत्कस्मिन्नित्यत्र तच्छब्देनार्त्तस्य शब्दविशेषकरणपूर्व्वकं गमनं गृह्यते। एतदूर्द्ध्वोच्छ्वासित्वमस्य यथा स्यात्तथाऽवस्था यस्मिन्काले भवति तस्मिन्गमनमित्युपपादयति। ७ इत्यादिना ॥ किमिति प्रत्यक्षमर्थं श्रुतिरनुवदति तत्र।

उ० स यत्रायमणिमानं न्येति जरया वोपतपता

भा० पुरुषार्थसाधनकर्त्तव्यतायामप्रमत्ता भवतेत्याह कारुण्या-
च्छ्रुतिः ॥ ३५ ॥

तदस्योर्द्ध्वोच्छ्वासित्वं कस्मिन्काले किं निमित्तं कथं किमर्थं वा स्यादित्येतदुच्यते। सोऽयं प्राकृतः शिरःपाण्यादिमान्पिण्डो यत्र यस्मिन्काले यमणिमानमणोर्भावमणुत्वं कार्श्यमित्यर्थः नि एति निगच्छति। किं निमित्तं जरया वा स्वयमेव कालपक्वफलवज्जीर्णः कार्श्यं गच्छति उपतपतीत्युपतपत् ज्वरादिरोगग्रस्तेनोपतपता वा उपतप्यमानो हि रोगेण विषमाग्नितयान्नं भुक्तं न जरयति ततोऽन्नरसेनानुपचीयमानः पिण्डः कार्श्यमापद्यते तदु-

व्या० दृश्यमानेति ॥ कथं संसारस्वरूपानुवादमात्रेण वैराग्यसिद्धिस्तत्राह। ईदृश इति ॥ ईदृशत्वमेव विशदयति। येनेत्यादिना ॥ अनुवादश्रुतेरभिप्रायमुपसंहरति। तस्मादिति ॥ ३५ ॥

प्रश्नचतुष्टयमनूद्य तदुत्तरत्वेन स यत्रेत्यादि वाक्यमादाय व्याकरोति। तदस्येत्यादिना ॥ प्रश्नपूर्व्वकं कार्श्यनिमित्तं स्वाभाविकमागन्तुकं चैतद्दर्शयति। किंनिमित्तमित्यादिना ॥ कथं ज्वरादिना कार्श्यप्राप्तिरित्याशङ्क्याह। उपतप्यमानो हीति ॥ यथोक्तनिमित्तद्वयवशात्कार्श्यप्राप्तिं निगमयति। अणिमानमिति ॥ कस्मिन्काले तदूर्द्ध्वोच्छ्वासित्वमस्येति प्रश्नस्योत्तरमुक्तविधया सिद्धमित्याह। यदेति ॥ अवशिष्टप्रश्नस्योत्तरमाह। यदोर्द्ध्वोच्छ्वासीति। तत्र हि कार्श्यं निमित्तं सम्भृतशकटवन्नानाशब्दकरणं स्वरूपं। शरीरविमोक्षणञ्च प्रयोजनमित्यर्थः॥ स यत्रेत्यादिवाक्यादर्थसिद्धमर्थमाह। जरेति ॥ तद्यथेत्यादिवाक्यं प्रश्नपूर्व्वकमादाय व्याचष्टे। यदेत्यादिना ॥ फलं बन्धनात्प्रमुच्यत इति सम्बन्धः।

उ॰ वाणिमानं निगच्छति यद्यथाम्रं वोदुम्बरं वा पिप्पलं वा बन्धनात्प्रमुच्यत एवमेवायं पुरुष

भा॰ च्यते उपतपता वेत्यणिमानं निगच्छति। यदात्यन्तकार्श्यं प्रतिपन्नो ज्वरादिनिमित्तैस्तदार्द्धोच्छ्वासी भवति। यदो-र्द्धोच्छ्वासी तदा भृशाहितसम्भारशकटवदुत्सर्जद्याति जरा-भिभवो रोगादिपीडनं कार्श्यापत्तिश्च शरीरवतोऽवश्यं भाविन एतेऽनर्था इति वैराग्यायेदमुच्यते। यदाऽसावुत्सर्जद्याति तदा कथं शरीरं विमुञ्चतीति दृष्टान्त उच्यते। तत्तत्र यथाम्रं वा फलमुडुम्बरं वा फलं पिप्पलं वा फलं विषमानेकदृष्टान्तोपादानं मरणस्यानियतनिमित्त-त्वाख्यापनार्थं। अनियतानि हि मरणस्य निमित्तान्यसङ्ख्या-तानि च। एतदपि वैराग्यार्थमेव। यस्माद्यमनेकमरण-निमित्तवांस्तस्मात्सर्वदा मृत्योरास्ये वर्त्तत इति। बन्ध-

व्या॰ किमिति विषमानेकदृष्टान्तोपादानमेकेनापि विवक्षितसिद्धे-रित्याशङ्क्याह। विषमेति॥ कथं मरणस्यानियतानि अनेकानि निमित्तानि सम्भवन्तीत्याशङ्क्यानुभवमनुसृत्याह। अनियता-नीति॥ अथ मरणस्यानेकानियतनिमित्तवत्त्वसङ्कीर्त्तनं कुत्रोप-युज्यते तत्राह। एतदपीति॥ तदर्थवत्त्वमेव समर्थयते। यस्मा-दिति॥ स्त्यमप्रमत्तैर्भवितव्यमिति शेषः। वृन्तेन सह फलं येन रसेन सम्बध्यते स रसो बन्धनकारणभूतो बन्धनं वृन्तमेव वा बन्धनं यस्मिन् फलं सम्बध्यते रसेनेति व्युत्पत्तेस्तस्माद्बन्धनादने-कनिमित्तवशात्पूर्व्वोक्तस्य फलस्य भवति प्रमोक्षणमित्याह। बन्ध-नादित्यादिना॥ लिङ्गात्मोपाधिरस्येति तद्विशिष्टः शारीर-स्तथोच्यते। सम्प्रमुच्याद्भवतीति सम्बन्धः॥ समित्युपसर्गस्य तात्प-र्य्यमाह। नेत्यादिना॥ यदि. स्वप्नावस्थायामिव मरणावस्थायां

उ० एभ्योऽङ्गेभ्यः संप्रमुच्य पुनः प्रतिन्यायं प्रतियोन्या द्रवति प्राणायैव ॥ ३६ ॥

भा० नाद्बध्यते येन वृन्तेन सह बन्धनकारणो रसो यस्मिन्वा बध्यत इति वृन्तमेवोच्यते बन्धनं। तस्माद्रसाद्वृन्ताद्वा बन्धनात्प्रमुच्यते वाताद्यनेकनिमित्तमेवायं पुरुषो लिङ्गात्मा लिङ्गोपाधिरेभ्योऽङ्गेभ्यश्चक्षुरादिदेहावयवेभ्यः सम्प्रमुच्यते सम्यङ्निर्लेपेन प्रमुच्यते न सुषुप्तगमनकाल इव प्राणेन रचन्। किन्तर्हि सह वायुनोपसंहृत्य पुनः प्रतिन्यायं पुनः शब्दात्पूर्व्वमप्ययं देहाद्देहान्तरमसकृद्गतवान्यथा स्वप्नबुद्धान्तौ पुनः पुनर्गच्छति तथा पुनः प्रतिन्यायं प्रतिगमनं यथागतमित्यर्थः। प्रति योनि योनिं योनिं प्रति कर्म्मश्रुतादिवशादाद्रवति। किमर्थं। प्राणायैव प्राणव्यूहायैवेत्यर्थः। स प्राण एव गच्छति। ततः प्राणायैवेति विशेषणमन-

---

व्या० प्राणेन देहं रक्षन्नाद्रवतीति नाद्रियते केन प्रकारेण तर्हि तदा देहान्तरं प्रति गमनमित्याशङ्क्याह। किं तर्हीति॥ वायुना प्राणेन सह करणजातमुपसंहृत्याद्रवतीति पूर्व्ववत्सम्बन्धः॥ पुनः प्रतिन्यायमिति प्रतीकमादाय पुनःशब्दस्य तात्पर्य्यमाह। पुनरित्यादिना॥ तथा पुनराद्रवतीति सम्बन्धः। यथा पूर्व्वमिमं देहं प्राप्तवान्पुनरपि तथैव देहान्तरं गच्छतीत्याह। प्रतिन्यायमिति॥ देहान्तरगमने कारणमाह। कर्म्मेति॥ आदिशब्देन पूर्व्वप्रज्ञा गृह्यते। प्राणव्यूहाय प्राणानां विशेषाभिव्यक्तिलाभायेति यावत्॥ प्राणायेति श्रुतिः किमर्थमित्थं व्याख्यायते तत्राह। स प्राण इति॥ एतच्च तदन्तरप्रतिपत्त्यधिकरणे निर्द्धारितं॥ प्राणायेति विशेषणस्यानर्थक्याद्युक्तं प्राणव्यूहायेति विशेषणमित्याह। प्राणेति॥ नन्वस्य प्राणः सह वर्त्तते चेत्तावतैव भोगसि-

उ॰ तद्यथा राजानमायान्तमुग्राः प्रत्येनसः सूतग्रामण्योऽन्नैः पानैरावसथैः प्रतिकल्पन्तेऽयमायाति

भा॰ र्थकं प्राणव्यूहाय हि गमनं देहाद्देहान्तरं प्रति। तेन ह्यस्य कर्मफलभोगार्थसिद्धिः। न प्राणसत्तामात्रेण तस्मात्तादर्थ्यार्थं युक्तं विशेषणं प्राणव्यूहायेति ॥ ३६ ॥

तत्रास्येदं शरीरं परित्यज्य गच्छतो नान्यस्य देहान्तरस्योपादाने सामर्थ्यमस्ति देहेन्द्रियवियोगात्। न चान्येऽस्य भृत्यस्थानीया गृहमिव राज्ञे शरीरान्तरं कृत्वा प्रतीक्षमाणा विद्यन्ते। अथैवं सति कथमस्य शरीरान्तरोपादानमित्युच्यते। सर्वं ह्यस्य जगत्स्वकर्मफलोपभोगसाधनत्वायोपात्तस्वकर्मफलोपभोगाय चायं प्रवृत्तो देहाद्देहान्तरं प्रतिपित्सुः। तस्मात्सर्व्वमेव जगत्स्वकर्मप्रयुक्तं तत्कर्मफलोपभोगयोग्यं साधनं कृत्वा प्रतीक्षत एव। दृष्टं लोके

व्या॰ ऊरस्यं प्राणव्यूहेनेत्याशङ्क्याह। तेन हीति॥ अन्यथा सुषुप्तिमूर्च्छयोरपि भोगप्रसक्तेरित्यर्थः। तादर्थ्यार्थं प्राणस्य भोगार्थफलसिद्ध्यर्थमिति यावत्॥ ३६ ॥

तद्यथा राजानमित्यादिवाक्यव्यावर्त्यामाशङ्कामाह। तत्रेति॥ मुमूर्षावस्था सप्तम्यर्थः। यद्यस्य स्वयमसामर्थ्येऽपि शरीरान्तरकर्त्तारोऽन्ये भविष्यन्ति यथा राज्ञो भृत्या गृहनिर्म्मातारस्तत्राह। न चेति॥ स्वयमसामर्थ्यमन्येषां चासत्त्वमिति स्थिते फलितमाह। अथेति॥ तद्यथेत्यादिवाक्यस्य तात्पर्य्यं दर्शयन्नुत्तरमाह। उच्यत इति॥ भवत्वस्य स्वकर्म्मफलोपभोगे साधनत्वसिद्ध्यर्थं सर्व्वं जगदुपात्तं तथापि देहाद्देहान्तरं प्रतिपित्समानस्य किमायातमित्याशङ्क्याह। स्वकर्म्मेति॥ स्वकर्म्मणेत्यत्र मशब्दस्तत्कर्म्मप-

उ० त्ययमागच्छतीत्येवꣳ हैवं विदꣳ सर्वाणि भूतानि प्रतिकल्प्यन्त इदं ब्रह्मायातीदमागच्छतीति ॥ ३७ ॥

भा० पुरुषोऽभिजायत इति श्रुतेः । यथा स्वप्नजागरितं प्रतिपित्सोस्तत् कथमिति लोकप्रसिद्धो दृष्टान्त उच्यते । तत्र यथा राजानं राज्याभिषिक्तमायातं स्वराष्ट्रे उग्रा जातिविशेषाः क्रूरकर्म्माणो वा प्रत्येनसः प्रति प्रत्येनसि पापकर्मणि नियुक्ताः प्रत्येनसस्तस्करादिदण्डनादौ नियुक्ताः सूताश्च ग्रामण्यश्च सूतग्रामण्यः सूता वर्णसङ्करजा जातिविशेषा ग्रामण्यो ग्रामनेतारस्ते पूर्व्वमेव राज्ञ आगमनं बुद्ध्वाऽन्नैर्भोज्यभक्ष्यादिप्रकारैः पानैर्मदिरादिभिरावसथैश्च प्रासादादिभिः प्रतिकल्पयन्ते निष्पन्नैरेव प्रतीक्षन्तेऽयं राजा आयात्ययमागच्छतीत्येवं वदन्तः । एवं ह एवं विदं कर्म्मफ-

---

व्या० लोपभोगयोग्यमित्यत्र तच्छब्दश्च प्रकृतभोक्तृविषयो ॥ तत्र प्रमाणमाह । कृतमिति ॥ पुरुषो हि व्यक्तवर्त्तमानदेहो भूतपञ्चकादिना निर्म्मितमेव देहान्तरमभिव्याप्य जायत इति श्रुतेरर्थः ॥ उक्तमेवार्थं दृष्टान्तेन स्पष्टयति । यथेति ॥ स्वप्नस्थानाज्जागरितस्थानं प्रतिपत्तुमिच्छतः शरीरं पूर्व्वमेव कृतं नापूर्व्वं क्रियते तथा देहाद्देहान्तरं प्रतिपित्समानस्य पञ्चभूतादिना कृतमेव देहान्तरमित्यर्थः । सर्व्वेषां भूतानां देहान्तरं कृत्वा संसारिणि परलोकाय प्रस्थिते प्रतीक्षणं केन प्रकारेणेति प्रश्नपूर्व्वकं दृष्टान्तवाक्यमुत्थाप्य व्याचष्टे । तत्रेत्यादिना ॥ तत्र पापकर्म्मणि नियुक्तत्वमेव व्यनक्ति । तस्करादीति ॥ आदिपदेनान्येऽपि निग्राह्या गृह्यन्ते । दण्डनादीत्यादिशब्दो हिंसाप्रभेदसङ्ग्रहार्थः ।

उ॰ तद्यथा राजानं प्रयियासन्तमुग्राः प्रत्येनसः सूतग्रामण्योऽभिसमायन्त्येवमेवेममात्मानमन्तकाले

भा॰ लस्य वेदितारं संसारिणमित्यर्थः । कर्म्मफलं हि प्रस्तुतं तदेवंशब्देन परामृश्यते। सर्व्वाणि भूतानि शरीरकर्त्तॄणि करणानुग्राहीतॄणि चादित्यादीनि तत्कर्मप्रयुक्तानि कृतैरेव कर्मफलोपभोगसाधनैः प्रतीक्षन्ते। इदं ब्रह्म भोक्तृ कर्तृ चास्माकमायाति। तथेदमागच्छतीत्येवमेव कृत्वा प्रतीक्षन्त इत्यर्थः ॥ ३७ ॥

तमेवं जिगमिषुं के सह गच्छन्ति। ये वा गच्छन्ति ते किं तत्क्रियाप्रणुन्ना आहोस्वित्तत्कर्मवशात्स्वयमेव गच्छन्ति पारलोकशरीरकर्त्तॄणीव भूतानीत्यत्रोच्यते दृष्टान्तः । तद्यथा राजानं प्रयियासन्तं प्रकर्षेण यातुमिच्छन्त-

---

आ॰ ब्राह्मण्यां क्षत्रियात्सूत इति स्मृतिमाश्रित्य सूतशब्दार्थमाह। वर्णसङ्करेति ॥ भोज्यभक्ष्यादिप्रकारैरित्यादिशब्देन लेह्यचोष्ययोः सङ्ग्रहः। मदिरादिभिरित्यादिपदेन क्षीरादि गृह्यते। प्रासादादिभिरित्यादिशब्दो गोपुरतोरणादिग्रहार्थः । विद्वन्मात्रे प्रतीयमाने किमिति कर्म्मफलस्य वेदितारमिति विशेषोपादानमित्याशङ्क्याह। कर्म्मफलं हीति ॥ तत्कर्म्मप्रयुक्तानीत्यत्र तच्छब्दः संसारिविषयः संसारिणो वस्तुतो ब्रह्माभिन्नत्वात्तस्मिन्ब्रह्मशब्दः। अभ्यासस्तूभयत्रादरार्थः ॥ ३७ ॥

तद्यथा राजानं प्रयियासन्तमित्यादिवाक्यव्यावर्त्त्यंचोद्यमुत्थापयति । तमेवमिति । वागादयस्तमनुगच्छन्तीत्याशङ्क्याह । ये चेति ॥ तत्क्रियाप्रणुन्नास्तस्य गन्तुर्वागादिव्यापारेण प्रेरिताः समाहूता इति यावत् । यानि च भूतानि परलोकशब्दितं शरीरं कुर्व्वन्ति यानि वा करणानुग्राहीतॄणि आदित्यादीनि

उ॰ सर्वे प्राणा अभिसमायन्ति यत्रैतदूर्ध्वोच्छ्वासी भवति ॥ ३८ ॥ तृतीयं ब्राह्मणं ॥ ३ ॥

स यत्रायमात्माऽबल्यं न्येत्य सम्मोहमिव न्येत्यथै-

भा॰ मुख्याः प्रत्येनसः सूतग्रामण्यश्च एवाभिसमायन्त्याभिमुख्येन समायान्त्येकीभावेन तमभिमुखा आयान्त्यनाज्ञप्ता एव राज्ञा केवलतज्जिगमिषाभिज्ञाः । एवमेवेममात्मानं भोक्तारमन्तकाले मरणकाले सर्वे प्राणा वागादयोऽभिसमायन्ति यत्रैतदूर्ध्वोच्छ्वासी भवतीति व्याख्यातं ॥ ३८ ॥ ० ॥

इति बृहदारण्यकभाष्ये षष्ठस्याध्यायस्य तृतीयं ब्राह्मणं ॥ ३ ॥

स यत्रायमात्मा । संसारोपवर्णनं प्रस्तुतं । तत्रायं पुरुष एभ्योऽङ्गेभ्यः सम्प्रमुच्येत्युक्तं । तत् सम्प्रमोक्षणं कस्मिन् काले कथं वेति सविस्तरं संसरणं वर्णयितव्यमित्यारभ्यते । सो

व्या॰ तेष्वपि यथोक्तप्रश्नप्रवृत्तिं दर्शयति । परलोकेति ॥ नाद्यः परलोकार्थं प्रस्थितस्य वागादिव्यापाराभावादाज्ञानानुपपत्तेः। न द्वितीयो भोक्तृकर्म्मणापि वागादिष्वचेतनेषु स्वयं प्रवृत्तेरनुपपत्तेरिति चोदयितुरभिमानः ॥ उत्तरवाक्येनोत्तरमाह । अन्तेत्यादिना ॥ मरणकालमेव विशिनष्टि । यत्रेति ॥ अचेतनानामपि रथादीनाञ्चेतनप्रेरितानां प्रवृत्तिदर्शनाद्वागादीनामपि भोक्तृकर्म्मवशात्तदाहूतत्वमन्तरेण प्रवृत्तिः सम्भवतीति भावः ॥ ३८ ॥ इति षष्ठे प्रपाठके ज्योतिर्ब्राह्मणं तृतीयं विवृतं ॥ ३ ॥

ब्राह्मणान्तरमुत्थापयति । स यत्रेति ॥ सम्बन्धं वक्तुमुक्तं कीर्त्तयति । संसारेति ॥ वक्ष्यमाणोपयोगित्वेनोक्तमर्थान्तरमनुवदति । तत्रेति ॥ संसारप्रकरणं सप्तम्यर्थः ॥ सम्प्रत्याकाङ्क्षापूर्वकमुत्तरब्राह्मणमादत्ते । तत्सम्प्रमोक्षणमिति ॥ एवं ब्राह्मणमवतार्य्य तदक्षराणि व्याकरोति । सोऽयमित्यादिना ॥ गत्वा सम्मोहमिव न्येतीत्युक्त-

उ॰ नमेते प्राणा अभिसमायन्ति स एतास्तेजोमात्राः

भा॰ ऽयमात्मा प्रस्तुतो यत्र यस्मिन् काले अवल्यमबलभावं नि
एत्य गत्वा यद्देहस्य दौर्बल्यं तदात्मन एव दौर्बल्यमित्युप-
चर्य्यते अवल्यं नेत्येति। न ह्यसौ स्वतो मूर्त्तत्वादबलभावं
गच्छति तथा सम्मोहमिव संमूढतां सम्मोहो विवेकाभावः
सम्मोहतामिव नि एति निगच्छति। न चास्य स्वतः सम्मो-
होऽसम्मोहो वास्ति नित्यचैतन्यज्योतिःस्वभावत्वात्। तेनेव
शब्दः सम्मोहमिव न्येतीति। उत्क्रान्तिकाले हि करणोप-
संहारनिमित्तो व्याकुलीभाव आत्मन इति लक्ष्यते
लौकिकैः। तथा च वक्तारो भवन्ति संमूढः संमूढोऽयमिति।
अथ वोभयत्रैवशब्दप्रयोगो योज्योऽवल्यमिव न्येतीत्यसम्मो-
हमिव न्येतीति। उभयस्य परोपाधिनिमित्तत्वाविशेषात्।

व्या॰ एव सम्बन्धः। कथमात्मनो दौर्बल्यं तदाह। यद्देहस्येति॥ किमि-
त्युपचारो मुख्यमेवात्मनो दौर्बल्यं किं न स्यादित्याशङ्क्याह। न
हीति॥ यथायमबलभावं निगच्छति तथा सम्मोहं संमूढतामिव
प्रतिपद्यते। विवेकाभावो हि सम्मोहः॥ तथा च मूढतामिव निग-
च्छतीति युक्तमित्याह। तथेति॥ इवशब्दार्थमाह। न चेति॥ कथं
पुनरात्मनः समारोपितोऽपि सम्मोहः स्यान्नित्यचैतन्यज्योतिष्ट्वादि-
त्याशङ्क्याह। उत्क्रान्तीति॥ व्याकुलीभावो लिङ्गस्येति शेषः। तत्र
लौकिकीं वार्त्तामनुकूलयति। तथेति॥ यथाश्रुतमिवशब्दं
गृहीत्वा वाक्यं व्याख्याय पक्षान्तरमाह। अथवेति॥ इवशब्द-
प्रयोगस्योभयत्र योजनामेवाभिनयति। अवल्यमिति॥ उभयत्र
तद्योजने हेतुमाह। उभयस्येति॥ तुल्यप्रत्ययेनावल्यसम्मोहयोरे-
ककर्टकत्वनिर्देशादप्युभयत्रैवकारो द्रष्टव्य इत्याह। समा-

उ० समभ्याददानो हृदयमेवान्ववक्रामति स यत्रैष

भा० समानकर्तृकनिर्द्देशाच्च। अथास्मिन् काल एते प्राणा वागादय एनमात्मानमभिसमायन्ति तदास्य शारीरस्यात्मनो ऽङ्गेभ्यः सम्प्रमोक्षणं। कथं पुनः सम्प्रमोक्षणं केन वा प्रकारेणात्मानमभिसमायन्तीत्युच्यते। स आत्मा एतास्तेजोमात्रास्तेजसो मात्रास्तेजोमात्रास्तेजो ऽवयवा रूपादिप्रकाशकत्वाच्चक्षुरादीनि करणानीत्यर्थः। ता एताः समभ्याददानः सम्यङ्निर्लेपेनाभ्याददानः आभिमुख्येनाददानः संहरमाणस्तत्स्वप्नापेक्षया विशेषणं समिति। ननु स्वप्ने निर्लेपेन सम्यगादानमस्तित्वादानमात्रं। गृहीता वाक् गृहीतञ्चक्षुरस्य लोकस्य सर्व्वावतो मात्रामुपादाय अक्रमादायेत्यादिवाक्येभ्यो हृदयमेव पुण्डरीकाकाशमन्ववक्रामत्यन्वव-

व्या० नेति॥ अथेत्यादि वाक्यमवतार्य्य व्याकुर्व्वन्कस्मिन्काले तत्सम्प्रमोक्षणमित्यस्योत्तरमाह। अथेत्यादिना॥ कथं वेत्युक्तं प्रश्नमनूद्य प्रश्नान्तरं प्रस्तौति। कथमिति॥ अत्रोत्तरत्वेनोत्तरं वाक्यमादाय व्याकरोति। उच्यत इत्यादिना॥ रूपादिप्रकाशनशक्तिमत्सत्त्वप्रधानभूतकार्य्यत्वात्तेजोमात्राश्चक्षुरादीनीत्युक्तं॥ सम्प्रति समभ्याददान इत्यस्यार्थमाह। ता एता इति॥ संहरमाणो हृदयमन्ववक्रामतीत्यन्वयः॥ तत्समिति विशेषणं स्वप्नापेक्षयेति सम्बन्धः॥ कथं स्वप्नापेक्षया विशेषणं तदाह। न त्विति॥ आदानमात्रमपि स्वप्ने नास्तीति कुतस्तद्व्यावृत्त्यर्थं विशेषणमित्याशङ्क्याह। अस्तीति॥ स एतास्तेजोमात्राः समभ्याददान इत्येतद्व्याख्याय हृदयमेवेत्यादि व्याचष्टे। हृदयमित्यादिना॥ सविज्ञानो भवतीति वाक्यशेषमाश्रित्य वाक्यार्थमाह। हृदय इति॥ कथमात्मनो निष्क्रियस्य

उ॰ चाक्षुषः पुरुषः पराङ्पर्य्यावर्त्तते तथा रूपज्ञो भवति ॥ १ ॥

भा॰ गच्छति हृदयेऽभिव्यक्तविज्ञानो भवतीत्यर्थो बुद्ध्यादिविक्षेपोपसंहारे सति। न हि तस्य स्वतश्चलनं विक्षेपोपसंहारादिविक्रिया वा। ध्यायतीव लेलायतीवेत्युक्तत्वात्। बुद्ध्याद्युपाधिद्वारैव हि सर्व्वविक्रियाध्यारोप्यते तस्मिन्। कदा पुनस्तस्य तेजोमात्राभ्यादानमित्युच्यते। स यत्रैष चक्षुषि भवश्चाक्षुषः आदित्यांशो भोक्तुः कर्मणा प्रयुक्तो यावद्देहधारणं तावच्चक्षुषोऽनुग्रहं कुर्वद्वर्त्तते। मरणकाले त्वस्य चक्षुषोऽनुग्रहं परित्यजति स्वमादित्यात्मानं प्रतिपद्यते। तदेतदुक्तं। यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यमित्यादि। पुनर्देहग्रहणकाले संश्रयिष्यन्तस्था

आ॰ तेजोमात्रादानकर्तृत्वमित्याशङ्क्याह। बुद्ध्यादीति॥ तेषां तद्विक्षेपस्य चोपसंहारे सत्यात्मनस्तदादानकर्तृत्वमौपचारिकमित्यर्थः। तर्हि तद्विक्षेपोपसंहर्तृत्ववत्तदादानकर्तृत्वमपि मुख्यमेव भविष्यतीत्याशङ्क्याह। न हीति॥ आदिशब्देन क्रियाविशेषः सर्व्वो गृह्यते। कथं तर्हि प्रतीचिकर्तृत्वादिप्रथेत्याशङ्क्याह। बुद्ध्यादीति॥ स यत्रेत्यादि वाक्यमाकाङ्क्षापूर्वकमवतार्य्य व्याकरोति। कदा पुनरित्यादिना॥ तस्य पुरुषशब्दार्थात्मत्वे प्राप्ते विशिनष्टि। आदित्यांश इति॥ तस्य चाक्षुषत्वं साधयति। भोक्तुरित्यादिना॥ यावद्देहधारणमिति कुतो विशेषणं तत्राह। मरणकाले त्विति॥ आदित्यांशस्य चक्षुरनुग्रहमकुर्वतः स्वातन्त्र्यं वारयति। स्वमिति॥ मरणावस्थायां चक्षुराद्यनुग्राहकदेवतांशानामधिदेवतात्मनोपसंहारे श्रुत्यन्तरं संवादयति। तदेतदिति॥ तर्हि देशान्तरे वागादिराहित्यं स्यादित्याशङ्क्याह। पुनरिति॥ संश्रयि-

उ० एकीभवति न पश्यतीत्याहुरेकीभवति न जिघ्रतीत्याहुरेकीभवति न रसयत इत्याहुरेकी-

---

भा० स्वप्स्यतः प्रबुध्यतश्च। तदेतदाह। चाक्षुषः पुरुषो यत्र यस्मिन् काले पराक् पर्य्यावर्त्तते परि समन्तात् पराङ् व्यावर्त्तत इति यथाऽत्रास्मिन् कालेऽरूपज्ञो भवति मुमूर्षुरूपं न जानाति तदायमात्मा चक्षुरादितेजोमात्राः समभ्याददानो भवति स्वप्नकाल इव॥ १॥

एकीभवति करणजातं स्वेन लिङ्गात्मना। तदैनं पार्श्वस्था आहुर्न पश्यतीति। तथा घ्राणदेवतानिवृत्तौ घ्राणमेकीभवति लिङ्गात्मना। तदा न जिघ्रतीत्याहुः। समानमन्यत्। जिह्वायां सोमो वरुणो वा देवता तन्निवृत्त्यपेक्षया न रसयत इत्याहुः। तथा न वदति न शृणोति न मनुते

व्या० यन्ति वागादयस्तत्तद्देवताधिष्ठिता यथास्थानमिति शेषः। मुमूर्षोरिव स्वप्स्यतः सर्वाणि करणानि लिङ्गात्मनोपक्रियन्ते प्रबुध्यमानस्य चोत्पित्सोरिव तानि यथास्थानं प्रादुर्भवन्तीत्याह। तथेति॥ उक्तेऽर्थे वाक्यं पातयति। तदेतदाहेति॥ पराङ्पर्य्यावर्त्तत इति रूपवैमुख्यं चाक्षुषस्य विवक्षितमिति शेषः॥ १॥

तर्हि भोक्त्रोपसंहृतं चक्षुरत्यन्ताभावीभूतमित्याशङ्क्याह। एकीति॥ उक्तेऽर्थ लोकप्रसिद्धिं दर्शयति। तदेति॥ चक्षुषि दर्शितन्यायं घ्राणेऽतिदिशति। तथेति॥ यथा चक्षुर्देवताया निवृत्तौ लिङ्गात्मना चक्षुरेकीभवति तथा घ्राणदेवतांशस्य घ्राणानुग्रहनिवृत्तिद्वारेणांशिदेवतयैक्ये लिङ्गात्मना घ्राणमेकीभवतीत्यर्थः। तन्निवृत्त्यपेक्षया वरुणादिदेवताया जिह्वायामनुग्रहनिवृत्तौ जिह्वाया लिङ्गात्मनैक्यव्यपदेशेत्यर्थः। तदनुग्राहकदेवतांशस्य

उ० भवति न वदतीत्याहुरेकीभवति न शृणोतीत्याहुरेकीभवति न मनुत इत्याहुरेकीभवति न स्पृशतीत्याहुरेकीभवति न विजानातीत्याहुस्तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति ॥

भा० न स्पृशति न विजानातीत्याहुस्तदोपलक्ष्यते देवतानिवृत्तिः करणानाञ्च हृदय एकीभावः। तत्र हृदय उपसंहृत्य तेषु करणेषु योऽन्तर्व्यापारः स कथ्यते। तस्य ह एतस्य प्रकृतस्य हृदयस्य हृदयच्छिद्रस्येत्येतत्। अग्रं नाडीमुखं निर्गमनद्वारं प्रद्योतते स्वप्नकाल इव स्वेन भासा तेजोमात्रादानकृतेन स्वेनैव ज्योतिषाऽऽत्मनैव च तेनात्मज्योतिःप्रद्योतेन हृदयाग्रेण एष आत्मा विज्ञानमयो लिङ्गोपाधिर्निर्गच्छति निष्क्रामति। तथाऽऽथर्वणे कस्मिन् न्वहमुत्क्रान्त उत्क्रान्तो भविष्यामि। कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति

व्या० तत्र तत्रानुग्रहनिवृत्त्या तत्तदंशिदेवताप्राप्तौ तत्तत्करणस्य लिङ्गात्मनैक्यं भवतीत्यभिप्रेत्याह। तथेति॥ मरणदशायां रूपादिदर्शनराहित्यमर्थद्वयसाधकमित्याह। तदेति॥ तस्य हैतस्येत्यादि वाक्यमुपादत्ते। तत्रेति॥ मुमूर्षावस्था सप्तम्यर्थः॥ केनायं प्रद्योतो भवतीत्यपेक्षायामाह। स्वप्नेति॥ यथा स्वप्नकाले स्वेन भासा स्वेन ज्योतिषा प्रस्वपितीति व्याख्यातं तथात्रापि तेजोमात्राणां यदादानं तत्कृतेन वासनारूपेण प्राप्यफलविषयबुद्धिवृत्तिरूपेण स्वेन भासा स्वेन चात्मचैतन्यज्योतिषा हृदयाग्रप्रद्योतनमित्यर्थः॥ तस्यार्थक्रियां दर्शयति। तेनेति॥ किमिति लिङ्गद्वाराऽऽत्मनो निर्गमनं प्रतिज्ञायते तत्राह। तथेति॥ यदि मरणकाले तेजोमात्रा-

उ० चक्षुषो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्य-

भा० स प्राणमसृजतेति तत्र चात्मचैतन्यज्योतिः सर्व्वदाभिव्य-
क्ततरं तदुपाधिद्वारा ह्यात्मनि जन्ममरणगमनागमनादि
सर्व्वविक्रियालक्षणः संव्यवहारस्तदात्मकं हि द्वादशविधं
करणं ॥

बुद्ध्यादि तत्सूत्रं तज्जीवनं सोऽन्तरात्मा जगतस्तस्थुषश्च
तेन प्रद्योतेन हृदयाग्रप्रकाशेन निःक्रममाणः । केन मार्गेण
निष्क्रामतीत्युच्यते । चक्षुषो वाऽऽदित्यलोकप्राप्तिनिमित्तं
ज्ञानं कर्म्म वा यदि स्यात् । मूर्ध्नो वा ब्रह्मलोकप्राप्तिनिमित्तं
चेत् । अन्येभ्यो वा शरीरदेशेभ्यः शरीरावयवेभ्यो यथा कर्म्म
यथा श्रुतमिति तं विज्ञानात्मानमुत्क्रामन्तं परलोकाय
प्रस्थितं परलोकायोद्भूताद्भूतमित्यर्थः । प्राणः सर्व्वाधिका-

आ० दानं न तर्हि सदा लिङ्गोपाधिरात्मेत्याशङ्क्याह । तत्रेति ॥ सप्तम्या-
लिङ्गमुच्यते । सर्व्वदेति । लिङ्गसत्तादशोक्तिः ॥ आत्मोपाधिभूते लिङ्गे
किं प्रमाणमित्याशङ्क्यात्मनि कूटस्थे संव्यवहारदर्शनमित्याह । तदु-
पाधीति ॥ चक्षुरादिप्रसिद्धिरपि प्रमाणमित्याह । तदात्मकं हीति ॥
एकादशविधं करणमित्यभ्युपगमात्कुतो द्वादशविधत्वमित्या-
शङ्क्य विशिनष्टि । बुद्ध्यादीति ॥ वायुर्वै गौतम तत्सूत्रमित्यादि-
श्रुतिरपि यथोक्ते लिङ्गे प्रमाणमित्याह । तत्सूत्रमिति ॥ जगतो
जीवनमपि तत्र मानमित्याह । तज्जीवनमिति ॥ एष सर्व्वभू-
तान्तरात्मेति श्रुतिरपि यथोक्तं लिङ्गं साधयतीत्याह । सोऽन्त-
रात्मेति ॥ लिङ्गोपाधेरात्मनो यथोक्तप्रकाशेन मरणकाले हृद-
याग्निष्क्रमणे मार्गं प्रश्नपूर्व्वकमुत्तरवाक्येनोपदिशति । तेनेत्या-
दिना ॥ चक्षुषो वेति विकल्पे निमित्तं सूचयति । आदित्येति ॥

उ॰ स्तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं

भा॰ रस्थानीयो राज्ञ इवानूत्क्रामति। तञ्च प्राणमनूत्क्रामन्तं वागादयः सर्व्वे प्राणा अनुक्रामन्ति। यथा प्रधानान्वाचिख्यासेयं न तु क्रमेण सार्थवद्गमनमिह विवक्षितं। एष आत्मा सविज्ञानो भवति स्वप्न इव विशेषविज्ञानवान् भवति कर्मवशान्न स्वतन्त्रः। स्वातन्त्र्येण हि सविज्ञानत्वे सर्व्वः कृतकृत्यः स्यात्। नैव तु तल्लभ्यते। अत एवाह व्यासः। सदा तद्भावभावित इति। कर्म्मणाऽनूद्भाव्यमानेनान्तःकरणवृत्तिविशेषाश्रितवासनात्मकविशेषविज्ञानेन सर्व्वो लोक एतस्मिन् काले सविज्ञानो भवति। सविज्ञानमेव च गन्तव्यमन्ववक्रामत्यनुगच्छति विशेषविज्ञानोद्भासितमेवे-

आ॰ मूर्द्धो वेति विकल्पे हेतुमाह। ब्रह्मलोकेति॥ तत्प्राप्तिनिमित्तं चेज्ज्ञानं कर्म्म वा स्यादिति पूर्व्वेण सम्बन्धः॥ देहावयवान्तरेभ्यो निष्क्रमणे नियामकमाह। यथेति॥ कथं परलोकाय प्रस्थितमित्युच्यते प्राणगमनाधीनत्वादिज्ञानात्मगमनस्येत्याशङ्क्याह। परलोकायेति॥ ननु जीवस्य प्राणादितादात्म्ये सति कथमनुशब्देन क्रमो विवक्ष्यते तत्राह। यथा प्रधानेति॥ प्रधानमनतिक्रम्य हीयमन्वाख्यानेच्छा। तथा च जीवादेः प्राधान्याभिप्राये णानुशब्दप्रयोगो न क्रमाभिप्रायेण देशकालभेदाभावादित्यर्थः। सार्थे समूहे व्यक्तिषु क्रमेण गमनं दृश्यते न तथा प्राणादिष्विति व्यतिरेकः॥ यदुक्तं हृदयाग्रप्रद्योतनं तत्सविज्ञानश्रुत्या प्रकटयति। तदेति॥ कर्म्मवशादिति विशेषणं साधयति। नेति॥ विपक्षे दोषमाह। स्वातन्त्र्येणेति॥ इष्टापत्तिमाशङ्क्याह। नैवेति॥ मुमूर्षोरस्वातन्त्र्ये मानमाह। अत एवेति॥ कर्म्मवशादुक्तं सविज्ञानत्वमुपसंहरति। कर्म्मणेति॥ अन्तःकरणस्य वृत्तिवि-

उ॰ सर्वे प्राणा अनुत्क्रामन्ति सविज्ञानो भवति सविज्ञानमेवान्ववक्रामति ।

भा॰ त्यर्थः । तस्मात्तत्काले स्वातन्त्र्यार्थं योगधर्म्मानुसेवनं परिसङ्ख्यानाभ्यासश्च विशिष्टपुण्योपचयश्च श्रद्दधानैः परलोकार्थिभिरप्रमत्तैः कर्त्तव्य इति सर्व्वशास्त्राणां यत्नतो विधेयोऽर्थो दुश्चरिताच्चोपरमणं । न हि तत्काले शक्यते किञ्चित् सम्पादयितुं । कर्म्मणा नीयमानस्य स्वातन्त्र्याभावात् । पुण्यो वै पुण्येन कर्म्मणा भवति पापः पापेनेत्युक्तः । एतस्य ह्यनर्थस्योपशमोपायविधानाय सर्व्वशाखोपनिषदः प्रवृत्ता न तद्विहितोपायानुसेवनमुक्त्वाऽऽत्यन्तिकस्यानर्थस्योपशमोपायोऽस्ति । तस्मादत्रैवोपनिषद्विहितोपाये यत्नः परैर्भवितव्यमित्येष प्रकरणार्थः ॥

आ॰ शेषो भाविदेहविषयस्तदाश्रितं तद्रूपं यद्वासनात्मकं विशेषविज्ञानं तेनेति यावत् । म्रियमाणस्य सविज्ञानत्वे सत्यर्थसिद्धमर्थमाह । सविज्ञानमेवेति ॥ गन्तव्यस्य विज्ञानत्वं विज्ञानाश्रयत्वमित्याशङ्क्य विशिनष्टि । विशेषेति ॥ प्रागेवोत्क्रान्तेः सविज्ञानत्ववादिश्रुतेस्तात्पर्य्यमाह । तस्मादिति ॥ पुरुषस्य कर्म्मानुसारित्वं तच्छब्दार्थः । योगश्चित्तवृत्तिनिरोधः । तस्य धर्म्मा यमनियमप्रभृतयः । तेषामनुसेवनं पुनः पुनरावर्त्तनं परिसङ्ख्यानाभ्यासो योगानुष्ठानं । कर्त्तव्य इति प्रकृतश्रुतेर्विधेयोऽर्थ इति शेषः ॥ किञ्च पुण्योपचयकर्त्तव्यतारूपेऽर्थे सर्व्वमेव विधिकाण्डं पर्य्यवसितमित्याह । सर्व्वशास्त्राणामिति ॥ सर्व्वस्मादागामिदुश्चरितादुपरमणं कर्त्तव्यमित्यस्मिन्नर्थे निषेधशास्त्रमपि पर्य्यवसितमित्याह । दुश्चरिताच्चेति ॥ ननु पूर्व्वं यथेष्टचेष्टां कृत्वा मरणकाले सर्व्वमेतत्सम्पादयिष्यते नेत्याह । न हीति ॥

उ॰ तं विद्याकर्म्मणी समन्वारभेते पूर्व्वप्रज्ञा च ॥ ३ ॥

भा॰ शकटवत्सम्भृतसंभार उत्सर्जद्यातीत्युक्तं किं पुनस्तस्य परलोकाय प्रवृत्तस्य पथ्यदनं शाकटिकसम्भारस्थानीयं गत्वा वा परलोकं यद्भुङ्क्ते शरीराद्यारम्भकं च यत्तत्किमित्युच्यते। तं परलोकाय गच्छन्तमात्मानं विद्याकर्म्मणी विद्या च कर्म्म च विद्याकर्म्मणी विद्या सर्व्वप्रकारविहिता प्रतिषिद्धा अविहिताऽप्रतिषिद्धा च। तथा कर्म्म विहितं प्रतिषिद्धञ्चाविहितमप्रतिषिद्धञ्च समन्वारभेते सम्यगन्वारभेते अन्वालभेतेऽनुगच्छतः। पूर्व्वप्रज्ञा च। पूर्व्वानुभूतविषया प्रज्ञा पूर्व्वप्रज्ञाऽतीतकर्म्मफलानुभववासनेत्यर्थः। सा च वासनाऽपूर्व्वकर्म्मारम्भे कर्म्मविपाके चाङ्गं भवति। तेन ता अप्यन्वारभते। न हि तया वासनया विना केन केषाञ्चित् कर्म्म कर्त्तुं फलञ्चोपभोक्तुं शक्यते। न ह्यनभ्यस्ते विषये

व्या॰ कर्म्मणा नीयमानत्वे मानमाह। पुण्य इति॥ तर्हि पुण्योपचयादेव यथोक्तानर्थनिवृत्तेर्व्यर्थं तत्त्वज्ञानमित्याशङ्क्याह। एतस्येति॥ उपक्रमोपायस्तत्त्वज्ञानं तस्य विधानं प्रकाशनं तदर्थमिति यावत्॥ देवताध्यानादनर्थो निवर्त्तिष्यते किं तत्त्वज्ञानेनेत्याशङ्क्याह। न हीति॥ तद्विहितेति तच्छब्देन प्रकृताः सर्व्वशाखोपनिषदो गृह्यन्ते। विधानान्तरेणानर्थध्वंसासिद्धौ फलितमाह। तस्मादिति॥ ज्ञापितं सविज्ञानवाक्येनेति शेषः॥ वृत्तमनूद्य प्रश्नपूर्व्वकमुत्तरवाक्यमवतार्य्य व्याचष्टे। शकटवदित्यादिना॥ विहिता विद्याऽऽध्यात्मिका। प्रतिषिद्धा नग्नस्त्रीदर्शनादिरूपा। अविहिता घटादिविषया। अप्रतिषिद्धा पथि पतितटृणादिविषया। विहितं कर्म्म यागादि। प्रतिषिद्धं ब्रह्महननादि। अविहितं गमनादि। अप्रतिषिद्धं नेत्रपक्ष्मविक्षेपादि।

भा० कौशलमिन्द्रियाणां भवति । पूर्व्वानुभववासनाप्रवृत्ताना-न्त्विन्द्रियाणामिहाभ्यासमन्तरेण कौशलमुपपद्यते। दृश्यते च केषाञ्चित्कासुचित्क्रियासु चित्रकर्म्मादिलक्षणासु विने-वेहाभ्यासेन जन्मत एव कौशलं । कासुचिदत्यन्तसौकर्य्य-युक्तास्वप्यकौशलं केषाञ्चित्। तथा विषयोपभोगेषु स्वभावत एव केषाञ्चित् कौशलाकौशले दृश्येते। तच्चैतत्सर्व्वं पूर्व्व-प्रज्ञोद्भवानुद्भवनिमित्तं। तेन पूर्व्वप्रज्ञया विना कर्म्मणि वा फलोपभोगे वा न कस्यचित् प्रवृत्तिरुपपद्यते। तस्मादेतत्त्रयं शाकटिकसम्भारस्थानीयं परलोकपथ्यदनं विद्याकर्म्मपूर्व्वप्र-ज्ञाख्यं। यस्माद्विद्याकर्म्मणी पूर्व्वप्रज्ञा च देहान्तरप्रतिपत्त्यु-पभोगसाधनं तस्माद्विद्याकर्म्मादि शुभमेव समाचरेत्। यथे-ष्टदेहसंयोगभोगोपभोगौ स्यातामिति प्रकरणार्थः ॥ २ ॥

आ० विद्याकर्म्मणोरुपभोगसाधनत्वप्रसिद्धेरन्वारम्भोऽपि किमित्यन्वा-रभ्यते वासनेत्याशङ्क्याह । सा चेति ॥ अपूर्व्वकर्म्मारम्भादावङ्गं पूर्व्ववासनेत्यत्र हेतुमाह । न हीति ॥ उक्तमेव हेतुमुपपाद-यति । न हीत्यादिना ॥ इन्द्रियाणां विषयेषु कौशलमनुष्ठाने प्रयोजकं तच्च फलभोगे हेतुः । न चान्तरेणाभ्यासमिन्द्रियाणां विषयेषु कौशलं सम्भवति। तस्मादनुष्ठानाद्यभ्यासाधीनमित्यर्थः । तथापि कथं पूर्व्ववासनादावङ्गमित्याशङ्क्याह । पूर्व्वानुभवेति ॥ तत्र लोकानुभवं प्रमाणयति । दृश्यते चेति ॥ चित्रकर्म्मादी-त्यादिशब्देन प्रासादनिर्म्माणादि गृह्यते । पूर्व्ववासनोद्भवकृतं कार्य्यमुक्त्वा तदभावकृतं कार्य्यमाह । कासुचिदिति ॥ रज्जुनि-र्म्माणादिष्विति यावत् ॥ तत्रैवोदाहरणसौलभ्यमाह । तथेति॥ तत्र हेत्वन्तरमाशङ्क्य परिहरति । तच्चेति ॥ कर्म्मानुष्ठानादौ पूर्व्वप्रज्ञाया हेतुत्वमुपसंहरति । तेनेति ॥ समन्वारम्भवचनार्थं निगमयति। तस्मादिति॥ तस्यैव तात्पर्य्यार्थमाह। यस्मादिति ॥ २॥

उ॰ तद्यथा तृणजलायुका तृणस्यान्तं गत्वाऽन्यमा-

भा॰ एवं विद्यादिसम्भारसम्भृतो देहान्तरं प्रतिपद्यमानो मुक्त्वा पूर्व्वं देहं पक्षीव वृक्षान्तरं देहान्तरं प्रतिपद्यते। अथ चाऽऽतिवाहिकेन शरीरान्तरेण कर्म्मफलजन्मदेशं नीयते। किं वात्रस्यैव सर्व्वगतानां करणानां वृत्तिलाभो भवत्याहोस्विच्छरीरस्थस्य सङ्कुचितानि करणानि मृतस्य भिन्नघटप्रदीपप्रकाशवत्सर्व्वतो व्याप्य पुनर्देहान्तरारम्भे सङ्कोचमुपगच्छन्ति किं वा मनोमात्रं वैशेषिकसमय इव देहान्तरारम्भदेशं प्रति गच्छति किं वा कल्पनान्तरमेव वेदान्तसमय इत्युच्यते। त एते सर्व्व एव समाः सर्व्वेऽनन्ता इति श्रुतेः। सर्व्वात्मकानि तावत् करणानि सर्व्वात्मकप्राणसंश्रयाच्च तेषामाध्यात्मिकाधिभौतिकपरिच्छेदः प्राणिकर्म्मज्ञानभावनानिमित्तः। अतस्तद्वशात् स्वभावतः सर्व्वगता-

---

आ॰ तृणजलायुकावाक्यमवतारयितुं वृत्तमनूद्य वादिविवादान्दर्शयन्नादौ दिगम्बरमतमाह । एवमित्यादिना ॥ देवतावादिमतमाह। अथ वेति ॥ देवता येन शरीरेण विशिष्टं जीवं परलोकं नयति तदातिवाहिकं शरीरान्तरं तेनेति यावत् ॥ साङ्ख्यादिमतमाह । किं वेति ॥ सिद्धान्तं सूचयति। अहोस्विदिति ॥ वैशेषिकादिपक्षमाह। किं वेति ॥ न्यूनत्वनिवृत्त्यर्थमाह। किंवा कल्पनान्तरमिति ॥ तत्र सिद्धान्तस्य प्रामाणिकत्वेनोपादेयत्वं वदन्कल्पनान्तराणामप्रामाणिकत्वेन त्याज्यत्वमभिप्रेत्याह । उच्यत इति ॥ तेषां सर्व्वात्मकत्वे हेत्वन्तरमाह। सर्व्वात्मकेति ॥ कथं तर्हि करणानां परिच्छिन्नत्वधीरित्याशङ्क्याह। तेषामिति ॥ आधिदैविकेन रूपेणापरिच्छिन्नानामपि करणानामाध्यात्मि-

उ० आममाक्रम्यात्मानमुपसꣳहरत्येवमेवायमात्मेदꣳ

भा० नासनन्तानामपि प्राणानां कर्म्मज्ञानवासनानुरूप्येणैव देहान्तरारम्भवशात् प्राणानां वृत्तिः सङ्कुचति विकसति च। तथाचोक्तं। समः प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्व्वेणेति। तथा चेदं वचनमनुकूलं। स यो हैतानन्तानुपास्त इत्यादि तं यथा यथोपासत इति च। तत्र वासनापूर्व्वप्रज्ञाख्या विद्या कर्म्म तन्त्रा जलूकावत्सन्ततैव स्वप्नकाल इव कर्म्मकृतं देहाद्देहान्तरमारभते हृदयस्थैव पुनर्देहान्तरं पूर्व्वाश्रयं विमुञ्चतीत्येतस्मिन्नर्थे दृष्टान्त उपादीयते तत्तत्र देहान्तरसञ्चार इदं निदर्शनं। यथा येन प्रकारेण तृणजलायुका तृणजलूका तृणस्यान्तमवसानं गत्वा प्राप्यान्यत्तृणं तृणान्तरमाक्रममाक्रम्यत इत्याक्रमस्तमाक्रममाक्रम्याश्रित्यात्मा-

आ० कादिरूपेण परिच्छिन्नतेति स्थिते फलितमाह। अत इति॥ तद्वशादुदाहृतश्रुतिवशादित्येतत्। स्वभावतो देवतास्वरूपानुसारेणेति यावत्। कर्म्मज्ञानवासनारूपेणेत्यत्र भोक्तुरिति शेषः॥ उभयत्र संवादार्थं प्राणानामिति द्विरुक्तं तेषां वृत्तिसङ्कोचादौ प्रमाणमाह। तथा चेति॥ परिच्छिन्नापरिच्छिन्नप्राणोपासने गुणदोषसङ्कीर्त्तनमपि प्राणसङ्कोचविकासयोः सूचकमित्याह। तथा चेदमिति॥ आधिदैविकेन रूपेण सर्व्वगतानामपि करणानामाध्यात्मिकाधिभौतिकरूपेण परिच्छिन्नत्वात्तत्परिवृतस्य गमनं सिध्यतीति सिद्धान्तो दर्शितः॥ इदानीं तृणजलायुकादृष्टान्ताद्देहान्तरं गृहीत्वा पूर्व्वदेहं मुञ्चत्यात्मेति स्थूलदेहविशिष्टस्यैव परलोकगमनमिति पौराणिकप्रक्रियां प्रत्याख्यातुं दृष्टान्तवा-

उ॰ शरीरं निहत्याऽविद्यां गमयित्वाऽन्यमाक्रममाक्र-
म्यात्मानमुपसꣳहरति ॥ ३ ॥

भा॰ तमात्मनः पूर्व्वावयवमुपसंहरत्यन्त्यावयवस्थाने। एवमेवा-
यमात्मा यः प्रकृतो यः संसारी इदं शरीरं पूर्व्वोपात्तं
निहत्य स्वप्नं प्रतिपित्सुरिव पातयित्वा विद्यां गमयित्वा
चेतनं कृत्वा स्वात्मोपसंहारेणान्यमाक्रमं तृणान्तरमिव तृ-
णजलूकामिव शरीरान्तरं गृहीत्वा प्रसारितया वासनया
ऽऽत्मानमुपसंहरति । तत्रात्मभावमारभते। यथा स्वप्ने
देहान्तरमारभते। स्वप्नदेहान्तरस्थ इव शरीरारब्धदेशे
आरभ्यमाणे देहे जङ्गमे स्थावरे वा। तत्र च कर्म्मवशात्का-
रणानि स्ववृत्तीनि संहन्यन्ते वाह्यानि च कुशमृत्तिकास्था-
नीयं शरीरमारभ्यते। तत्र च करणव्यूहमपेक्ष्य वागाद्यनु-

व्या॰ वाक्यस्य तात्पर्य्यमाह । तत्रेत्यादिना ॥ देहनिर्गमनात्प्रागवस्था सप्तम्यर्थः। तदैव यथोक्ता वासना हृदयस्था विद्याकर्म्मनिमित्तं भावि देहं स्पृशति जीवोऽपि तत्राभिमानं करोति पुनश्च पूर्व्वदेहं त्यजति यथा स्वप्ने देवोऽहमित्यभिमन्यमानो देहान्तरस्थ एव भवति तथोत्क्रान्तावपि। तस्मान्न पूर्व्वदेहविशिष्टस्यैव परलोकगमनमित्यर्थः। स्वात्मोपसंहारो देहे पूर्व्वस्मिन्नात्माभिमानत्यागः प्रसारितया वासनया शरीरान्तरं गृहीत्वेति सम्बन्धः॥ उपसंहारस्य स्वरूपमाह। तत्रेति॥ सप्तम्यर्थं विवृणोति। आरभ्यमाण इति॥ आरब्धे देहान्तरे सूक्ष्मदेहस्याभिव्यक्तिमाह। तत्र चेति॥ कर्म्मग्रहणं विद्यापूर्व्वप्रज्ञयोरुपलक्षणं। ननु लिङ्गदेहबलादेवार्थक्रियासिद्धौ कृतं स्थूलशरीरेणेत्याशङ्क्य तद्व्यतिरेकेणेतरस्यार्थक्रियाकारित्वं नास्तीति मत्वाह। वाह्यानि चेति॥

उ० तद्यथा पेशस्कारी पेशसो मात्रामुपादायान्यन्नवतरं कल्याणतरꣳ रूपं तनुत एवमेवायमात्मेदꣳ शरीरं निहत्याऽविद्यां गमयित्वाऽन्यन्नवतरं क-

---

भा० यह:। या अग्न्यादिदेवताः संश्रयन्ते एष देहान्तरारम्भविधिः ॥ ३ ॥

तत्र देहान्तरारम्भे नित्योपात्तमेवोपादानमुपमृद्योपमृद्य देहान्तरमारभते आहोस्विदपूर्व्वमेव पुनः पुनरादत्त इत्यत्रोच्यते। दृष्टान्तस्तत्रैतस्मिन्नर्थे। यथा पेशस्कारी। पेशः सुवर्णं तत् करोतीति पेशस्कारी सुवर्णकारः पेशसः सुवर्णस्य मात्रामपादायापच्छिद्य गृहीत्वाऽन्यत् पूर्व्वस्माद्रचनाविशेषादन्यन्नवतरमभिनवतरं कल्याणात् कल्याणतरं रूपं तनुते निर्म्मिनोति एवमेवायमात्मेत्यादि पूर्व्ववत्।

आ० आरब्धे देहद्वये करणेषु देवतानामनुग्राहकत्वेनावस्थानं दर्शयति। तत्रेति ॥ स्थूलो देहः सप्तम्यर्थः। करणव्यूहस्तेषामभिव्यक्तिः ॥ ३ ॥

पेशस्कारिवाक्यव्यावर्त्त्यामाशङ्कामाह। तत्रेति ॥ संसारिणो हि प्रकृते देहान्तरारम्भे किमुपादानं नास्ति किं वाऽस्ति नास्ति चेन्न भावरूपं कार्य्यं सिद्ध्येत्। अस्ति चेत्तत्किम्भूतपञ्चकमुतान्यत्। आद्येऽपि तन्नित्योपात्तमेव पूर्व्वपूर्व्वदेहोपमर्द्देनान्यमन्यं देहमारभते किंवान्यदन्यद्भूतपञ्चकमन्यं अन्यदेहं जनयति। नाद्यः। भूतपञ्चकस्य तत्तद्देहोपादानत्वे मायायाः सर्व्वकारणत्वस्वीकारविरोधात्। न द्वितीयो भूतपञ्चकोत्पत्तावपि कारणान्तरस्य मृग्यत्वात्तस्यैव देहान्तरकारणत्वसम्भवान्नेतरो देहस्य पाञ्चभौतिकत्वप्रसिद्धिविरोधादिति भावः। उत्तरं वाक्यमुत्तरत्वेनादत्ते। अत्रेति ॥ तच्छब्दार्थमपेक्षितं पूरयन्नाह। दृष्टान्त इति ॥ अवशिष्टं भागमादाय व्याचष्टे। यथेत्यादिना ॥ किं

उ॰ ल्याणतरꣳ रूपं कुरुते पित्र्यं वा गान्धर्व्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वाऽन्येषां वा भूतानां॥ ४॥ स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः

भा॰ नित्योपात्तान्येव पृथिव्यादीन्याकाशान्तानि पञ्च भूतानि यानि द्वे वाव ब्रह्मणो रूपे इति चतुर्थे व्याख्यातानि पेशःस्थानीयानि तान्येवोपमृद्योपमृद्यान्यदन्यच्च देहान्तरं नवतरं कल्याणतरं रूपं संस्थानविशेषं देहान्तरमित्यर्थः। कुरुते पित्र्यं वा। पितृभ्यो हितं पितृलोकोपभोगयोग्यमित्यर्थः। गान्धर्व्वं गन्धर्व्वाणामुपभोगयोग्यं। तथा देवानां दैवं। प्रजापतेः प्राजापत्यं। ब्रह्मण इदं ब्राह्मं वा। यथा कर्म्म यथा श्रुतमन्येषां वा भूतानां सम्बन्धि शरीरान्तरं कुरुत इत्यभिसम्बध्यते॥ ४॥

यस्य बन्धनसञ्ज्ञका उपाधिभूता यैः संयुक्तस्तन्मयोऽयमिति विभाव्यते ते पदार्थाः पुञ्जीकृत्येहैकत्र प्रतिनिर्द्दिश्यन्ते। स वा अयं य एवं संसरत्यात्मा ब्रह्मैव पर एव

व्या॰ पुनरुपादानमेतावता देहान्तरारम्भेऽभ्युपगतं भवति तत्राह। नित्योपात्तानीति॥ शरीरद्वयारम्भकाणीति शेषः॥ तेषामुभयारम्भकत्वेन मूर्त्तामूर्त्तब्राह्मणे प्रस्तुतत्वं दर्शयति। यानीति॥ देहविकल्पे नियामकमाह। यथा कर्म्मेति॥ शरीरारम्भे मायात्मकभूतपञ्चकमुपादानमिति वदता भूतावयवानामपि सहैव गमनमित्युक्तः॥ ४॥

इदानीं स वा अयमात्मेत्यादेस्तात्पर्य्यमाह। येऽस्येति॥ तानेवोपाधिभूतान्पदार्थान्विशिनष्टि। यैरिति॥ ननु पूर्व्वमप्येते-

उ॰ प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमयो

भा॰ योऽशनायाद्यतीतो विज्ञानमयो विज्ञानं बुद्धिस्तेनोपलक्ष्यमाणस्तन्मयः। कतम आत्मेति। योऽयं विज्ञानमयः। प्राणेष्विति ह्युक्तं विज्ञानमयो विज्ञानप्रायो यस्मात्तद्धर्मत्वमस्य विभाव्यते ध्यायतीव लेलायतीवेति। तथा मनोमयो मनःसन्निकर्षान्मनोमयः। तथा प्राणमयः प्राणः पञ्चवृत्तिस्तन्मयो येन चेतनश्चलतीव लक्ष्यते। तथा चक्षुर्मयो रूपदर्शनकाले। एवं श्रोत्रमयः शब्दश्रवणकाले। एवं तस्य तस्येन्द्रियस्य व्यापारोद्भवे तत्तन्मयो भवति। एवं बुद्धिप्राणद्वारेण चक्षुरादिकरणमयः सन् शरीरारम्भकपृथिव्यादिभूतमयो भवति। तत्र पार्थिवादिशरीरारम्भे पृथिवीमयो भवति। तथा वरुणादिलोकेष्वाप्यशरीरारम्भ आपोमयो भवति। तथा वायव्यशरीरारम्भे वायुमयो भवति। तथाकाशशरीरारम्भे आकाशमयो भवति। एवमेतानि तैजसानि देवशरीराणि। तेष्वारभ्यमाणेषु तत्तन्मयस्तेजोमयो भवति। अतो व्यतिरिक्तानि पश्वादिशरीराणि

व्या॰ पदार्था दर्शिताः किं पुनस्तत्प्रदर्शनेनेत्याशङ्क्याह। पुञ्जीकृत्येति॥ स वा अयमात्मा ब्रह्मेति भागं व्याकुर्वन्नात्मनो ब्रह्मैक्यं वास्तवं वृत्तं दर्शयति। स वा इति॥ तस्यैवावास्तवं रूपमुपन्यस्यति। विज्ञानमय इत्यादिना॥ ज्योतिर्ब्राह्मणेऽपि व्याख्यातं विज्ञानमयत्वमित्याह। कतम इति॥ कस्मिन्नर्थे मयट् प्रयुज्यते तत्राह। विज्ञानेति॥ उक्ते मयडर्थे हेतुमाह। यस्मादिति॥ बुद्ध्यैक्याध्यासात्तद्धर्मस्य कर्तृत्वादेरात्मनि प्रतीतिरित्यत्र मानमाह।

उ० वायुमय आकाशमयस्तेजोमयोऽतेजोमयः काममयोऽकाममयः क्रोधमयोऽक्रोधमयो धर्म्ममयो

भा० नरकप्रेतादिशरीराणि चातेजोमयानि। तान्यपेक्ष्याहाऽतेजोमय इति। एवं कार्य्यकरणसङ्घातमयः सन्नात्मा प्राप्तं वस्त्वन्तरं पश्यन्निदम्मयोऽदोमय इत्यप्राप्तव्यमिति। एवं विपरीतप्रत्ययस्तदभिलाषः काममयो भवति। तस्मिन्कामे दोषं पश्यतस्तद्विषयाभिलाषप्रशमे चित्तं प्रसन्नमकलुषं शान्तं भवति तन्मयोऽकाममयः। एवं तस्मिन्विहते कामे केनचित्स कामः क्रोधत्वेन परिणमते तेन तन्मयो भवन्क्रोधमयः। स क्रोधः केनचिदुपायेन निवर्त्तितो यदा भवति तदा प्रसन्नमनाकुलं चित्तं सदक्रोध उच्यते। एवं तेन तन्मयः। एवं कामक्रोधाभ्यामकामक्रोधाभ्याञ्च तन्मयो भूत्वा धर्म्ममयोऽधर्म्ममयश्च भवति। न हि कामक्रोधादिभिर्विना धर्म्मादिप्रवृत्तिरुपपद्यते। यद्यद्धि कुरुते कर्म्म तत्तत्कामस्य चेष्टितमिति स्मरणात्। धर्म्ममयोऽधर्म्ममयश्च भूत्वा सर्व्वमयो भवति। समस्तं धर्म्माधर्म्मयोश्च कार्य्यं यावत्किञ्चिद्व्याकृतं तत्सर्व्वं

व्या० ध्यायतीवेति॥ मनःसन्निकर्षात्तेन स्पष्टतया सम्बन्धादिति यावत्॥ चक्षुर्मयत्वादेरुपलक्षणत्वमङ्गीकृत्याह। एवमिति॥ उक्तमनूद्य सामान्येन भूतमयत्वमाह। एवं बुद्धीति॥ भूतमयत्व सत्यवान्तरविशेषमाह। तत्रेत्यादिना॥ न चाकाशपरमाणु-

उ० ऽधर्म्ममयः सर्व्वमयस्तद्यदेतदिदम्मयोऽदोमय इति यथाकारी यथाचारी तथा भवति साधु-

भा० धर्म्माधर्म्मयोः फलं। तत्प्रतिपद्यमानस्तन्मयो भवति। किं बहुना॥

तदेतत् सिद्धमस्य यद्यमिदम्मयो गृह्यमाणविषयादिमयस्तस्माद्यमदोमयः अद इति परोक्षं कार्य्येण गृह्यमाणेन निर्दिश्यते। अनन्ता ह्यन्तःकरणे भावना विशेषाः। नैव ते विशेषतो निर्द्देष्टुं शक्यन्ते। तस्मिंस्तस्मिन्क्षणे कार्य्यतोऽवगम्यन्ते। इदमस्य हृदि वर्त्ततेऽदोऽस्येति। तेन गृह्यमाणकार्य्येणेदम्मयतया निर्दिश्येते। परोक्षोऽन्तःस्थो व्यवहारोऽयमिदानीमदोमय इति। सङ्क्षेपतस्तु यथा कर्त्तुं यथा वाचरितुं शीलमस्य सोऽयं यथाकारी यथाचारी स तथा भवति। करणं नाम नियताक्रियाविधिप्रतिषेधादिग-

आ० भावादाकाशस्य शरीरानारम्भकत्वं श्रुतिविरुद्धारम्भप्रक्रियानभ्युपगमादित्यभिप्रेत्याह। तथाकाशेति॥

कथं पुनर्धर्म्मादिमयत्वे कामादिमयत्वमुपयुज्यते तत्राह। न हीति॥ कथं धर्म्मादिमयत्वं सर्व्वमयत्वे कारणमित्याशङ्क्याह। समस्तमिति॥ तद्यदेतदित्यादेरर्थमाह। किं बहुनेति॥ विषयः शब्दादिस्ततोऽन्यदपि प्रत्यक्षतो गृह्यमाणमादिशब्दार्थः। इदंमयत्वमदोमयत्वगमकमित्याह। तस्मादिति॥ विशेषतस्तन्मयत्वोक्तिं विना किमिति सामान्योक्तिरित्याशङ्क्याह। अनन्ता हीति॥ तदस्तित्वे मानमाह। तस्मिन्निति॥ अवगतिप्रकारमभिनयति इदमस्येति॥ इदंमयत्वमदोमयत्वञ्चोपसंहरति। तेनेत्यादिना॥ परोक्षत्वं व्याकरोति। अन्तःस्थ इति॥ व्यवहितविषयव्यवहार-

उ० कारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्म्मणा भवति पापः पापेन ॥

भा० म्याचरणं नाम । अनियतमिति विशेषः । साधुकारी साधुर्भवति । यथाकारीत्यस्य विशेषणं । पापकारी पापो भवति च । यथाचारीत्यस्य ताच्छील्यप्रत्ययोपादानात् । अत्यन्ततात्पर्य्यतैव तन्मयत्वं न तु तत्कर्म्ममात्रेणेत्याशङ्क्याह । पुण्यः पुण्येन कर्म्मणा भवति पापः पापेनेति । पुण्यपापकर्म्ममात्रेणैव तन्मयता स्यान्न तु ताच्छील्यमपेक्षते । ताच्छील्ये तु तन्मयत्वातिशय इत्ययं विशेषः । तत्र कामक्रोधादिपूर्व्वकपुण्यापुण्यकारिता सर्व्वमयत्वे हेतुः संसारस्य कारणं देहाद्देहान्तरसञ्चारस्य च । एतत्प्रयुक्तो ह्यन्यदन्यद्देहान्तरमुपादत्ते । तस्मात्पुण्यापुण्ये संसारस्य कारणमेतत् । विषयौ हि विधिप्रतिषेधावत्र शास्त्रस्य साफल्यमिति । अथोऽप्यन्ये बन्धनमोचकुशलाः खल्वाहुः ।

व्या० वानिति यावत् । इदानीमित्यस्मादुपरिष्टादपि तेनेति सम्बध्यते । परोक्षत्वावस्थेदानीमित्युक्ता तृतीययाच प्रकृतो व्यवहारो निर्दिश्यते । इतिशब्दः सर्व्वमयत्वोपसंहारार्थः ॥ विज्ञानमयादिवाक्यार्थं सङ्क्षिपति । सङ्क्षेपतस्त्विति ॥ करणचरणयोरैक्येन पौनरुक्त्यमाशङ्क्याह । करणं नामेति ॥ आदिशब्दः शिष्टाचारसङ्ग्रहार्थः ॥ वाक्यान्तरं शङ्कोत्तरत्वेनोत्थाप्य व्याचष्टे । ताच्छील्येत्यादिना ॥ कुत्र तर्हि ताच्छील्यमुपयुज्यते तत्राह । ताच्छील्ये त्विति ॥ पूर्व्वपक्षमुपसंहरति । तत्रेत्यादिना ॥ कर्म्मणः संसारकारणत्वमुपसंहरति । एतत्प्रयुक्तो हीति ॥ संसारप्रयोजके कर्म्मणि प्रमाणमाह । एतद्विषया हीति ॥ कथं यथोक्त

ऽधर्म्ममयः सर्व्वमयस्तद्यदेतदिदम्मयोऽदोमय इति
यथाकारी यथाचारी तथा भवति साधु-

भा० धर्म्माधर्म्मयोः फलं। तत्प्रतिपद्यमानस्तन्मयो भवति। किं
बहुना ॥

तदेतत् सिद्धमस्य यदयमिदम्मयो गृह्यमाणविषया-
दिमयस्तस्मादयमदोमयः अद इति परोक्षं कार्य्येण गृह्य-
माणेन निर्दिश्यते। अनन्ता ह्यन्तःकरणे भावना विशेषाः।
नैव ते विशेषतो निर्देष्टुं शक्यन्ते। तस्मिंस्तस्मिन्क्षणे कार्य्यतो
ऽवगम्यन्ते। इदमस्य हृदि वर्त्ततेऽदोऽस्येति। तेन गृह्यमाण-
कार्य्येणेदम्मयतया निर्दिश्येते। परोक्षोऽन्तःस्थो व्यवहा-
रोऽयमिदानीमदोमय इति। सङ्क्षेपतस्तु यथा कर्त्तुं यथा
वाचरितुं शीलमस्य सोऽयं यथाकारी यथाचारी स तथा
भवति। करणं नाम नियताक्रियाविधिप्रतिषेधादिग-

व्या० भावादाकाशस्य शरीरानारम्भकत्वं श्रुतिविरुद्धारम्भप्रक्रिया-
नभ्युपगमादित्यभिप्रेत्याह। तथाकाशेति ॥
कथं पुनर्धर्म्मादिमयत्वे कामादिमयत्वमुपयुज्यते तत्राह।
न हीति ॥ कथं धर्म्मादिमयत्वं सर्व्वमयत्वे कारणमित्याशङ्क्याह।
समस्तमिति ॥ तद्यदेतदित्यादेरर्थमाह। किं बहुनेति ॥ विषयः
शब्दादिस्ततोऽन्यदपि प्रत्यक्षतो गृह्यमाणमादिशब्दार्थः। इदं-
मयत्वमदोमयत्वगमकमित्याह। तस्मादिति ॥ विशेषतस्तन्मयत्वोक्तिं
विना किमिति सामान्योक्तिरित्याशङ्क्याह। अनन्ता हीति ॥
तदस्तित्वे मानमाह। तस्मिन्निति ॥ अवगतिप्रकारमभिनयति
इदमस्येति ॥ इदंमयत्वमदोमयत्वञ्चोपसंहरति। तेनेत्यादिना ॥
परोक्षत्वं व्याकरोति। अन्तःस्थ इति ॥ व्यवहितविषयव्यवहार-

उ० कारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्म्मणा भवति पापः पापेन ॥

भा०म्याचरणं नाम। अनियतमिति विशेषः। साधुकारी साधुर्भवति। यथाकारीत्यस्य विशेषणं। पापकारी पापो भवति च। यथाचारीत्यस्य ताच्छील्यप्रत्ययोपादानात्। अत्यन्ततात्पर्य्येणैव तन्मयत्वं न तु तत्कर्म्ममात्रेणेत्याशङ्क्याह। पुण्यः पुण्येन कर्म्मणा भवति पापः पापेनेति। पुण्यपापकर्म्ममात्रेणैव तन्मयता स्यान्न तु ताच्छील्यमपेक्षते। ताच्छील्ये तु तन्मयत्वातिशय इत्ययं विशेषः। तत्र-कामक्रोधादिपूर्व्वकपुण्यापुण्यकारिता सर्व्वमयत्वे हेतुः संसारस्य कारणं देहाद्देहान्तरसञ्चारस्य च। एतत्प्रयुक्तो ह्यन्यदन्यद्देहान्तरमुपादत्ते। तस्मात्पुण्यापुण्ये संसारस्य कारणमेतत्। विषयो हि विधिप्रतिषेधावत्र शास्त्रस्य साफल्यमिति। अथोऽप्यन्ये बन्धनमोक्षकुशलाः खल्वाहुः।

व्या० वानिति यावत्। इदानीमित्यस्मादुपरिष्टादपि तेनेति सम्बध्यते। परोक्षत्वावस्थेदानीमित्युक्ता तृतीययाच प्रकृतो व्यवहारो निर्दिश्यते। इतिशब्दः सर्व्वमयत्वोपसंहारार्थः॥ विज्ञानमयादिवाक्यार्थं सङ्क्षिपति। सङ्क्षेपतस्त्विति॥ करणाचरणयोरैक्येन पौनरुक्त्यमाशङ्क्याह। करणं नामेति॥ आदिशब्दः शिष्टाचारसङ्ग्रहार्थः॥ वाक्यान्तरं शङ्कोत्तरत्वेनोत्थाप्य व्याचष्टे। ताच्छील्येत्यादिना॥ कुत्र तर्हि ताच्छील्यमुपयुज्यते तत्राह। ताच्छील्ये त्विति॥ पूर्व्वपक्षमुपसंहरति। तत्रेत्यादिना॥ कर्म्मणः संसारकारणत्वमुपसंहरति। एतत्प्रयुक्तो हीति॥ संसारप्रयोजके कर्म्मणि प्रमाणमाह। एतद्विषया हीति॥ कथ यथोक्त

उ० अथो खल्वाहुः काममय एवायं पुरुष इति स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म्म कुरुते यत्कर्म्म कुरुते तदभिसम्पद्यते ॥ ५ ॥

भा० सत्यं कामादिपूर्व्वके पुण्यापुण्ये शरीरग्रहणकारणं । तथापि कामप्रयुक्तो हि पुरुषः पुण्यापुण्यकर्म्मण्योपचिनोति ॥ कामप्रहाणे तु कर्म्म विद्यमानमपि पुण्यापुण्योपचयकरं न भवति। उपचिते अपि पुण्यापुण्ये कर्म्मणी कामशून्ये फलारम्भके न भवतः। तस्मात्काम एव संसारस्य मूलं। तथाचोक्तमाथर्व्वणे। कामान् यः कामयते मन्यमानः स्वकर्म्मभिर्जायते तत्र तत्रेति ॥ तस्मात्काममय एवायं पुरुषो यदन्यमयत्वं तदकारणं विद्यमानमपीत्यतोऽवधारयति काममय एवेति। स च काममयः सन् यादृशेन कामेन यथाकामो भवति तत्क्रतुर्भवति सकाम ईषदभिलाषमात्रेणाभिव्यक्तो यस्मिन्विषये भवति सो विहन्यमानः स्फुटीभवन् क्रतुत्वमापद्यते। क्रतुर्नामाध्यवसायो निश्चयो यदनन्तरा क्रिया

आ० कर्म्मविषयत्वं विधिनिषेधयोरित्याशङ्क्याह। अत्रेति ॥ इतिशब्दः पूर्व्वपक्षसमाप्त्यर्थः ॥ सिद्धान्तमवतारयति। अथो इति ॥ संसारकारणस्याज्ञानस्य प्रधान्येन कामः सहाकारीति स्वसिद्धान्तं समर्थयते। सत्यमित्यादिना ॥

कामाभावेऽपि कर्म्मणः सत्त्वं दृष्टमित्याशङ्क्याह। कामप्रहाणे त्विति ॥ ननु कामाभावेऽपि नित्याद्यनुष्ठानात्पुण्यापुण्ये सञ्चीयेते तत्राह। उपचितेति ॥ यो हि पशुपुत्त्रस्वर्गादीननतिशययपुरुषार्थान्मन्यमानस्तानेव कामयते स तत्तद्भोगभूमौ तत्तत्कामसंयुक्तो

उ॰ तदेष श्लोको भवति तदेव सक्तः सह कर्म्मणैति लिङ्गं मनो यत्र निषक्तमस्य प्राप्यान्तं कर्म्म-

---

भा॰ प्रवर्त्तते यत्क्रतुर्भवति यादृक्कामकार्य्येण क्रतुना यथास्वरूपः क्रतुरस्य सोऽयं यत्क्रतुर्भवति तत्कर्म्म कुरुते। यद्विषयः क्रतुस्तत्फलनिर्वृत्तये यद्योग्यं कर्म्म तत्कुरुते निर्वर्त्तयति। यत्कर्म्म कुरुते तदभिसम्पद्यते। तदीयं फलमभिसम्पद्यते। तस्मात्सर्व्वमयत्वेऽस्य संसारित्वे च काम एव हेतुरिति ॥ ५ ॥

तत्तस्मिन्नर्थ एष श्लोको मन्त्रोऽपि भवति। तदेवेति तदेव गच्छति। सक्त आसक्तस्तत्रोद्भूताभिलाषः सन्नित्यर्थः। कथमेति सह कर्म्मणा। यत्कर्म्मफलासक्तः सन्नकरोत्तेन कर्म्मणा सहैव तदेति तत्फलमेति। किन्तल्लिङ्गं। मनः। मनः-प्रधानत्वाल्लिङ्गस्य मनो लिङ्गमित्युच्यते। अथ वा लिङ्ग्यते ऽवगम्यतेऽवगच्छति येन तल्लिङ्गं। तन्मनो यत्र यस्मिन्निषक्तं निश्चयेन सक्तमुद्भूताभिलापमस्य संसारिणस्तदभिलाषो हि

व्या॰ भवतीत्याथर्वणश्रुतेरर्थः ॥ श्रुतियुक्तिसिद्धमर्थं निगमयति। तस्मादिति ॥ धर्म्मादिमयत्वस्यापि सत्त्वावधारणानुपपत्तिमाशङ्क्याह। यदिति ॥ स यथाकामो भवतीत्यादि व्याचष्टे। यस्मादित्यादिना ॥ यस्मादित्यस्य तस्मादिति व्यवहितेन सम्बन्धः। इतिशब्दो ब्राह्मणसमाप्त्यर्थः ॥ ५ ॥

तत्रेति गन्तव्यपरामर्शः। तदेव गन्तव्यं फलं विशेषतो ज्ञातुं पृच्छति। किन्तदिति ॥ प्रतीकमादाय व्याचष्टे। लिङ्गमिति ॥ योऽवगच्छति स प्रमात्रादिसाक्षी येन साक्षेण मनसावगम्यते तन्मनो लिङ्गमिति पक्षान्तरमाह। अथवेति ॥ यस्मिन्निश्चयेन संसारिणो मनः संसक्तं तत्फलप्राप्तिस्तस्येति सम्बन्धः ॥ तदेवोप-

उ० णस्तस्य यत्किञ्चेह करोत्ययं । तस्माल्लोकात्पुन-
रैत्यस्मै लोकाय कर्म्मण इति नु कामयमानोऽथा-

भा० तत्कर्म्म कृतवान् । तस्मात्तन्मनोऽभिषङ्गवशादेवास्य तेन कर्म्मणा तत्फलप्राप्तिः । तेनैतत्सिद्धं भवति कामो मूलं संसारस्येति । अत उत्पन्नकामस्य विद्यमानान्यपि कर्म्माणि ब्रह्मविदो बन्ध्यप्रसवानि भवन्ति । पर्य्याप्तकामस्य कृतात्मनस्त्विहैव सर्व्वे प्रलीयन्ति कामा इति श्रुतेः । किञ्च प्राप्यान्तं कर्म्मणः प्राप्य भुक्ताऽन्तमवसानं यावत्कर्म्मणः फलं । परिसमाप्तिं कृत्वेत्यर्थः । कस्य कर्म्मणोऽन्तं प्राप्येत्युच्यते । तस्य यत्किञ्चन कर्म्म इहास्मिँल्लोके करोति निर्वर्त्तयत्ययं तस्य कर्म्मणः फलं भुक्त्वान्तं प्राप्य तस्माल्लोकात्पुनरैत्यागच्छत्यस्मै लोकाय कर्म्मणेऽयं हि लोकः कर्म्मप्रधानस्तेनाह कर्म्मण इति । पुनः कर्म्मकरणाय पुनः कर्म्म कृत्वा फलसङ्गवशात्पुनरमुं लोकं यातीत्येवं । इति नु एवं नु कामयमानः संसरति यस्मात्

आ० पादयति तदभिलाषो हीति ॥ पूर्व्वार्द्धार्थमुपसंहरति । तेनेति ॥ कामस्य संसारमूलत्वे सत्यर्थसिद्धमर्थमाह । अत इति ॥ बन्ध्यप्रसवत्वं निष्फलत्वं । पर्य्याप्तकामस्य प्राप्तपरमपुरुषार्थस्येति यावत् । कृतात्मनः शुद्धबुद्धेर्विदितसतत्त्वस्येत्यर्थः । इहेति जीवदवस्थोक्तिः । कामप्रधानः संसरति चेत्कर्म्मफलभोगानन्तरं कामाभावान्मुक्तिः स्यादित्याशङ्क्याह । किञ्चेति ॥ इतश्च संसारस्य कामप्रधानत्वमास्थेयमित्यर्थः । यावदवसानं तावद्भुक्त्वेति सम्बन्धः ॥ उक्तमेव सङ्क्षिपति । कर्म्मण इति ॥ इत्येवं पारम्पर्य्येण संसरणादृते ज्ञानान्न मुक्तिरिति शेषः ॥ संसारप्रकरणमुपसंहरति । इति न्विति ॥ अवस्थाद्वयस्य दार्ष्टान्तिकं बन्धं प्रबन्धेन दर्शयित्वा

NOTICE.

An English translation of the Upanishad and Commentary will be given in one or two separate numbers, after the completion of the Text